सदा सदालोकपदप्रसादतः, **शशाङ्कलक्ष्मा** स जिनो धिनोतु वः ॥९॥

अवेक्ष्य यस्याऽङ्गरुचः सुधोज्ज्वला-श्चिरं विचारं चतुरा इति श्रिताः ।
अनन्तविज्ञानविधोः परिस्फुटाः, प्रभाः किमेताः **सुविधिः** स वो मुदे ॥१०॥

महीतले यं विहरन्तमन्वहं, नमोचरीकारिषुरंह्रिपा अपि ।
विहातुमेकेन्द्रियतामिवाऽऽत्मनो, ददातु वः शाश्वतशं स **शीतलः** ॥११॥

विनम्रवृन्दारकमानवप्रभू-त्तमाङ्गसंलालितमालतीस्रजः ।
अबूभुषन् यत्पदपीठमुच्चकैः, स **विष्णुसूनु**र्जिनराट् शिवाय वः ॥१२॥

निरस्तनिःशेषमलात्मकत्वतः, किलाऽङ्गिनां भक्त्यनुरागसङ्क्रमैः ।
बभार यो विद्रुमकान्तिसोदरं, वपुः स जीयाद् **वसुपूज्यनन्दनः** ॥१३॥

समीहितं यत्र ददत्यनारतं, सुरद्रुवद्दानमृणध्वनिर्गतः ।
अनाथतां वाच्यमृते जगत्त्रये, स वो वितन्याद् **विमलो** मलोज्झितान् ॥१४॥

**अनन्तने**ता स शिवाय देहिना-मनन्तधर्मात्मकवस्तुदेशकः ।
वशीकृतानन्तचतुष्टयान्वितो, निरास योऽनन्तसुतोर्जितं क्षणात् ॥१५॥

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

य आदिशद्धर्ममधर्मभिच्चतु-र्विधं परब्रह्मवशत्वकार्मणम् ।
स कर्मनिर्मन्थक**धर्म**तीर्थकृद् विनिर्मिमीतां शिवशर्म देहिनाम् ॥१६॥

मृगोऽपि यत्पादयुगस्य सेवनं, वितन्तनद्धर्मवतां धुरि स्थितः ।
अवापिवान् श्रीभृतराजमण्डलं, स **आचिरेयो**ऽद्भुतभूतयेऽस्तु वः ॥१७॥

य उद्भटाभोगवतीः सभूषणा, मुमोच षट्खण्डभुवो वधूरिव ।
स **कुन्थु**तीर्थाधिपतिः पवित्रये-ज्जगत्रयं त्रासितभावशात्रवः ॥१८॥

तृणाय मत्वा ननु चक्रवर्त्तिनः, श्रियं शिवश्रीपुरतो य आददे ।
महातपस्यां तदवाप्तये स वो, व्यपाकरोत्वार**मरो** जिनाधिपः ॥१९॥

अचीकरद् यो निजपादसेवनं, जवान्नृदेवासुरराजराजिभिः ।
तमप्यजैषीन्मदनं य आदरात्, स **मल्लिनाथः** प्रथयेत् सुखानि वः ॥२०॥

जडप्रियः क्षुद्रतया समाश्रितो-ऽप्युपक्रमं यस्य निषेव्य कूर्मकः ।
क्षमोऽभवन् क्षमामपि धर्तुमुच्चकैः, स **सुव्रतो**ऽर्हन् व्रतसम्पदेऽस्तु वः ॥२१॥

अनीनमद् यो द्विषतो महीभुजो, भुजालवद् गर्भगतोऽपि हि प्रभुः ।
**नमि**र्जिनेन्द्रो जगतामुपद्रवान्, द्रुतं स विद्रावयताज्जितेन्द्रियः ॥२२॥

कुमारतां यः कलयन्नपि स्वयं, कुमारभावं निरमूलयत्तराम् ।
**अरिष्टनेमि**र्भगवान् स देहिनां, पिनष्टु कष्टानि वरिष्ठचेष्टितः ॥२३॥

अलूलुठद् यः कमठं शठाशयं, स्मयाचलात् तुङ्गतरादपि क्षणात् ।
जिनोऽ**श्वसेनाङ्गभवो** भवक्षयं, क्षमावतामातनुतांतरामयम् ॥२४॥

सुराङ्गनानां वदनेषु कुङ्कुमा-वलेपलीलां कलयन्त्य उच्चकैः ।
प्रभा जयन्तु **त्रिशलाङ्गजन्मनो**, द्विधापि धर्मं प्रकटीचरीक्रतः ॥२५॥

विधाय येषां स्मरणं शरीरिणो, ययुः प्रयास्यन्त्यपि यान्ति निर्वृतिम् ।
जगन्ति नामाकृतिमुख्यभेदत-श्चतुर्विधास्तीर्थकृतः पुनन्तु ते ॥२६॥

अधिष्ठिता हंसवरं तनोति या, विलासमन्तःसुविशुद्धमानसम् ।
**सरस्वती** सा परमेष्ठिसम्भवा, पराञ्चितं सञ्चिनुतां सतां तताम् ॥२७॥

यस्मिन् प्रथीयःसुकृताम्बुराशौ, चैत्यानि शङ्खायितमाचरन्ति ।
परस्परं संवलितास्तदीयाः, प्रभास्तरङ्गीभवनं श्रयन्ति ॥२८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यस्मिल्लँक्ष्मीनिधानभ्रमविवशतयोत्तुङ्गलक्ष्मीवदोकः-
केतुच्छाया भुजङ्गा अतिकुटिलतमाः श्यामलाः कौ पतित्वा ।
आकाशे प्रोत्पतेयुर्झटिति चपलतामादधाना द्विजिह्वा-
कारान(न)त्राऽधिवासं दधत इति पुरारीति विज्ञा इवोच्चैः ॥२९॥

तैस्तैः श्रीजिनपूजनैः प्रतिदिनं तैस्तैर्गुरूपासनै-
स्तैस्तैः श्रीजिनशासनोन्नतिभरैस्तैस्तैः क्रियाराधनैः ।
तैस्तैः श्रीसमयोपकर्णनमुखैः पुण्यैः पुराणास्तिकान्,
श्राद्धा यत्र निवासिनः स्मृतिपथं तांस्तान्नयन्तेऽधुना ॥३०॥

प्राज्यश्रीगुरुपादपङ्कजरजःपुञ्जप्रपञ्चोल्लसल्-
लक्ष्मीखेलनदीर्घिकायितमहाभोगक्षमामण्डले ।
तत्राऽमात्रपवित्रदानविधिकृल्लोकाकुले **देलतो-**
**वाडाह्वे** प्रवरे पुरे सुरपुरानन्यत्वभाजि श्रिया ॥३१॥

आस्तां स्तोत्रं यद्गुणानां प्रमाणं, कर्तुं विज्ञा अप्यहो के समर्थाः ।
यद्वा दानं रोहणोद्यन्मणीनां, दूरे राशिं कः सुशक्तोऽपि कुर्यात् ॥३२॥

प्रोत्सर्पन्ति प्रत्यहं येषु यद्वद् विश्वानन्दाधायिनः सद्गुणौघाः ।
नाऽन्येष्वेवं शुक्लपक्षे यथा वा, चन्द्रे भासः स्युस्तथा किं ग्रहेषु ॥३३॥

न प्रेक्ष्यन्ते ये गुणा येषु शस्या-स्ते योग्या नोपग्रहीतुं सतां स्युः ।
रत्नक्ष्माध्रे यानि रत्नानि नाऽऽसं-स्तेषां यद्वा वस्तुतो नास्ति सत्ता ॥३४॥

येषां सङ्गाद् यद्गुणानां महत्त्वं, दृश्येतोच्चैस्तत्परेषां न योगात् ।
चक्रा यद्वा यं प्रमोदं श्रयन्ते, भानोः प्राप्तेः किं तमेवोडुकानाम् ॥३५॥

चक्रवर्त्तिषु यथा भरतेश-स्तीर्थकृत्स्वपि यथर्षभदेवः ।
रत्नजातिषु यथा सुररत्नं, कल्पवृक्ष इव भूमिरुहेषु ॥३६॥

दैवतेष्वपि यथा ऋभुनेता, राजऋक्षपटलेषु यथा वा ।
मुख्यतां दधति येऽद्भुतवृत्ताः, सूरिपङ्क्तिषु तथा सकलासु ॥३७॥ युग्मम् ॥

शरत्सुधांशूज्ज्वलतां दधाना, गुणा यदीया विततः स्फुरन्तः ।
केषामकस्मादपि पुंवृषाणां, न कण्ठदेशे स्थितिमुद्वहन्ति ॥३८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

एकोऽपि येषां शुभनामकर्मो-दयः समस्तं सुभगीकरोति ।
हारस्य मुक्तानिकुरुम्बमुच्चै-र्यथा मणिर्नायकनामधेयः ॥३९॥

विश्वे समस्तेऽप्यनिशं नदीस्ने, संसारतीर्णौ ननु ये नदीष्णाः ।
प्राध्वंकृतानङ्गबला य एवाऽ-नगारवृन्दारकतां श्रयन्ते ॥४०॥

कुकर्मसारङ्गबलान्यजस्रं, कुर्वन्त उच्चैर्भयसङ्कुलानि ।
अधृष्यवाचो मुनिवृन्दसिंहा, प्रघ्नन्ति येऽज्ञानगजोर्जितानि ॥४१॥

विश्वविस्मयविधायिदेशना-वाक्सुधाभिरखिलं चराचरम् ।
मोदयन्ति किल ये कलाभृतो, भक्तिमद्बुधनिषेवितक्रमाः ॥४२॥

विश्वविश्वजनतातितापकृद्, गोविलासपरिवर्द्धितोदयः ।
भानुमान् प्रवरबोधकार्यपि, प्राप्नुयादुपमितिं न यैः समम् ॥४३॥

पुण्यपापपरलोकनाशिनः, सत्सुराधिपविनिर्मितस्तुतेः ।
गीष्पतेरपि गुरोस्तुलां कथं, ये श्रयन्ति सुमनोऽर्चितक्रमाः ॥४४॥

पूजयन् प्रतिकलं कलङ्किनं, संश्रयन्नपि च लेखशालिकाम् ।
यैरपोढदुरनुष्ठितैर्विदां, सत्तमैर्न हि बुधः समो भवेत् ॥४५॥

यदुपपादपयोजयुगाश्रिताः, सकलसिद्धिभुजः स्युरिहाऽङ्गिनः ।
सुरतरोरथवा किमुपासकाः, प्रतिपनीपदतीहितवन्ध्यताम् ॥४६॥

यदवलोकनमात्रत एव स-द्भवभृतां दुरितापचयो भवेत् ।
किमु न सूरकरोत्करयोगतो, जलरुहामुपसङ्कुचनक्षयः ॥४७॥

यदभिधानमृगाधिपगर्जिते, प्र [ _ _ _ _ _ _ _ _ _ _ ] ॥[1]
तीरक्रीडदुदारहंसविलसन्मुक्ताफलाभ्यां स्फुरत्-
स्वर्णाम्भोजरजःपिशङ्गितपयःपीतात्मकाभ्यां स्फुटम् ।
**आनासागरसंज्ञवीसलसमुद्राभ्यां** सरोभ्यामियं,
बोभूष्येत निरन्तरं चलचलत्ताडङ्ककाभ्यामिव ॥७१॥ युग्मम् ॥

नानारत्नपरम्परां प्रतिपदं संवीक्ष्य यस्मिन् बुधा,
मन्यन्तेऽनुशिलोच्चयं हृतमणिं तं रोहणोर्व्वीधरम् ।

---

१. इत आरभ्य ७० तमश्लोकपर्यन्तपाठात्मकं पत्रं नाऽस्ति ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

धर्माध्यक्षविधीयमानविविधप्रोद्दामपुण्यक्रिया-
स्फूर्जन्मङ्गलमण्डलादतिमहादु**र्ग्गाजमेरो**स्ततः ॥७२॥

**शान्तिसुन्दर**शिष्याणुः, साधुभिर्विश्वबन्धुभिः ।
रमणीयगुणाधार-श्रमणीभिश्च संयुतः ॥७३॥

ज्यायोवन्दनविधिना-भिवन्द्य माद्यत्प्रमोदसन्दोहः ।
विनयावनम्रकायः, सस्नेहं विज्ञपयति यथा ॥७४॥

श्रीमत्तीर्थङ्करगुरुपदध्यानसन्धानतो मां,
श्रेयोऽश्रान्तं श्रयति यतिभिः संयतीभिश्च सार्द्धम् ।
स्वाङ्गारोग्यप्रभृतिकुशलोदन्तवृत्तिप्रसादात्,
सन्तोष्योऽयं प्रतिदिनमपि श्रीप्रतीक्ष्यैः स्वशिष्यः ॥७५॥

कार्यं च प्रातरैन्द्रीं हरितमभिनवैः प्रोल्लसद्भिः करौघैः,
पीताङ्गीनां दधाने दिनकृति विजितध्वान्तविद्वेषिचक्रे ।
ब्रह्माण्डारण्यकादौ त्रिभुवनविभुतां व्यञ्जयन्तीं पुराणा-
ध्येतारो यस्य विश्वाद्भुततममहिमोद्दामतामामनन्ति ॥७६॥

ज्यायःप्राज्यप्रतिष्ठाततततर**करणासाधुराज**प्रदत्त-
श्वेताच्छदादिदानप्रगुणितसुमहारम्भणोद्धर्षहर्षम् ।
**पद्मानन्दा**भिधानं प्रथमजिनपतेस्तस्य वृत्तं ब्रुवेऽहं,
मध्येसंसद्विधायाऽसमवचनकलं वाचकं **देवदत्तम्** ॥७७॥ युग्मम् ॥

**श्रीवार्षिकपर्वा**ऽथो, खर्व्वीकृतपापगर्वसर्वस्वम् ।
आयातं किल धार्मिक-धर्मचिकीर्षाभिराकृष्टम् ॥७८॥

आरम्भणविधौ तत्र, सृष्टे **लिम्बा**ह्वमन्त्रिणा ।
**कीर्त्तिसुन्दर**साधूनां, सान्निध्यान्नवभिः क्षणैः ॥७९॥

निरन्तरायं श्रीदेव-गुरुपादौ सरीस्मृता ।
मयाऽल्पमतिना **श्रीम-त्कल्पसूत्र**मवाच्यत ॥८०॥ यमलम् ॥

चतुर्विधोऽपि श्रीसङ्घो, धन्यः पुण्यैरनेकशः ।
फलेग्रहि करोति स्म, निजं मानुषजं जनुः ॥८१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तथाहि -

सप्तक्षेत्र्यां केचनोपुः स्ववित्तं, केचिच्छीलं शीलयामासिवांसः ।
भ्रश्यत्तापास्तेपिरेऽन्ये तपांसि, प्राज्यामेकेऽबीभवन् भावनां च ॥८२॥

एके भव्या भूरिभावाभिरामा, ज्यायःपूजामादधुर्बोधिदानाम् ।
अन्ये तेषां शासनं शंसनीया-चाराः सारं प्रौढिमानं च निन्युः ॥८३॥

केचिद्दीनादीननादीनवाशा, नानादानैरुद्धरन्ति स्म धन्याः ।
कारुण्यार्णोऽन्त्यार्णवाः पूर्णभावा, एकेऽमारिं घोषयामासुरुच्चैः ॥८४॥

अपि च-

अनन्यसामान्यवदान्यताभि-रलङ्कृताः केचन मार्गणेभ्यः ।
वस्त्रादिदानानि दरिद्रता[या], विभेदनेऽस्त्राणि दधुर्विधिज्ञाः ॥८५॥

माद्यन्मृदङ्गादिनिनादसारै-र्नाट्यैर्बुधानन्दकरैरनेकैः ।
हर्षप्रकर्षोल्लसितास्तु केचित्, प्रभावनामाविरभावयंश्च ॥८६॥

विशिष्य योगानुष्ठान-कारणादौ परायणाः ।
**कीर्त्तिसुन्दर**नामानो, यतयो यतनारताः ॥८७॥

चतुर्थाचाम्लषष्ठादि-तपांसि प्रायशः श्रिताः ।
संसारतारणं कृत्वा, त्रिभुक्त्या कल्पमादधुः ॥८८॥ यामलम् ॥

वहन् **भगवतीयोगान्**, शुद्धानुष्ठानसादरः ।
**हर्षरत्न**मुनिर्मोदा-दौपवस्तमसूत्रयत् ॥८९॥

सप्ताष्टमाङ्गकल्प-व्यवहारनिशीथयोगविधिनिष्णाः ।
**हर्षाब्धीरा** गणयो, वितेनिरे स्पष्टमिह षष्ठम् ॥९०॥

वैयावृत्त्यविधानबद्धमनसः शश्वद्विधेयाश्रवाः,
श्राद्धाध्यापनलेखनोद्यमकृतो निर्धूतरोषद्विषः ।
**पद्मानन्द** इति प्रसिद्धविदिते काव्ये भणन्त्यष्टमं,
सर्गं स्वर्गसुखाभिलाषविरता एते त्रयः साधवः ॥९१॥

काश्चित् सूत्रपरम्परा**मुपपदाद्देशाच्च मालादिकान्**,
ग्रन्थांश्चाऽप्यपरा मृदूत्तरगिरा पापाठयन्त्योऽशठाः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अर्थान् काश्चन वाञ्छिताञ्छितमदाः सम्बोधयन्त्यः स्फुटं,
श्राद्धाः का अपि पौषधादिकविधीनाशासयन्त्योऽनिशम् ॥९२॥

क्षुल्ला लक्षणभाणनादिकविधौ बद्धादरा **उत्तरा**-
**ध्यायो**द्योतनतत्पराः परिहृताशेषप्रमादादयाः ।
**वैदर्भीतप**ओलिकाद्वयकृतोऽत्यन्तं विनीत्याश्रिताः,
साध्व्योऽकुर्वत साधु**सुन्दरिगणि**न्याह्वा गुणिन्योऽष्टमम् ॥९३॥
युग्मम् ॥

**दमयन्तीतपः**श्रेणि-त्रयं निर्माय सत्त्वतः ।
समासेवितसंसार-तारणप्रवरव्रताः ॥९४॥

**चतुःशरण**पाठिन्यो, वैयावृत्त्यविधौ रताः ।
**शान्तिनिध्य**भिधाः साध्व्यः, साधयामासुरष्टमम् ॥९५॥ युग्मम् ॥

**महानिशीथागमयोगयुक्ता**, **शिवादिमाला**गणिनी गुणिज्ञा ।
धर्मार्थकामाध्ययनं पठन्ती, पञ्चोपवासांस्तनुते स्म भुक्तेः ॥९६॥

समासोक्तिसदभ्यस्तं, कुर्वती **शिवचूलिका** ।
तार्तीयीकं भणन्त्युच्चैः, पादं क्षपणमादधात् ॥९७॥

**देवपाल**श्च **तोलाकः**, कल्पमातनुतांतराम् ।
**गुणराज**स्तथा **झाडूः**, षष्ठं स्पष्टं वितेनतुः ॥९८॥

**करणासाध्वाल्हणसी**प्रमुखाः, स्थानानि केऽपि कुर्वन्ति ।
आसन्नपञ्चविंशा, यथार्हसूत्रादि पापठति ॥९९॥

एतावत्प्रमुखा नित्यं, प्रतिक्रान्ति वितन्वते ।
द्विविंशानुमिताः श्राद्धाः, पौषधं पर्वणि व्यधुः ॥१००॥

श्रीसङ्घवार्द्धाविह भूरिपुण्य-क्रियानदीभिः परिपूर्यमाणे ।
सङ्घाधिराजव्यवसायि**पेथा**-दयो वसूनां पदवीं श्रयन्ति ॥१०१॥

अक्षूणभाववैपक्ष-पक्षक्षेपणहेतवे ।
पक्षक्षपणमस्राक्षी-**म्मटकूः** कूटनोज्झिता ॥१०२॥

सत्त्वाधिकौपवस्राणि(स्तानि), दश **जासू**रसूत्रयत् ।
अष्टाह्निकां व्यधुः पञ्च, **गोरि-पद्मायिका**दयः ॥१०३॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

धनार्हरोहिणीमुख्याः, षट् श्राद्धाः सप्त चाऽऽदधुः ।
द्वे षड् **धासूमुखा** अष्टो-पवासान् पञ्च चाऽसृजन् ॥१०४॥

**अजेसर्या**दयश्चक्रु-र्दशमं श्राविका दश ।
अकार्षुरष्टमं षष्टि-प्रमाणानुमितिस्पृशः ॥१०५॥

आचतुर्मासकात् षष्ठैः, पारयन्ति पुराकरोत् ।
**दमयन्त्योलिकां हूडी**-रत्र संसारतारणम् ॥१०६॥

**जाजी**प्रमुखा एका-दश **दमयन्तीतपो** वितन्तनति ।
प्रतिमां च पञ्चमासीं, द्वे तिस्रो वेदमासमिताम् ॥१०७॥

त्रि-द्व्येकमासवीर-प्रतिमां निर्यान्ति काश्चिदपि धन्याः ।
द्विदशाः पठन्ति **माला-मुपदेशा**दपरमपि बह्व्यः ॥१०८॥

वहन्त्यष्टोपधानानि, **नयश्री-धरणू**मुखाः ।
अष्टम्यादिषु कुर्वन्ति, पौषधं षोडशादयः ॥१०९॥

कमलशिवकुमारश्रेणिकल्याणकानी-न्द्रियजयपरमेष्ठ्येकाशने योगशुद्धिः ।
समवसरणभद्रालोचनास्थानकानी-ति तप इह वितेनुस्तन्वते भूरिभव्याः ॥११०॥

कृतिलोककृतोत्कृष्ट-सुकृतैरतिभासुराः ।
पञ्चापि वासरा जग्मुः, पार्वणाः पार्वणेन्दुवत् ॥१११॥

समस्तमत्रत्यमिति स्वरूपं, श्रीपूज्यपादैरवधार्य सम्यग् ।
तत्रत्यतद्युक्तविशेषशिक्षा-प्रसादतः शिष्यलवोऽनुकम्प्यः ॥११२॥

तत्र-

वचांसि येषाममृतोपमानं, द्विजिह्वमुक्तानि कथं श्रयन्ते ।
यानि श्रुतान्येव जनैः श्रुतिभ्यां, न्यक्कुर्वते मोहविषोर्जितानि ॥११३॥

स्वरस्य येषां सुकुमारिमाणं, संशिक्षितुं राजमराल उच्चैः ।
श्रीशारदांह्री परिषेवमाणो-ऽप्यासो न सामर्थ्यममुं विधातुम् ॥११४॥

संसारसारान् सकलान् पदार्था-न्नैर्मल्यगौल्ये कमनीयतां च ।
विधिर्विधिज्ञो ननु दण्डयित्वा, यद्देशनामेकतमां व्यधत्त ॥११५॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

न स्याद् यदीत्थं तदियं द्युकुल्या, पृथ्व्यां लुठन्ती किमु रारटीति ।
द्राक्षा कुतोऽसावतिदीनदेहा, दर्दृश्यते किं विवरं च चन्द्रे ॥११६॥ युग्मम् ॥

सुधाञ्जनाभानि वचांसि येषा-मासाद्य भव्या निजदर्शनानि ।
तथा विशुद्धीकरणं नयन्ति, साक्षाद्यथा स्यात् सकलोऽपि लोकः ॥११९॥

प्रातःक्षणे मङ्गलशङ्खनाद-वद् ये गभीरं वचनं यदीयम् ।
शृण्वन्ति तेषां सुकृतोद्धुराणां, शस्तानि सर्वाण्यपि संश्रयन्ति ॥१२०॥

तेषामनूचानशिरोमणीनां, श्री**सोम**युक्**सुन्दर**सूरिनाम्नाम् ।
बृहत्तमा श्रीप्रभुभिः प्रसाद्या, मद्वन्दना पुण्यवनाम्बुधारा ॥१२१॥

सौजन्येन ग्लानबालादिवैया-वृत्येन श्रीगच्छकार्योद्यमेन ।
सङ्क्रामन्ति प्रत्यहं येन केषां, दूरस्थानामप्यहो मानसेषु ॥१२२॥

सत्**क्षेम**युग्**वल्लभ**संयतानां, तेषां तपःकर्मणि कर्मठानाम् ।
समस्तवाचंयमहृत्समाधि-प्रकर्षनिर्माणकृतव्रतानाम् ॥१२३॥

जगन्मित्रीकारप्रकरणविधौ नाट्यगुरुणा,
विनीतिम्ना येषां सुहितमनसः पण्डितजनाः ।
न मन्यन्ते राकाऽमृतकरकरोद्भूतजनुषं,
सुधां भिक्षाभिस्सामुपलशकलेभ्योऽपि सुसिताम् ॥१२४॥

विद्वद्घटामस्तकमण्डनानां, कुवादिदर्पोदयखण्डनानाम् ।
गणीश्वराणां **जिनवर्द्धना**नां, तेषां यशोभिः परिवर्द्धनानाम् ॥१२५॥

अहो अहो ये परमर्षयोऽपि, कलिन्दिकाखेलनदीर्घिकायाम् ।
नीत्वा मनीषां सहचारिणीत्वं, क्रीडाविलासं कलयन्त्यजस्रम् ॥१२६॥

साधुराज**जिनसागर**नाम्नां, भूरिगौरगुणपद्धतिभाजाम् ।
काव्यकाव्यकलयाऽभ्यधिकानां, नव्यया सुरगुरोरपि तेषाम् ॥१२७॥

यैस्तर्कवादाद्भुतसङ्गराङ्गणे, वादं सृजन्तो परवादिनो हृदि ।
द्वि-त्रैः प्रयोगप्रदरैर्हतास्तथा, पुनर्यथा नाऽस्य कथामपि श्रिताः ॥१२८॥

चातुर्यसारैर्वचसां प्रपञ्चैः, संप्रीणतां कोविदमण्डलानि ।
**शान्त्यादिराजा**ह्वयसंयतानां, तेषां महासज्जनमण्डनानाम् ॥१२९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

चञ्चद्गुणग्रामसमुत्थकीर्त्ति-कल्लोलिनीक्षालितदिङ्मलानाम् ।
**शान्तिप्रिया**ह्वर्षिधुरन्धराणां, सतां प्रभूपासनपुण्यभाजाम् ॥१३०॥

अत्युग्राभिग्रहैर्लोभं, निर्भर्त्सितवतो भृशम् ।
**शान्तिचन्द्र**गणेर्मौन-गुणचङ्गीकृतात्मनः ॥१३१॥

विनयादिगुणश्वेत-पक्षतः कीर्त्तिकौमुदीम् ।
बिभ्रतो **जिनकीर्त्त्या**ह्व-मुनिचन्द्रस्य सन्मतेः ॥१३२॥

शमदमसंयमजैना-गमवाचनपाठनाम्बुयोगेन ।
क्षालितपापमलानां, साधूनां **हर्षराजा**नाम् ॥१३३॥

दुष्करोग्रतपउद्धतवह्नि-प्लुष्टकर्मगहनप्रसराणाम् ।
अप्रमत्तयतिमौलिमणीनां, **वीर**पूर्वक**समुद्र**गणीनाम् ॥१३४॥

वर्यचातुर्यविनय-क्रियाऽशोकवनान्तरे ।
खेलतो राजवन्नित्यं, **विजयाद्राज**सन्मुनेः ॥१३५॥

**सुधासुन्दर**सत्साधो-र्धर्मधीरमतिस्पृशः ।
लक्षणादिषु शास्त्रेषु, कुशलत्त्वमभीप्सतः ॥१३६॥

रङ्गद्गुणमणिश्रेणि-रोहरोहणभूभृतः ।
**हेमसुन्दर**क्षुल्लस्य, यशोव्याप्ताखिलावनेः ॥१३७॥

**हेमसेन**मुनेर्वर्य-तपःसंयमशालिनः ।
**हर्षप्रभ**मुनेर्मान-मुक्तस्य सरलात्मनः ॥१३८॥

बुद्धि**बेडा**प्रयोगेण, तरतः शास्त्रवारिधिम् ।
**उदयात् कलश**स्यापि, मुनेरुद्यद्गुणावलेः ॥१३९॥

वर्यात्युग्रतपोदयादमशमानीहाक्षमासम्पदं,
साहित्यागमलक्षणादिकमहाशास्त्रेषु लीनात्मनाम् ।
प्रोत्सर्पद्विनयोपकारकरणाधारीभवद्धर्मणां,
**चूलानां परिवर्त्तिनीपद**जुषां **कल्याण**तोऽस्तांहसाम् ॥१४०॥

परासामपि साध्वीनां, संयमाराधनाकृताम् ।
प्रभुपादैः प्रसाद्या मे, सस्नेहं चाऽनुवन्दना ॥१४१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ऐरावतं ये यशसां समूहै-र्विडम्बय(न्त्य)निशं विशुद्धैः(?) ।
शश्वन्महादानभरेण मित्री-कुर्वन्त्यनेकान्तमतं प्रपन्नाः ॥१४२॥
प्रभावनाभिर्विविधाभिरुच्चकैः, प्रभावयन्तो जिनशासनं सदा ।
मनस्सु बोधिं दधते कुतीर्थिना-मप्यङ्कुरान् मेघ इवाऽम्बुनावनौ ॥१४३॥
तेषां श्राद्धावतंसानां, श्राविकाणामपि स्फुटम् ।
नामग्राहं प्रसाद्यो मे, धर्मलाभो गुरूत्तमैः ॥१४४॥
**कीर्त्यादिसुन्दर**गणि-**हर्षरत्न**मुनिस्तथा ।
**हर्ष**तो **धीर**गणयो-ऽत्रत्या वाचंयमर्षभाः ॥१४५॥
साध्व्योऽपि **साधुसुन्दरि**-गणिः **शान्तिनिधि**र्गणिः ।
**शिवादिमाला**गणिनी, क्षुल्लिका **शिवचूलिका** ॥१४६॥
**करणासाधु**प्रमुखाः, श्रावकाः श्राविकास्तथा ।
श्रीप्रभून् भक्तितो नित्यं, वन्दन्त इति मङ्गलम् ॥१४७॥
गुरुपादमहाभक्ति-तरङ्गसुभगीकृतः ।
भाद्रशुक्लत्रयोदश्यां, शिष्यलेशो व्यजिज्ञपत् ॥१४८॥
विशेषतः [ _ _ _ _ _ _ _ _ _ _ _ _ _ _ _ ]
नंनमत्यनुदिनं गुरुयुग्मं, **साधुसुन्दरि**गणिन्य उदाराः ॥१४९॥
महीमहीयो जनदत्तमानान्, यशोभरैर्भर्त्सितराजमानान् ।
प्रभून् द्वयानग्रिमभक्तियुक्तः, प्रणौति **पेथा**भिधसङ्घनाथः ॥१५०॥
**जिनदत्तोदयराजौ, रत्नाई शाणिका च कर्माई ।**
इति नाम्नां मज्ज्यायः-साध्वीनां धर्मलाभोऽस्तु ॥१५१॥

—x—

( ३ )

## सिद्धपुरस्थ-श्रीदेवसुन्दरसूरिं प्रति प्रेषितं विज्ञप्तिपत्रम्

प्रप्यानध्यानसन्धान-सम्भवं भवभेदकम् ।
तज्ज्योतिर्योगिभिर्ध्येय-मार्हतं जयति स्फुटम् ॥१॥
श्रेयो वो विदधातु भद्रकलशः **श्रीनाभिराजाङ्गजो**-
भव्यानां शिवपूःप्रयाणकविधावभ्युद्यतानां सदा

Jain Educationa International　　For Personal and Private Use Only　　www.jainelibrary.org

यस्मिन् कुङ्कुमहस्तकन्ति भगवत्युच्चैः प्रतापश्रियः,
शश्वद्भूरियशःसुधारसभरैर्धावल्यमाबिभ्रति ॥२॥
यत्सेवाऽमृतसेवनेन सगरोऽप्यादत्तवाँश्चक्रव-
र्त्यक्षय्यामरतां निरस्तसकलप्रोद्दामरोगव्रजाम् ।
नम्रानेकसुरासुरेश्वरशिरःश्रेणीनताङ्घ्रिद्वयः
स श्रीमान**जितप्रभु**र्वितनुतां शैवं सुखं प्राणिनाम् ॥३॥
आत्मीयाभ्युदयेन भव्यकुमुदव्रातं समुल्लासयन्,
विश्वव्यापकगोभरेण जगतो मोहान्धकारं हरन् ।
सौम्यश्रीर्हरिणा श्रितः कृतबुधप्रीतिप्रकर्षोद्भवः,
शीतीभावमुपादधातु भविनां **श्रीशान्ति**शीतद्युतिः ॥४॥
यस्याऽष्टापदविष्टरोदरगतां दृष्ट्वा वपुर्यष्टिकां,
नष्टानिष्टगरिष्ठकष्टपटला हृष्टा जना विष्टपे ।
शिष्टाधीष्टसदष्टमादिकतपःप्लुष्टोरुकर्माष्टकः,
पुष्टारिष्ट**मरिष्टनेमि**रनिशं वोऽसौ पिनष्टु प्रभुः ॥५॥
नागक्ष्मापतिनिर्मितातिशितिमप्रौढस्फटाभ्रोपरि,
क्रीडच्चारुमणिप्रभाभरचलद्विद्युल्लताडम्बरः ।
स्निग्धश्यामतनुच्छविं प्रकटयन् श्री**पार्श्वनाथा**म्बुदः,
कल्याणानि च कल्मषाणि जगतां पुष्णातु मुष्णातु च ॥६॥
प्रोत्सर्पद्विमलप्रभाभरपयोरङ्गत्तरङ्गाकुले,
शोणश्रीनखपङ्कजैः कवचिते यत्पादपद्माकरे ।
भावानम्रसुरेशमौलिमणयः शाफर्यमाबिभ्रते,
विश्वोत्तंसितशासनो दलयतादंहांसि **वीरः** स वः ॥७॥
सप्ताङ्गैरिव नैगमादिकनयैः प्राप्ताः प्रतिष्ठां परां,
शुद्धध्यानविधानदन्तयुगलक्षुण्णोरुकर्माचलाः ।
विश्वामोदविधायिदानसुभगाः सत्कीर्तिशुण्डाभृतः,
श्रीमन्तो **जिनकुञ्जरा** भवभृतां भिन्दन्तु भावद्विषः ॥८॥
गाङ्गेयाभरणस्थमञ्जुलमणीरोचिस्तरङ्गावली-
दूरापास्तसमस्तनम्रजनतामोहान्धकारोत्करान् ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत्र श्रीजिनमन्दिरेषु जगतामीशान् जिनाधीश्वरान्,
दृष्ट्वा के न सरीसृजत्यनुदिनं पुण्यामृतैः पारणम् ॥९॥
सद्दानोन्नतपाणयोऽथ विलसच्छीलाम्बुजन्मालय-
स्तप्तद्वादशभेदभिन्नतपसो भावापनीतांहसः ।
अर्हच्छासनभासनैकनिपुणाः कारुण्यपण्यापणाः,
श्राद्धा यत्र वसन्ति सुन्दरतरानुष्ठानबद्धादराः ॥१०॥
श्रीमद्वन्द्यपदाम्बुजन्मजरजःपुञ्जप्रपञ्चानिश-
प्रत्यानीतविभूतिवैभवपराभूताऽलकाविभ्रमे ।
उच्चैरुच्छ्रितमन्दिरे गतदरे न्यायेन्दिरासुन्दरे,
तस्मिन् **सिद्धपुरे** पुरेऽतिविपुले सत्पत्तनाग्रेसरे ॥११॥
यद्गुणान् गणनातीतान्, गणयेत् को विचक्षणः ।
रत्नाकरस्थरत्नानि, यद्वा सङ्ख्याति कः पुमान् ॥१२॥
यत् क्षमायाः क्षमाप्येषा, क्षमते नोपमानताम् ।
मेरोरौपम्यमन्ये किं, भजन्ते भुवि पर्वताः ॥१३॥
येषां चित्तं चारुकारुण्यवित्तं, येषां वाणी पापभाषाम्बुशाणी ।
येषां कायः सत्क्रियाभिर्व्यपायः, शश्वद्येषां किं न वर्ण्यं समेषाम् ॥१४॥
यद्देशनावाक् शिशिराऽपि चित्रं, सन्तापयेद्रागमुखान् विपक्षान् ।
चन्द्रप्रभाह्लादकरापि यद्वा, प्रद्वेष्टि कोकप्रकरान् सदापि ॥१५॥
हृदालवाले विपुले यदीये, तथोरुवैराग्यतरुः प्रवृद्धः ।
पुण्यक्रियाचारमणीचकाढ्यः, फलैर्यथेष्टैः फलिता(तो)ऽचिरेण ॥१६॥
द्रव्यादिके रम्यतमेऽपि येषां, भवेन्न कश्चित् प्रतिबन्धलेशः ।
श्रीखण्डखण्डैरधिवासितेऽपि, यथा स्थितिर्नो मलयेऽनिलानाम् ॥१७॥
निरीहता येषु नितान्तकान्ता, संलीनता चापि जगत्प्रशस्या ।
ऐदंयुगीनर्षिजनैरसाध्यं, तथा तपो येषु वरीवृतीति ॥१८॥
यत्पादपद्मद्वयसेवनेन, शिष्या गुणौघाननघान् श्रयन्ते ।
पुमर्थयुग्माश्रयणेन मर्त्याः, सुखान्यखण्डानि यथा लभन्ते ॥१९॥
अहह जगति येषां भाग्यसौभाग्यभङ्गी,
भवति खलु न केषां विस्मयस्मेरणाय ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यदनुदिनमुदारैरर्थ्यमानाऽपि पुम्भिः,
श्रयति पतितया यान् संयमश्रीरवश्यम् ॥२०॥
सकलभविकजन्तुस्फारहृत्पात्रसंस्थं,
सततमपहरन्ती स्नेहपूरं समन्तात् ।
भुवनभवनवृत्तीन् जीवमुख्यान् पदार्थान्,
प्रकटयति यदीया देशना दीपिकेव ॥२१॥
भवारण्ये पुण्येतरकथनपरानेकजनता-
वचोभ्रान्तान् भव्यान् जननमरणाघातचकितान् ।
क्षणात् स्वस्थान् कृत्वा वचनरचनैः शुद्धकरुणा-
परीता ये गृह्णन्त्युरुशिवपुरं सार्थपतिवत् ॥२२॥
तान् सूरिचक्रवरिवस्यपदाननेकै-स्तैस्तैर्गुणैरनुकृताद्ययुगप्रधानान् ।
ध्येयार्चनीयमहनीयसुनामधेयान्, **श्रीदेवसुन्दरगुरून्** गुरुभागधेयान् ॥२३॥
श्रीवन्द्यपादपदपङ्कजभक्तिसम्यग्-
व्यापारपावितमनोवचनाङ्गयोगैः ।
**श्रीसाधुरत्नगणिवाचक**सार्वभौमैः
साध्वादिभिश्च विनयात् परिशील्यमानान् ॥२४॥
वीतरागपदपङ्कजपूजा-सद्गुरुप्रणतिपावितकायाः ।
यत्र वावसति धार्मिकलोका, धर्मकर्मनिरता धनवन्तः ॥२५॥
मा गा रे चरटाग्रणीः क्षणमितः पश्चात् त्वमालोकय
प्राप्तः श्रीजिनराजदुर्धरभटो दत्तस्त्वदुन्मूलकः ।
यत्र श्रीजिनमन्दिरे प्रतिदिनं भेरीद्वयं दन्ध्वनत्
प्रातः सायमपीति भैरवरवैः क्षोभं विधत्ते कलेः ॥२६॥
कीर्त्तिपूरगुरुसौरभमल्ल्या, दुःषमोर्जितहतौ शितभल्ल्याः ।
अर्थिकामितविधौ सुखवल्ल्या-स्तत्पुरो विजय**भृज्झरिपल्ल्याः** ॥२७॥
पादपद्मयुगले रविसङ्ख्या-वर्त्तनवन्दनविधिं कृतपूर्वी ।
मूर्त्तिमद्विनयपङ्कजराज-त्कुड्मलाकृतिकरार्चितशीर्षः ॥२८॥
**शान्तिसुन्दरगणि**र्बुधराजी-मौलिरत्न**जयसुन्दर**मुख्यैः ।
षड्भिराप्तयतिभिः परियुक्तः, कार्यविज्ञपनमातनुतेऽथ ॥२९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

श्रीमद्देवगुरुप्रसादविशदप्रासादकोटिस्थितं,
सेवन्ते कुशलानिलाः प्रतिकलं मामत्र सत्रर्षिभिः ।
श्रीपूज्यैरपि सन्ततं स्वभविकोदन्तैः सुधाशीकरै-
रत्राऽऽप्तैरतिमेदुरीकृतिममी नेया विनेयाग्रहात् ॥३०॥

उदयगिरिशिरस्यापीडलीलां दधाने, तरुणतरणिबिम्बे धौतविश्वान्धकारे ।
**धनिवर-तिहुणा**ह्वारम्भनिर्माणरम्यं, **चरित**मिह सभायां वाच्यते **पार्श्व**नेतुः ॥३१॥

निजवचनविलासाभ्यासविख्यात**पेथा**-विहितविशदविश्रामास्तमत्खेदलेशम् ।
अथ भविकजनालीचित्तनालीकहर्षो-द्धरणकिरणनाली **वर्षपर्वा**ऽऽजगाम ॥३२॥
युग्मम् ॥

तत्राऽऽस्तिकाभ्यां व्यवहारि**चाम्पा-लाम्पा**ह्वयाभ्यां विहिते महौघे ।
साहाय्यदानाज्**जयसुन्दराणां**, बुधेश्वराणां वरवाचकानाम् ॥३३॥

प्रभावनाभिर्दशभिः शुभाभिः, **श्रीकल्पसूत्रं** नवसङ्ख्यवारैः ।
अवाच्यत त्रासितविघ्नभावं, सरीस्मरता देवगुरून् मयापि ॥३४॥ युग्मम् ॥

अत्रत्येन तथा पञ्च-देशग्रामागतेन च ।
भूयःपुण्यैर्निजं जन्म, श्रीसङ्घेन पवित्रितम् ॥३५॥

तथाहि-

केचिद् याचकयाचितार्थघटनां चक्रुर्यथेष्टं परे,
मोक्षश्रीवरमालिकामिह दधुर्मालां स्वकण्ठेऽर्हताम् ।
नाट्यं केऽप्यचरीकरुर्जिनपतेरग्रे प्रमोदोद्धुरा,
एके पौषधमादृताश्च कतिचिच्छीलं तपो भावनाम् ॥३६॥

विशिष्य-

**भीमभूपतिसुतातपो**लता-मेकिकां विहितपूर्विणोऽधुना ।
सर्वकार्यकरणं यथोचितं, दध्रतो मम सहायतां सदा ॥३७॥

**उत्तराध्ययन**पाठतत्परा, **नेमिनाथचरित**स्य लेखिनः ।
तन्वते स्म **जयसुन्दरा** बुधाः, सान्तरं विधिवदष्टमं तपः ॥३८॥ युग्मम् ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आचतुर्मासकादेका-न्तराद्यशनकारिणः ।
अनुष्ठानविधिं नित्यं, कारयन्तश्च योगिभिः ॥३९॥

**आवश्यक**मधीयमाना(मधीयाना?), गणयः **साधुवल्लभाः** ।
नवोपवासानातेनुः, पारणादनघाशयाः ॥४०॥ यामलम् ॥

**दमयन्तीतप**ओलिकां पुरा, कृतवन्तः कृतिलोकसत्तमाः ।
अधुना किल कल्पमादधु-र्यतिमुख्या गणि**साधुमूर्त्तयः** ॥४१॥

**देवसमुद्र**गणिर्गुणिमुख्यः, सान्तरमष्टममत्र चकार ।
**शालिचरित्र**मिमौ सुपवित्रं, वाचयते विबुधेशसमीपे ॥४२॥

**हर्षधीर**मुनिरुज्झितदोषो, वाक्हिर्भगवतीवरयोगान् ।
षष्ठपादभणनोद्यतचेता, औपवस्त्र(स्त)मकरोन्मुदिताशः ॥४३॥

**सुवाक्यशुद्ध्यध्ययन**-मधीया[नो] विशुद्धधीः ।
यथाशक्ति तपस्तेपे, क्षुल्लर्षि**हेमसुन्दरः** ॥४४॥

**फता-बादादयः** पञ्च, वञ्चकाः पापकर्मणाम् ।
अष्टमं स्पष्टयामासु-रास्तिकाः स्वस्तिभाजनम् ॥४५॥

**जइता-धाराप्रमुखाः**, षष्ठमकार्षुर्विशिष्टजनसाध्यम् ।
आसूत्रयँश्च सर्वेऽ-प्युपासकाः प्राय उपवासम् ॥४६॥

**कमली**र्विमलीकर्तु-मात्मनः कर्मकश्मलम् ।
त्रयोदशौपवस्त्रा(स्ता)णि, निर्ममौ पारणद्वयात् ॥४७॥

अष्टाहिकां चक्रतुरुद्यमाद् द्वे, श्राद्धे **सिरा-मोहिणि**देविनाम्न्यौ ।
विशुद्धभावातिशयाम्बुयोगाद्, विक्षेपयन्त्यौ निजपापपङ्कम् ॥४८॥

दशोपवासप्रतिमां वहन्त्यौ, **माल्ही**र्महासाहसिनी च **हांसूः** ।
वितेनतुर्वर्जितपापकृत्ये, अष्टोपवासानिह पारणेन ॥४९॥

संसारतारणतपोविधिवद्विधाय, **नीणूः** सदाचरणचारुरुचिश्च **वालूः** ।
पञ्चोपवासकृतिमातनुतश्च दक्षे, साक्षेपमुत्तमजिनोक्तपथे चरन्त्यौ ॥५०॥

**सारीः** पुण्यपरीपाक-दूरीकृतदरिद्रता ।
संसारतारणं कृत्वा, प्रान्ते कल्पमकल्पयत् ॥५१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रतिमाविंशतिस्थान-तपोऽनुष्ठानसादरा ।
**धारूः** पञ्चौपवस्त्रा(स्ता)णि, पौषधेन सहाऽकरोत् ॥५२॥

पञ्चोपवासीं चक्राते, पारणाच्छ्राविके उभे ।
कल्पं पञ्चदश श्राद्धा, निर्ममुर्धर्मकर्मठाः ॥५३॥

एक-द्व्युपवासकारिकाणां, न हि सङ्ख्याऽवगता विलोकिताऽपि ।
उपधानतपो दशप्रमाणा, उदवाक्षुर्वरभावनाभियुक्ताः ॥५४॥

**रत्नादेवी** सरीस्त्रष्टि, **दमयन्तीतपो**लताम् ।
अतप्यन्त तपश्चैवं, श्राविका अपरा अपि ॥५५॥

इत्येवं वार्षिकं पर्व, सर्वपर्वोत्तरस्थिति ।
इहाऽजनि जनानन्द-कन्दकन्दलनाम्बुदः ॥५६॥

इति स्वरूपं सकलं प्रतीक्ष्य-पादैरिहत्यं हृदयेऽवधार्य ।
तत्रत्यमप्यत्र महाप्रमोद-सम्पादनाय प्रसभं प्रसाद्यम् ॥५७॥

तत्र- माधुर्यधुर्याणि वचांसि येषां, विभाव्य कर्णाभरणीभवन्ति ।
वैराग्यगङ्गोदकमज्जनेन, न के जनाः स्वं तरसा पुनन्ति ॥५८॥

विश्वोत्तरैर्गुणगणैर्विनयार्जवाद्यै-र्ये रञ्जयन्ति पृथिवीवलयं समन्तात् ।
क्षीरामृतेन्दुकरगौररुचा सहैव, कीर्त्या तथा धवलयन्ति तदेव चित्रम् ॥५९॥

येषां वाङ्मयवारिधौ निरवधौ हेतूपपत्तिस्फुरत्-
कल्लोलावलिसङ्कुले भयकरे नानाप्रयोगाभ्रमैः ।
विस्रस्ते सधरोत्तरप्रवहणे दुर्वादिनः सार्थपा,
वादासून् क्षणतस्त्यजन्ति विगलत्काष्ठा हताशा हहा ॥६०॥

पुण्यक्रियाकरजकौशलबद्धरङ्गान्,
सौभाग्यभाग्यकमलाकमलायताङ्गान् ।
**श्रीसाधुरत्नगणि**वाचकपुङ्गवाँस्तान्,
वन्दे त्रिसन्ध्यमपि वन्दनया बृहत्या ॥६१॥

गुरुबालमनोऽनुवर्त्तन-प्रवणान् स्वान्यसमाधिदायिनः ।
**गुणवर्द्धन**संज्ञितान् गणीन्, गणनातीतगुणैरधिष्ठितान् ॥६२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वन्द्यपादपदभक्तिपटिष्ठान्, दुष्कराद्भुततपोविधिनिष्ठान् ।
आगमस्मरणपावितचित्तान्, **साधुसागर**गणीन् गुणिवित्तान् ॥६३॥

श्रीगच्छातुच्छसत्कृत्य-निर्माणप्रवणाशयान् ।
वैराग्यातिशयप्रौढान्, **धर्मवल्लभ**संयतान् ॥६४॥

गुरुकृत्यविधानसादरं, श्रा(श्रु)तपाथोनिधिमाथमन्दरम् ।
प्रतिवादिघटाकृतोत्तरं, **जिनरत्ना**ह्वगणिं गुणोत्तरम् ॥६५॥

वैयावृत्त्यादिसत्कृत्य-निरतानृजुताञ्चितान् ।
**धर्मप्रमोद**सत्साधून्, सौजन्याधारतां गतान् ॥६६॥

सुरगुरुमपि बुद्ध्या निर्जयन्तं भजन्तं, विनयमखिललोकप्रीणकं क्षीणदोषम् ।
असमतमकवित्वाभ्यासवान् मौलिमौलिं, मुनिमुदधिगभीरं **वीरयुक्शेखरा**ख्यम् ॥६७॥

अतिकर्कशतर्कलक्षणा-गममुख्याद्भुतशास्त्रदक्षिणम् ।
**गुणमूर्त्ति**मुनिं महामतिं, विनयाद्यासमसद्गुणाश्रितम् ॥६८॥

तप्यमानतपोराशि-प्लोषिताशुभकर्मणः ।
**पुण्यवर्द्धन**निर्ग्रन्थान्, शुद्धध्यानपरायणान् ॥६९॥

बालकालादपि व्यूढ-संयमश्रीमहाभरम् ।
**हर्षनन्दन**नामानं, मुनिं मुनिजनाग्रिमम् ॥७०॥

द्विधापि लक्षणाभ्यास-विध्याहितमनोलयम् ।
**हर्षचन्द्र**मुनिं चन्द्र-गौरकीर्त्तिविराजितम् ॥७१॥

वर्यचातुर्यसौन्दर्य-मुख्यानेकगुणालयम् ।
**वीररत्न**मुनिं हृद्य-विद्यादानोद्यताशयम् ॥७२॥

इति सद्गुणसंयतोत्तमान्, सदनुष्ठानविधानसत्तमान् ।
प्रणमान्य(म्य)नुनौमि च क्रमा-दतिभक्त्या नतमस्तकोऽहकम् ॥७३॥

सुधामधुरया वाचा, चारुचन्द्रिकया किल ।
प्रबोधयन्ति या नित्यं, भव्यकैरवकाननम् ॥७४॥

ऐदंयुगीनलोकाना-मसाध्यैर्दुस्तपैस्तपैः ।
अध्यायाध्यापनैश्चाऽपि, स्वकर्म श्लथयन्ति याः ॥७५॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रवर्त्तिनीस्ता **अभय-चूला**ह्वा गुणबन्धुराः ।
अनुवन्दे प्रमोदेन, संयतीरपरा अपि ॥७६॥
अर्हद्देवाराधनातत्पराणां, दीनानाथोद्धारबद्धादराणाम् ।
अग्रे भूत्वा कुर्वतां तीर्थयात्रां, श्रेयःश्रीणां श्रीगुरूपास्तिभाजाम् ॥७७॥
समस्तसुश्रावकपुङ्गवानां, सुश्राविकाणामपि सद्धिधीनाम् ।
श्रीवन्द्यपादैरभिधानपूर्वं, प्रसादनीयो मम धर्मलाभः ॥७८॥
इहत्या :-
गुणिनो **जयसुन्दरा** बुधा, गणिमुख्या अपि **साधुवल्लभाः** ।
यतयोऽप्यथ **साधुमूर्त्तयो**, गुणिदेवादिसमुद्रसाधवः ॥७९॥
**हर्षधीर**मुनिरार्जवशाली, **हेमसुन्दर**मुनिर्मुनिरत्नम् ।
नंनमत्यनुदिनं प्रभुपादान्, भूरिभक्तिपरिभावितचित्ताः ॥८०॥
श्रावकाः श्राविकाश्चापि, धर्मकर्मपरायणाः ।
श्रीपूज्यपादपद्मेषु, भजन्ते भृङ्गतां भृशम् ॥८१॥
आश्वयुजासितपक्षे, पञ्चम्या वासरे च शशिवारे ।
शिष्याणुना मयेयं, लिखिता विज्ञप्तिरिति भद्रम् ॥८२॥

—x—

( ४ )

## श्रीगुणरत्नसूरिं प्रति प्रेषितस्य पत्रस्यांऽशः

अनन्तज्ञानदृक्सौख्य-वीर्यसंवलितात्मने ।
आनन्दाद्वैतदानैक-निपुणायाऽर्हते नमः ॥१॥
श्रियः कान्ते वैरिव्रजविजयशङ्कामुपगते,
निरुध्यारीँल्लक्षं सपदि जयलक्ष्मीं परिणयन् ।
यदूनामानन्दं दददभिमतं रातु भवतां,
**शिवासूनुः** स्वामी त्रिभुवनशिवाधाननिपुणः ॥२॥
शाखाः किं सुरशाखिनामुपगताः पञ्चात्मतां सन्धिता,
एता विश्वसुरद्रुमं प्रभुममुं पञ्चाक्षतां याचितुम् ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यन्मूर्तेरुपरि स्फटाः स्फुटरुचः पञ्चातिचञ्चत्तमाः,
प्रेक्ष्येत्यूहमवाप्नुवन्ति कवयः सिद्ध्यै सुपार्श्वः स वः ॥३॥

यत्राऽर्हतां सद्मसु पद्मबन्धु-बिम्बोदये स्फूर्जति तूर्यनादे ।
श्राद्धा जिनार्चादिषु सज्जयन्तो, विभान्ति वीरा इव धर्मभर्तुः ॥४॥

दान्तेन्द्रियात्मलयलीनमनोमुनीन्द्रान्, नन्तुं पतिव्रतिविभूषितऋद्धलोके ।
शालासु यत्र सततं दिवसोदयेषु, शृङ्गारशान्तरसयोर्ननु सङ्गमः स्यात् ॥५॥

स्तोतुमन्तर्मनो येषां, गुणा गुणिभिराहिताः ।
विस्मेरयन्तोऽनन्तत्वं, विस्मयायैव केवलम् ॥६॥

मानसं मानसं येषा-मानशे राजहंसवत् ।
शमसंवेगनिर्वेदा-नुकम्पादिगुणव्रजैः ॥७॥

वचांसि येषां सकलाङ्गिरक्षा-दक्षाणि शिक्ष्याणि विपश्चितां च ।
विशन्ति कर्णाध्वनि मानसानि, भिन्दन्ति चित्राय न कस्य कस्य ॥८॥

शारीरमानसिकदुःखपरम्पराप्ति-हेतुप्रमादविजयक्रिययाऽभ्युपेतम् ।
जीवातुतां निखिलजन्तुगणस्य बिभ्रद् येषां वपुर्विजयते तपएकपात्रम् ॥९॥

येषामुपन्यासमहासमुद्रे, कल्लोलमालाकुलतां दधाने ।
कस्को विशत्याश्रिततर्कविद्या-बृहत्तरीको ननु धीवरोऽपि ॥१०॥

जिनागमाभ्यासवशाप्ततत्त्वा-तत्त्वार्थसार्थाधिगतात्मतत्त्वाः ।
वैराग्यरङ्गोज्झितसर्वसङ्गा, ये संयमात् सिद्धिमदूरयन्ति ॥११॥

येषां विहारेण महीतलेस्मिँ-स्तमस्ततिः क्षिप्यत एव सर्वा ।
उद्यद्गभस्तेर्द्युतिमण्डलेन, रात्रिर्यथाक्रान्तजगज्जनाऽपि ॥१२॥

ये दुष्षमाकालविशेषगर्जद्-बलप्रमादाजगरब्रुवेण ।
जेगिल्यमानं जिनकल्पिकानां, वृत्तं स्वशिष्यैः परिपालयन्ति ॥१३॥

व्यातन्वाना प्रबलकुमतोत्सर्पिपङ्कापनोदं,
भूयोभूयः सुजनकमलान् स्मेरयन्ती च येषाम् ।
पुण्या कीर्त्तिः शरदिव जगन्निर्मलीकारहेतुः,
कांस्कान्विश्वेऽद्भुततमगुणान् हंसवत् खेलयेन्न ॥१४॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

परिक्रामद्ग्रामा श्रवणसुखकृद्रागरचना-
प्रगल्भप्रागल्भ्योपचितवचनोल्लासितरसा ।
परिस्फूर्जत्सौवान्यतमसमयार्थव्यतिकरा
यदीया व्याख्यागीर्भवति न मुदे कस्य विदुषः ॥१५॥

येषां क्षीरसुधासुधाकर[कर]व्रातावदातान् गुणान्
स्तोतुं वाक्पतिरप्यनीश्वरमतिस्तत्का कथाऽस्मादृशाम् ।
यद्वा यत्र न जाङ्घिकोऽपि जलधौ कल्लोलमालाकुले
गन्तुं न क्षमते गतेरिह भवेद्युक्तैर्विपा_श किम्(?) ॥१६॥

अस्माकं भवसन्ततिभ्रमसमुद्भूतांहउच्छेदिनी
यन्नामस्मरणैव हर्षनिवहं विश्राणयत्यत्र यम् ।
तस्यांऽशोऽपि सुदुर्ल्लभः खलु शचीभर्तुः पुरा यत्पदो-
पास्यासौख्यरसानुभूतिविरहात् साक्षाददृष्टेरपि ॥१७॥

क्षुभ्यल्लोभनभस्वति भ्रमभृदज्ञानाम्बुपूरप्लवे
भूयो जन्मजरावियोगमरणादङ्कोच्छलद्यादसि ।
दारिद्र्याभिनवाभिमानशिखरिव्राताकुले जाज्वलत्-
क्रोधोर्वानलभीषणेऽधममतद्वीपालिदुःसञ्चरे ॥१८॥

संसारोरुपयोनिधौ भवभृतो निर्मज्जनोन्मज्जन(ना?)त्
क्लेशावेशविशङ्कुलीकृतमनोवाक्कायचेष्टाजुषः ।
कारुण्यार्द्रमनस्तयाऽऽगमवचोबेडासहस्रान् क्षणात्
सज्जीकृत्य नयन्ति ये जिनमताप्लाव्यन्तरीपे वरे ॥१९॥

मूलद्रव्यमिहाऽर्घ्यं पूर्वमनघं सम्यक्त्वमादाप्य च
श्राद्धद्वादशभेदभिन्ननियमानादेयवस्तून्य_न् ।
श्रीचारित्रगुणाविधेयगणनभ्राजिष्णुरत्नर्द्धिकान्
निर्मायाऽधिनिवासयन्ति ससुखं श्रीसिद्धिपुर्यां पुनः ॥२०॥
त्रिभिर्विशेषकम् ॥

सम्यग्नामतपस्क्रियागमरुचिश्रद्धाननिःसङ्गता-
नैयत्यादिगुणग्रहेण महिमा येषां य उज्जृम्भते ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नाऽस्यांऽशोऽप्यपरेषु सूरिषु लभामभ्येति यद्वा श _ द्
भानोर्यद् द्युतिमण्डलं स्फुरति किं खद्योतपोतेऽपि तत् ॥२१॥

श्रीवज्रादनु भूयसो गणभृतोऽनाचन्द्रकालायुषः
सेवं सेवमधीश्वरान्नवनवान् मन्येऽतिखिन्ना सती ।
प्राच्यप्राच्यतमात्मनायकगुणभ्राजोऽतिजैवातृकान्
यानासाद्य युगप्रधानपदवी सुस्थाऽभवत् साम्प्रतम् ॥२२॥

येषां व्याख्या कर्णमार्गे प्रवेशं, कुर्वाणैवाऽज्ञानमाशु क्षिणोति ।
यद्वा भानो रश्मयः पूर्वभूभृत्-तुङ्गे संस्थाः किं तमो नोत्क्षिपन्ति ॥२३॥

पापीयोभस्मराशिग्रहजिनमतगात्यन्तपीडावनाशाने(विनाशा)-
ऽनेहःश्यामाऽन्यपक्षोदितचरणगुणश्वेतकेतुप्रभाभिः ।
उत्कल्लोलायमाने त्रिभुवनवितते यद्यशःक्षीरसिन्धौ,
भिन्नानूचानशब्दा दधति परिपतन्मत्स्यलीलायितानि ॥२४॥

ऐन्द्रहस्तिरजताद्रिपूर्णिमा-चन्द्रसान्द्ररुचिसोदरत्विषम् ।
स्तोतुमेकमपि यद्गुणं यथा-वस्थितं कविरपि क्षमेत कः ॥२५॥

यत्पदद्वयमनन्यमनस्का, आश्रयन्ति किल ये सुविनेयाः ।
ते चतुर्विधसमाधिमुपेता नाऽऽदधुश्चतुरतादिगुणान् कान् ॥२६॥

येषां पदाम्भोजयुगस्य वनं(?), वनं श्रयन्तो भवमार्गगामिनः ।
सावद्यकर्मोष्मभरं विहाय के-ऽपूर्वं समाधिं तव भूविरे(न बभूविरे?)तराम्
॥२७॥

भाग्यं येषामैहिकामुष्मिकाना-मिष्टार्थानां साधकं स्यात् कथं न ।
उच्चैर्गोत्राग्रेसरो यत्सहायी-भावं दध्यात् पुण्यकर्मोदयोऽयम् ॥२८॥

येषामुपन्यासरणाङ्गणे स्फुरत्-प्रयोगगर्जद्भटकोटिसङ्कुले ।
हेतूपपत्तीषुभरे प्रसर्पति, त्रासं श्रयेयुः परवादिनो न के ॥२९॥

महीमहेलाहृदयस्थलान्तरं, विहारहारेण विभूष्य येऽनिशम् ।
_ _ _ समग्रावयवान् विभूषय-न्त्यहो मुनीशोऽपि यशोविभूषणैः ॥३०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मन्ये मनोभवमतीव रुषा महेशे, भस्मक्रियां नयति तद्वपुराश्रयस्था ।
सौभाग्यभङ्गि _ _ _ यद्विरहोपतप्ता, येषां शरीरकमलं शरणीचकार ॥३१॥

तानर्च्य प्रणिधेयवन्द्यचरणानाराधनीयोत्तम-
श्री(?)ध्यानध्येयसुनामधेयमहिमा मेयानणीयोगुणान् ।
गेया भङ्गुरभागधेयकमलालीलाविलासालयान्,
पूज्य**श्रीगुणरत्नसूरि**सुगुरून् सूरीश्वराधीश्वरान् ॥३२॥

(एतावन्मात्रमेव लिखितमिदं पत्रम्)

—x—

(५)

## श्रीसाधुरत्नसूरिं प्रति प्रेषितस्य विज्ञप्तिपत्रस्यांऽशः

सदध्यात्माधीतिप्रवणमतिभिर्योऽतिपुरुषैः
स्वचित्तान्तर्ध्यानं कथमपि समानीयत इह ।
स्फुलिङ्गायन्तेऽमी शशिदिनकृतो यस्य च पुर-
स्तदद्वैतं ज्योतिर्जयति किमपीवादिनिधनम् ॥१॥

भास्वन्मङ्गलमौक्तिकोद्भवकृते भद्रेभकुम्भस्थलं
भूयोऽभङ्गुरवैभवाद्भुततरं भव्याङ्गिदत्ताभयम् ।
पादाम्भोजमबाभजुर्भगवतो यस्य भूमीभुजः,
स श्रीमान्**ऋषभ**प्रभुर्भवभिदे स्तात् सम्पदे भाविनाम् ॥२॥

राजद्राज्यसुखश्रियं च परमज्ञानात्मकं च श्रियं,
स्वस्मिन् कर्तुमिवाप्रमाणविलसत्स्नेहे क्षमां बिभ्रतः ।
यस्याज्ञामुकुटं सुरासुरनराधीशा दधुर्मौलिना
**श्रीशान्ति**र्जगतांपतिस्त्रिजगतां भिन्तात् स तान्तेस्ततिम् ॥३॥

योऽत्याक्षीदुत्पलाक्षीमवनिपतिसुतां योगिनाथं यमाहु-
र्येनाक्षीयन्त कर्माण्यहमहमिकयेन्द्रा नमस्यन्ति यस्मै ।
यस्मादापुर्गणेन्द्रास्त्रितयमुरुपदं यस्य रूपं न गम्यं
यस्मिन्नासीदनन्तं सुखमखिलसतां श्रेयसे स्तात् स **नेमिः** ॥४॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्फारोदारहिरण्मयीफणततिप्राज्योल्लसन्मञ्जरी-
पुञ्जोत्सङ्गितमञ्जुलामलफलश्रेणीफलालीश्रितः ।
प्रत्यग्मेचककान्तिसञ्चयलुलत्पत्रावलीकः सतां
**श्रीपार्श्वः** करहेटक(के?)सुरतरुस्तन्तन्यतां चिन्तितम् ॥५॥

व्याख्याभूमिजुषः सुवर्णवपुषः पुण्यक्रियायाः पुरो-
मिथ्याज्ञानमुषः समापितरुषः कैवल्यमासेदुषः ।
**श्रीवीर**स्य जयन्ति तेऽतनुरुचो दन्तांशवोऽप्यग्रगा
येऽभूवन् परिषद्गतामरवधूकण्ठेषु भूषाकृतः ॥६॥

लब्ध्वा केवलसम्पदं सपदि येष्वारुह्य सिंहासनं,
कुर्वाणेषु दिशां चतुष्टयमभिव्याख्यानमग्लानितः ।
विश्वं जन्मजरादिपीडितममी दृष्ट्वा किमुच्चैः स्थित-
स्त्रातुं वावदतीत्यतर्क्यत जनैस्ते पान्तु वः श्रीजिनाः ॥७॥

निर्निदानमृषिदानमुज्ज्वलं, शीलमुत्तमतपोऽतिदुस्तपम् ।
भावनां च शुचिमाप्य यज्जनो, नेच्छति स्वरपि धर्मलालसः ॥८॥

गाम्भीर्योद्धुरतानिराकृतजलापूर्णाम्बुमुग्गर्जिते
भेरीशङ्खमृदङ्गमुख्यविविधातोद्यारवे स्फूर्जति ।
यत्रर्द्ध्या जिनमन्दिरे प्रतिदिनं स्नात्राद्यनेकोत्सवान्,
कुर्वत्स्वास्तिकपुङ्गवेषु विजयं श्रीधर्म आपद्यते ॥९॥

तत्राऽत्यद्भुतसम्पदाजितसुरद्रङ्गे खगङ्गोज्ज्वले,
तुङ्गानेकगृहाकुले गतखले न्यायेन्दिरासुन्दरे ।
गेयामेयसुभागधेयकलितश्रीवन्द्यपादद्वय-
धूल्या पूतमहीतले पृथु[तरे] **श्रीदेलवाडापुरे** ॥१०॥

प्रत्यक्षं पश्यन्नपि यद्गुणजातं जनो न मातुमलम् ।
किमु खलु कश्चिन्नभसो ग्रहचक्रं प्रकटमपि मिनुयात् ॥११॥

यैः शमसंयममुख्यैर्गुणैः समो दृश्यते न परसूरिः ।
स्यात् सुरमणिना तुल्यं महिमाभी रत्नमपरं किम् ॥१२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आरुह्य चारित्रमहातुरङ्गं, तपःकृपाणं च करे विधाय ।
क्षमाभृतो ये समितिप्रवीणाश्छिन्दन्ति भावारिचमूमशेषाम् ॥१३॥

अभङ्गसौभाग्यसुभाग्यरङ्गद्रलोच्चयाढ्येऽपि पुरे यदीये ।
प्रमादचौरो न विशेत् कदापि, जाग्रत्क्रियारक्षिकरक्षितो नु ॥१४॥

उत्तुङ्गवैराग्यतरङ्गभङ्गी-चङ्गीकृते यद्हृदयाम्बुराशौ ।
स्थितिं विधातुः पुरुषोत्तमस्य, चित्रं न वैकुण्ठतया प्रसिद्धिः ॥१५॥

आसंसारं त्रिभुवनजना बुद्धिमन्तः स्तुवन्तः
सम्यग्येषां गुणकणमपि स्तोतुमीशा न केऽपि ।
तेषां स्तोत्रे कथमधिकृतः स्यामने _ जडात्मा,
यद्वा यत्तद्वदति भृतकः सुप्रसन्नस्य भर्तुः ॥१६॥

तत्त्वातत्त्वप्रकटनरुचेर्मोहधूमं क्षिपन्त्या
येषां चञ्चज्जिनमतकथादीपिकायाः प्रकाशे ।
_ _ _ _ न्धतमसभरेऽप्युद्गतेऽत्र प्रकामं(?)
मोक्षाध्वानं भविकनिकराः सञ्चरन्ते सुखेन ॥१७॥

द्राक्षा क्षुद्रा भवति विरसा चेक्षुरास्वाद्यपाका
ऽ--जाड्यं द्रढयतितरां चन्दनं नन्दनं वा ।
एवं भावा मधुरविशिराः सन्ति सर्वे सदोषा,
निर्दोषाया उपमितिरतो नास्ति येषां नु वाचः ॥१८॥

मन्ये येषां हृदयमुकुरे शुद्धधीभूमिपृष्ठे,
_ _ न स्वं निरुपमतमाकारमालोकयन्ती ।
हर्षोल्लासात् समजनि चतूरूपभृच्चेदिदं नो,
तत्के - यतुवरचतूरूपतो दृश्यतेऽत्र ॥१९॥

त्रैलोक्यश्रीशरणचरणद्वन्द्वमाराध्य येषां
नाऽऽदीयन्ते विनयनिपुणैः कानि कानि श्रुतानि ।
नानार _ _ _ _ _ भुवं रोहणोर्वीधरस्य
स्पृष्ट्वा कांस्कान् तु सुरमणीन् गृह्णते भाग्यवन्तः ॥२०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

येषां विश्वे विमलयशसां जायमाने विहारे,
_ _ _ _ _ यमपि जवाद्वादिनः स्वावलेपम् ।
यद्वा _ _ _ _ रति वने गन्धभाजो गजस्या-
ऽऽशेश्रीयन्ते कियदिह मदं दन्तिनः क्षुद्रदेहाः ॥२१॥

श्रेयोलक्ष्मीगृहजिनमताम्भोजमृज्जृम्भयन्तः,
सीमातीतप्रसृमरतमःस्तोममुज्जासयन्तः ।
विश्वानन्दप्रकटनपटुस्वोदयेनोद्धरन्ते
सच्चक्राणां मुदमनुदिनं ये जगन्मित्रवृत्ताः ॥२२॥

शङ्खक्षोदामृतरसपयोवारिधिक्षीरराका
श्वेतांशूद्यत्किरणविशदैर्यद्गुणैर्विश्ववन्द्यैः ।
वायं वायं कु _ _ मतयो वर्यकाव्यार्यतुर्या,
कीर्त्तिप्रोतं ददति सुभगीभूतये दिग्धुनीभ्यः ॥२३॥

संशीशांसितखड्गकोटिसदृशं येषां चरित्रं वचो-
दुर्भेदान _ _ भिदन्मतिरमा दर्भाङ्कुरैः स्पर्द्धिनी ।
देदीपत्तपउत्करेण वपुषश्चाऽतिप्रचण्डा द्युति-
श्चित्रं ये प्रथमं तथापि हि सतां रेखां लभन्ते सदा ॥२४॥

ये संसारमहार्णवात् पृथुतराभोगात्तरन्तः स्वयं
सम्यग्(क्)श्रीजिनराजदर्शितलसद्धर्मक्रियाबेडया ।
भव्यौघान्ननु तारयन्ति तु निजैर्वाग्वैभवैरेव यत्
तच्चित्रं महदत्र नूनमथवा किं वर्ण्यते तादृशाम् ॥२५॥

वर्यौदार्येण कल्पावनिरुहमुरुणा धुर्यधैर्येण मेरुं
गाम्भीर्येणापि वारांनिधिमृभुविभुं भूयसा वैभवेन ।
निर्भर्त्स्य लम्भयन्तेऽप्रतिमगुणगणाधारतामागता ये
प्रोत्सर्पत्प्रौढिमानं जगति जिनमतं साम्प्रतं प्रापयन्ति ॥२६॥

तान् गेयाद्भुतभागधेयकमलान् गाङ्गेयगौरद्युतीन्
ध्येयाङ्गीकृतनामधेयजपकृत्प्रत्ताप्रमेयोदयान् ।
पूज्याराध्यतमोत्तमानणुगुणश्रेणीमणीरोहणान्
श्रीसूरीश्वर**साधुरत्न**सुगुरून् वन्द्यक्रमाम्भोरुहान् ॥२७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रचुरविनयवृत्तिप्रीणितानेकदक्षं, प्रवरमतिविवेकभ्राजमानैर्यतीन्द्रैः ।
हिमकरकिरणालीशुभ्रचातुर्यमुख्या-द्भुतगुणगणसम्पत्संयतीभिश्च सेव्यान् ॥२८॥

सुवर्णकुम्भामलसारकेषु, यस्मिन् विहारेष्वतिसौम्यमूर्त्तीन् ।
दृष्ट्वाऽर्हतां वावचतीति मिथ्या-दृशोऽपि देवा अनुवीतरागम् ॥२९॥

प्रवरदानदयानयपद्धति-प्रवरणप्रवणाधिपपालितात् ।
सुविहिताश्रितलोकसमाकुलात्, **कपिलपाटक**नामपुरात्ततः ॥३०॥

विधेयाश्रवशिष्याणुः, **शान्तिसुन्दर**संज्ञितः ।
साधुसाधुगुणाधारः, साधुत्रयसमन्वितः ॥३१॥

ज्यायसा वन्दनेनोच्चैरभिवन्द्य यथाविधि ।
शिरस्यञ्जलिमाधाय, मुदा विज्ञपयत्यदः ॥३२॥

शुद्धाचारविनेयवारविलसद्वात्सल्यनीरोच्छलत्-
कल्लोले गुरुमानसेऽतिविपुले क्रीडां समातन्वतः ।
यानालोक्य विलासलालसमनाश्चारित्रलक्ष्मीर्गुणैः
स्वैः शुद्धोभयपक्षिणो द्रढयति क्रीडामरालानिव ॥३३॥

संवेगवैराग्यविवेकवैयावृत्त्यर्जुतासाम्यनिरीहताद्याः ।
येषां गुणा दृष्टिपथं प्रयाता, ऋषीन् पुराणान् स्मृतिमानयन्ति ॥३४॥

कलिन्दिका येषु यथाऽकलङ्का लीलां विधत्ते न तथा परेषु ।
यथाऽलिमाला कमले विलासं, कुर्यात् तथा नो हयमारकेषु ॥३५॥

यद् वाङ्मयाम्भोनिधिमध्यभागे, हेतूपपत्तिप्रचुरोर्मिमाले ।
स्फुरत्प्रयोगाब्भ्रमभिन्नकाष्ठा, दुर्वादिनो हा ! सहसा ब्रुडन्ति ॥३६॥

येषु क्षमाभृत्सु समुद्गतोऽयं, तपोविवस्वानतिचण्डतेजाः ।
मिथ्यात्विघूकैरपि हर्षता स्वं, दृशा समालोकयतीति चित्रम् ॥३७॥

सुधास्वर्धुनीलोलकल्लोलमाला, सुधाधामधामाधरीकारिवर्णा ।
गुणाली यदीया मरालीव लीला-विलासं विधत्ते सतां मानसेषु ॥३८॥

यासु यथा विनयगुणः प्रकर्षमायाति नापरत्र तथा ।
ज्यौत्स्नी यद्वज्ज्योत्स्नां वहति तथान्यापि किं रात्रिः ॥३९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सुसूत्रसिद्धान्तमहार्थसारं, स्वकण्ठपीठीलुठितं विधाय ।
यथेहितं शास्त्रभरं ददाना, गिरः समा या गणयन्ति शिष्टाः ॥४०॥

(एतावन्मात्रमेव लिखितमिदं पत्रम् ।)

—x—

( ६ )

## सिद्धपुरस्थ-श्रीदेवसुन्दरसूरिं प्रति प्रेषितस्य विज्ञप्तिपत्रस्यांऽशः

श्रेयःश्रियं **श्रीऋषभो** जिनेन्दुर्दद्यादमन्दां स मुदं जनानाम् ।
नमन्नरेन्द्रामरराजमौलि-मन्दारमालार्चितपादपीठः ॥१॥

भव्यारविन्दनिकरान्तरबद्धशश्व-दज्ञानषट्पदविमोचकगोविलासः ।
मोहान्धकारमभितो जगतः क्षिपन् वः, **श्रीवासुपूज्य**सविता शिवतातिरस्तु ॥२॥

यन्नामामृतपानतस्तनुमतां विश्वाटवीचारिणां
रोगाभोगभराः श्रमा इव समाजग्मुः क्षयं सत्वरम् ।
वेल्लत्केवलमञ्जरीभरधरो माकन्दवत् प्राणिनां
स **श्रीशान्ति**जिनेश्वरो वितनुतां कल्याणमालामलम् ॥३॥

योऽरौत्सील्लक्षसङ्ख्यं रिपुबलमनमन् यं सुरेन्द्रा वितन्द्रा
येनाऽरक्ष्यन्त जीवास्त्रिभुवनगुरुणा राजपुत्र्यैक्षि यस्मै ।
यस्मात् कर्माणि नेशुर्दधति च हृदये योगिनो यस्य रूपं
यस्मिंस्तीर्थेशलक्ष्मीर्विलसति सततं सोऽवतान्**नेमिनाथः** ॥४॥

ऊर्ध्वस्थास्नुर्भुजङ्गाधिपतिरुरुफणाडम्बरं व्यादधान-
स्त्रैलोक्यैकप्रभुत्वं प्रकटतरमहो यस्य भर्तुर्व्यनक्ति ।
स **श्रीवामेयदेव**स्त्रिभुवनभवनोत्सङ्गवर्त्तिष्णुभूयो-
भावव्रातावलोकानवरतविलसत्केवलः शं विदध्यात् ॥५॥

तपो महावीरमधीनयित्वा, तमोमहावीरबलं य आस ।
भव्यान् महावीररथः स पाया-द्दयान्**महावीर**जिनाधिनाथः ॥६॥

ते भवन्तु भविनां जिननाथाः, सिद्धये सकलसिद्धिसनाथाः ।
यान्नतामरनरानभिनम्य, स्याज्जनो न विपदामभिगम्यः ॥७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत्राद्भुतश्रीजिनराजसद्म-पद्माकरेऽर्हत्प्रतिमाम्बुजाढ्ये ।
अमेयसद्ध्यानरसं निपीय, वितृष्णभावं भविनो भजन्ति ॥८॥

तस्मिन् सिद्धपुरे प्रसिद्धनगरे श्रीवन्द्यपादाम्बुरुड्-
धूलीपूतमहीतलेऽतिविपुलश्रीजैनदेवालये ।
श्राद्धश्रेणिविधीयमानविविधप्रोद्दामपुण्यक्रिया-
कू _ _ _ विभूतिवैभवभरात्यर्थाभिभूतप्रभे ॥९॥

येषां ज्ञानं सत्क्रियाभिः प्रधानं, येषां ध्यानं सर्वसम्पन्निदानम् ।
येषां यानं हंसयानोपमानं, येषां दानं विश्वदानासमानम् ॥१०॥

हृदयं करुणारसाकुलं, वचनं चन्दनबिन्दुशीतलम् ।
वरसंयमसम्पदः पदं, वपुरप्यस्ति यदीयमन्वहम् ॥११॥

यद्देशनाविष्णुपदी नदीव-द्भव्यश्रवःस्रोतसि सञ्चरन्ती ।
अनन्तपापच्छिदुरा दुरापा-स्तपाप्मभिर्जन्तुभिरेकशोऽपि ॥१२॥

कीर्त्तिर्यदीया शरदभ्रशुभ्रा, बम्भ्रम्यमाणा जगतीतलेऽस्मिन् ।
सतश्चकोरान् हिमरुक्प्रभेव, प्रीणाति दुष्कीर्त्तिनिदाघतप्तान् ॥१३॥

येषां जिह्वा रङ्गभूमौ नटीव-न्नृत्यन्ती श्रीशारदासुन्दराङ्गी ।
तास्ताः काश्चिद्रूपभङ्गीर्विधत्ते, रङ्गाद्विज्ञैर्याः शिरो धूनयन्ति ॥१४॥

यद्विज्ञभावं ननु कश्चनापि, स्तोतुं प्रभुर्नैव कवीश्वरोऽपि ।
किं मेरुभूभृद्गरिमाणमुच्चै-र्धर्तुं क्षमः कोऽपि महाचलोऽपि ॥१५॥

कलिन्दिका येषु यथाऽकलङ्का-लीलां विधत्ते न तथा परेषु ।
यथा मराली किल मानसान्ता, रंरम्यते नैव तथा परत्र ॥१६॥

यथा यथा ये विहरन्ति भूमौ, तथा तथा मोहभरोऽस्तमेति ।
यथा यथाऽभ्रे समुदेति भानु-स्तथा तथा वा तिमिरं प्रयाति ॥१७॥

धर्मं धरन्तोऽपि गुणाभिरामं, क्षमाभरं बाभजतोऽपि सर्वम् ।
नयान् समस्ताननुसर्त्र्तोऽपि, चित्रं परं ये यतिनां धुरीणाः ॥१८॥

आस्तां समस्ता अपरे गुणौघा, जेगीय्यमाना विबुधैरशेषैः ।
एकं निरीहत्वमपीह येषां, पूर्वर्षितां भूवलये व्यनक्ति ॥१९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यच्चित्ताम्बरमण्डपेऽतिविलसज्ज्ञानार्कलीलास्पदे
सत्कृत्याध्यवसायभासुरतरोडुव्यूहचाराकुले ।
प्रोद्दामासमसंयमोद्यममहाधामाभिरामस्थिति-
वैराग्येन्दुरुदेति शाश्वततमःसङ्घातसङ्घातकृत् ॥२०॥

औदार्येण सुरद्रुमानथ महाधैर्येण हेमाचलं,
गाम्भीर्येण पयोनिधिं विमलया बुद्ध्याऽथ वाचस्पतिम् ।
अक्षय्यार्थतया निधिं शुचिरुचा कीर्त्या भुजङ्गाधिपं,
स्फूर्जद्वैभवसम्पदा सुरपतिं तेजोभरैः पावकम् ॥२१॥

इत्येकैकगुणेन विश्वविदितान् सर्वान् पदार्थान् भृशं
न्यक्कुर्वद्भिरपूर्ववृत्तविदितैर्यैर्नाऽऽपि लोके तुला ।
पूज्याऽभङ्गुरभागधेयसुभगान् श्रीसूरिचक्रेश्वरान्,
श्रीश्रीश्रीश्रितदेवसुन्दरगुरूंस्तान् विश्ववन्द्यक्रमान् ॥२२॥ युग्मम् ॥

पूर्वपुण्यपरिपाकसम्भव-द्वन्द्वभक्तिविशदीकृतात्मभिः ।
साधुभिर्विनयवृत्तिशालिभिः, संयतीभिरपि सेवितक्रमान् ॥२३॥

यत्र देवालयः शाला, चकास्तः स्वस्तिभाजनम् ।
आस्तिकश्रेणिसङ्कीर्णा-**द्वाऊलूपुरत**स्ततः ॥२४॥

कृतिकर्मविधिं कृत्वा, विधेयः **शान्तिसुन्दरः** ।
शिरस्यञ्जलिमाधाय, मुदा विज्ञपयत्यदः ॥२५॥

(एतावन्मात्रमेव लिखितमिदं पत्रम् ।)

—x—

मृगोऽपि यस्योभयथापि चक्रिणः, क्रमद्वयं भक्तिवशादुपाश्रितः ।
अवापि(स?)वान् श्रीभृतराजमण्डलं, स **शान्तिनाथो**ऽद्भुतभूतयेऽस्तु वः ॥१॥

यः संश्रयन् वृषमत्यन्तं, प्रीणन् गिरिङ्वं मुहुः ।
**श्रीत्र्यम्बकनरेश**! त्वंस त्र्यम्बिकापतिवज्जयम् ॥२॥

आकर्णाकृष्टचापान्, वैरिमहान् सङ्गरे निराकृत्य ।
त्वमुपात्तराज्यसम्पत्, **त्र्यम्बकराजा**ऽर्जुन इवासि ॥३॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कीर्त्या जगत्पावकशश्वदुल्लसन्महामहःपावकदग्धविद्विषन् ।
पृथ्वीममुं **पावकदुर्ग**भूपतो, भू _ व _ _ बकवृत्तिवक्त्रतः ॥४॥
न्याय्यं मार्गमुपास्स्व पण्डितजनप्रीतिं पुषाण प्रजाः
प्रीणीहि प्रतिपालयोत्तमनृपाचारं श्रयोदारताम् ।
दुष्टान् शाधि विधेहि निर्मलयशांस्येधि प्रतिज्ञापरो-
धर्माबाधनमातनु क्षितिपते! स्वाज्ञां च विस्तारय ॥५॥

पं. शान्तिसुन्दरगणिविबुधपुरन्दराणां लेखकाव्यानि कियन्ति ॥

—x—

महाराजा मानसिंह पुस्तक प्रकाश शोध केन्द्र
जोधपुर
नं. ७४९

Jain Educationa International    For Personal and Private Use Only    www.jainelibrary.org

(७)

## श्रीविजयसेनसूरिं प्रति
## उपाध्याय-श्रीसत्यसौभाग्यस्य लेख:

स्वस्तिश्रीर्भजति स्म यस्य वदनाम्भोजन्म विश्वेशितु-
मत्वोन्निद्रमहर्निशं तरलतादोषापनोदेच्छया ।
विज्ञानार्कनिभालितत्रिभुवनाभोगः स योगीश्वर-
ध्यातध्येयगुणावलिर्वितनुतात् श्रेयांसि भूयांसि वः ॥१॥

स्वस्तिश्रीर्वदनाम्बुजं भगवतः संप्राप्य यस्य प्रभोः,
सद्भ्रूमोहनवल्लिमोहितमतिश्चापल्यमुच्चैर्जहौ ।
तं निःशेषसुरासुराधिपगणाभ्यर्च्यक्रमाम्भोरुहं,
देवेन्द्रं भुवनस्थितिप्रकटनप्रौढप्रदीपं भजे ॥२॥

स्वस्तिश्रीः प्रसभं पुराणपुरुषं त्यक्त्वाऽऽलिलिङ्गाऽत्र यं,
गोपेन्द्रं तरुणद्युतिं तरुणिमोद्रेकेण रक्ता सती ।
वक्त्रं यस्य सुदृक् कुकम्ब च विरूपाक्षस्य सन्त्यज्य तद्,
गौरीशस्य स विघ्नवल्लिवलयं मथ्नातु दन्तीशवत् ॥३॥

यस्योच्चैरधरीकृतामरमणिस्मेरस्मयं विस्मयं,
माहात्म्यं प्रकटीचकार सकलं सम्प्राप्तसर्वश्रियः ।
अन्यत्राऽसदपि स्वयं त्रिजगति प्रौढोदयं व्याप्नुवत्,
तस्य ज्ञातसमस्तवस्तुनिकरस्याऽस्तु प्रसादो मयि ॥४॥

यस्योच्चैर्धवलीकृतत्रिभुवनाभोगे यशःस्फूर्जिते,
सङ्ख्यातीतगुणालयस्य शशभृद्धाम्नि प्रसर्पत्यलम् ।
क्वाऽऽयासि त्वमहो विटेति पुरभिद्भ्रान्त्या मुकुन्दप्रिया,
वक्त्याश्लेषसमाकुलाऽपि रभसात् कृष्णं वलक्षद्युतिम् ॥५॥

लोकप्रीतिलतावितानविलसद्धाराधराभाधरं,
जाग्रद्विक्रमभृत्प्रभावनिचितब्रह्माण्डभाण्डोदरम् ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नित्योद्योतनिरस्तसर्वतिमिरज्ञानार्कपूर्वाचलं,
श्रीमत्**शान्तिजिना**धिराजमतुलं भक्त्याऽभिनोनूय तम् ॥६॥

यत्रोच्चैः करिराजदानसलिलप्रध्वस्तधूलीव्रजं,
रंहोधावितुरङ्गवक्त्रविगलत्फेनाप्तपुष्पोत्करम् ।
प्रासादध्वजधोरणीपटकुटीप्रच्छादितार्कप्रभं,
लक्ष्मीकेलिकलाकृते विरचितं भूमण्डलं भासते ॥७॥

चञ्चच्चन्द्रमरीचिकम्बितशिरश्चन्द्राश्मसंवर्मित-
प्रासादप्रकरस्रवत्शुचिपयोधाराभिषिक्तक्षितौ ।
यत्राऽर्हत्प्रतिमापुरस्सरलसद्धूपोत्थधूमावली-
व्याप्तव्योम्नि घनात्ययेऽपि शिखिनो नृत्यन्ति मेघभ्रमात् ॥८॥

जित्वा स्वर्गपुरीमुरीकृतरमाभोगं समीरोल्लसत्-
प्रासादप्रकरध्वजाञ्चलमिषाद् यन्नृत्यतीवोच्चकैः ।
प्रत्योकः स्फुटवाद्यमानमुरजध्वानोत्थितोत्साहतो,
नृत्ये नृत्यकृतां भवेद् विरभसा रङ्गे मृदङ्गश्रुतेः ॥९॥

यत्रोच्चैरम्यहर्म्यध्वजसिचयचयच्छन्नमार्तण्डबिम्बे,
नैदाघं घर्मदुःखं न हि भवति मनागप्यलं भाग्यभाजाम् ।
लोकानामात्मलक्ष्मीललिततुलितसद्यक्षनाथप्रभाणां,
मध्याह्नेऽपि प्रतापप्रबलदिनकरे गच्छतां राजमार्गे ॥१०॥

धात्रीशेवधिकल्पतां गतवतो वप्रः समुद्रायते,
यस्याऽभ्रंलिहभित्तिभासुरवपुर्भूयः प्रवेशायनः ।
रूप्यस्वर्णमणिप्रवालनिचितस्याऽऽनन्दसम्पादिनो,
दृष्ट्याऽपीह दिदृक्षुलोकनयनस्तम्भैकहेतोर्द्रुतम् ॥११॥

प्रातर्बालगभस्तिमण्डलमिदं पूर्वाद्रिशृङ्गे लुलद्,
यत्राऽभ्रस्फटिकप्रसाधितलसद्धामावलीभित्तिषु ।
निर्माति प्रतिबिम्बलम्बि गगने रक्ताम्बुजन्मभ्रमं,
चित्तेषु क्षणमेकमद्भुतधियां सत्तार्किकाणामपि ॥१२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत्र श्रीसदने दुरन्तपरिधेर्वप्रस्य भास्वद्द्युते-
र्नानावर्णमणिप्रसाधितलसद्भित्तेः प्रतिच्छन्दतः ।
नानावर्णपयोभृताऽस्ति परिखा वृत्ता समन्ताद् भृशं,
स्वर्गीशस्य धनुर्द्वयीव पतिता व्योम्नोऽवनौ योजिता ॥१३॥

रङ्गद्योगिजनावलीकृतलसद्धूपोत्थधूमाभ्रभृत्,
सन्मार्दङ्गिकवाद्यमानमुर[ज] _ _ _ _ _ गर्जितः ।
रत्नाष्टापददीप्यदङ्गललनारोचिस्तडिद्भासुरः,
प्रत्योकः प्रतिघस्रमेव जलदो यत्रोच्चकैर्दृश्यते ॥१४॥

यस्मिन् वासनिकेतनस्य दिविषद्धामद्युतिध्वंसिनो,
भास्वद्रत्नविनिर्मिते प्रतिदिशं भित्तिप्रदेशे स्फुटम् ।
वीक्ष्य स्वप्रतिबिम्बमल्पितशचीज्योतिः परस्त्रीभ्रमात्,
काचित् कोपवशात् प्रिया स्वरमणं पादेन हन्ति स्वयम् ॥१५॥

यस्मिंश्च प्रतिबिम्बितं मरकतस्फूर्जच्छिलाभिर्भृशं,
बद्धे वेश्मतले कुचद्वयरसा _ _ _ _ _ _ ।
गुणं समीक्ष्य पतितं गल्लाऽऽद्गात् मु
लातुं क्षिप्तकराः प्रभुग्ननखरा हस्यन्त आलीजनैः ॥१६॥

शोभां दर्शयितुं निजां सुरपुरीदर्पप्रथानाशिनीं,
वातान्दोलितहर्म्यकेतुपटलैराहूतदिग्दन्तिनि ।
विश्वव्यापियशःश्रुतेर्वसतये शक्रेण बद्धस्पृहे,
तत्र श्रीमति पूज्यपादचरणन्यासाङ्कविभ्राजिनि ॥१७॥

प्रत्यद्रिप्रभवेन्दिरापरिणयं तोयेश्वराखण्डलौ,
यत्राऽस्तं व्रजदर्यमोद्यदमृतज्योतिःस्फुरद्दम्भतः ।
कुम्भाभ्यामभिषिञ्चतो जलभरैः पूर्वापरोदन्वतो-
**धारार्द्रिं** प्रतिपूर्णिमं तत इहाऽधोऽम्भोभृता खातिका ॥१८॥

सूर्याचन्द्रमसौ यस्मि-न्नस्तोदयकृतत्वरौ ।
धाराद्रेः कुण्डलायेते, शीर्षौ कौ मौलिमालिनः ॥१९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत्रोच्चैः शिखराग्रसंस्थितवटः सस्यस्फुटाम्रश्रिया-
कीर्णो वृत्ततरः सनिर्झरजलो धारागिरिर्भासते ।
पत्युः सङ्गवशात् प्रसूतसुयशःसूनोः क्षरत्क्षीरभृत्,
पाण्डुः श्याममुखोऽपरः स्तन इवाऽपाचीमहीसुभ्रुवः ॥२०॥

तस्माद् **देवगिरेः** समस्तजगतीसीमन्तिनीभालतो,
लोलभ्रूनयनोपमाविरहितश्रीप्राप्तशोभाभरात् ।
तर्जन्या स्फुटकीर्तिभासुरपुरव्रातं स्वकीयैर्गुणै-
र्नित्यं तर्जयतः पुरात् प्रतिदिनं प्रासाददण्डोपधेः ॥२१॥

उत्सुकमनोऽभिरामो, विनयावनताङ्गशालिधौरेयः ।
करकुड्मलोपलक्षित-ललाटपट्टाभिरामश्रीः ॥२२॥

भूरेणुतिलकितालिक-भासुरकान्तिः प्रमोदमेदुरितः ।
भक्तिप्रकर्षसम्भव-पुलकाञ्चितसकलतनुयष्टिः ॥२३॥

द्व्यणुकसमवायिकारण-सदृशः शिष्येषु **सत्यसौभाग्यः** ।
सोल्लासं सोत्कण्ठं, सप्रणयं सानुनयमेवम् ॥२४॥

द्विगुणितवैशेषित(क)मत-भावपदार्थप्रमैर्मुदाऽऽवर्तैः ।
प्रणिपत्य सृजति विधिवद्, विज्ञप्तिं प्रश्रयोपेताम् ॥२५॥

प्रातः प्रभाकरेऽथो, हरिद्वधूनां स्वयं मुदा रक्ते ।
मण्डयतीव मुखानि, स्वस्य करैः कुङ्कुमाभोगैः ॥२६॥

भुक्तवति स्वकरमणे, निश्यपरां पद्मिनी रुषा रक्ता ।
भृङ्गीषु द्यू(दू?)तीष्विव, निनदन्तीष्वनुनयन्तीषु ॥२७॥

अन्तर्भ्रमदलिशब्दैः, पूत्कुर्वन्तीषु कुमुदिनीकान्तम् ।
निर्जित्य कुमुदिनीषु, व्रध्नेन विडम्ब्यमानासु ॥२८॥

स्त्रीविश्वासात् किं किं, कष्टं न स्याद् बलोद्धतेऽपीति ।
पादै रविणा ध्वान्ते, प्रहण्यमाने त्रियामायाः ॥२९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

याऽष्टाशीतिसहस्री-युतलक्षद्वयमितोरुपदभृदपि ।
चलनवियुक्ता तस्यां, **भगवत्यां** वाच्यमानायाम् ॥३०॥

शास्त्राध्ययनाध्यापन-योगोद्वहनादि सत्क्रियाकाण्डम् ।
लक्षीकृतापवर्गे, यतिवर्गे कुर्वति प्रौढम् ॥३१॥

साधर्मिकप्रकरसत्कृतियुक्तपोषै-
मालाधिरोपणमहःप्रथितोपधानैः ।
तुर्यव्रतोच्चरणनन्दिमहोत्सवौघैः,
सम्यक्त्वसुन्दरगृहिव्रतपौषधैश्च ॥३२॥

_ _ _ _ गतिपथं सुकृतैककृत्ये,
सद्भावरङ्गिहृदयैरिह नीयमाने ।
यद् विघ्नमण्डलमुपैति नितान्तमस्तं,
तत् तातपादचरणस्मरणप्रभावः ॥३३॥

किञ्च-

साकं चातककूजितेन सकलं व्याप्नोति गर्जिर्जगत्,
सार्द्धं भोगिमनोरथैः प्रतिदिनं वृद्धिं प्रयान्त्यम्बुदाः ।
शुष्यन्ति प्रसभं जवासकगणाः सत्रा वियुक्तैर्जनै-
स्तापाः शान्तिमयन्ति यत्र च समं कान्ताभिमानग्रहैः ॥३४॥

तत्र प्रावृषि शान्तचातकतृषि प्रच्छादितार्कत्विषि,
प्रौढश्रि प्रतिवत्सरं भवति यत् प्राप्तोदयं पर्वसु ।
धर्मक्षोणिभुजङ्गकौतुककलारम्भागृहं सर्वदा,
दत्ताशीरभयोपलब्धिपटुभिस्तिर्यग्भिरप्युन्मुखैः ॥३५॥

यस्मिन् धर्मनरेश्वर-साम्राज्ये विघ्नसिन्धुरविपक्षः ।
कल्पोऽनल्पप्रभया, गन्धद्विरदायते शश्वत् ॥३६॥

यस्य च सर्वसुखद्विप-वशीकृतावेकहस्तिपकसदृशः ।
मासक्षपणादितपो-ऽङ्कुशायते शश्वदतितीव्रम् ॥३७॥

यस्मिन् निर्वृतिदायिनि, तिर्यञ्चः पक्षिणश्च मोदन्ते ।
नृपशिक्षया प्रवादित-जीवदयापटहघोषेण ॥३८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सप्तदशभेदपूजा-विरचनमाविःकरोति यत्रोच्चैः ।
श्रेयःश्रीसंवननो-ल्बणौषधीकल्पतां शश्वत् ॥३९॥

यत्रेहितमर्थिभ्यो, ददतां लक्ष्मीवतां मुदा पञ्च ।
दक्षिणहस्ताङ्गुलयः, पञ्चसुपर्वद्रुमायन्ते ॥४०॥

जनसंघट्टात्त्रुट्य-न्मुक्ताहारैर्मृगीदृशां सङ्घः ।
वैराग्यादिव यत्र च, कल्पश्रवणात् परित्यक्तः ॥४१॥

यत्र व्याख्यानश्रुति-रणरणकान्मिलितलोकसंघट्टैः ।
पुंभिरपि स्वेदकणै-र्मुक्ताकञ्चुकधरैर्जातम् ॥४२॥

तत् सर्वपर्वगर्व-प्रद**माब्दिकपर्व** सततनिर्विघ्नम् ।
अजनिष्ट **तातपाद**-ध्येयध्यानानुभावेन ॥४३॥

किञ्च-

येषां वचनामृतरस-गततापभरैर्जनव्रजैः सम्यक् ।
अच्छिन्नचन्दनद्रु-र्मलयगिरिमण्डलं ब्रूते ॥४४॥

किमदोवदनस्पर्द्धां, निर्मातीत्युपहसद्भिरिन्दुरयम् ।
लोकैर्विलोक्यतेऽलं, दृष्ट्वाऽपि मुखं मुदा येषाम् ॥४५॥

येषां स्थैर्यश्रवणाद्, भूभारोद्वहनजातखेदमनाः ।
भोगीशः साहाय्यं, समीहते धीरचरितानाम् ॥४६॥

येषां यशःकदम्बक-निर्मलतामर्कसोदरः सम्यक् ।
लब्धुमिव देवनद्यां, स्नाति सदा धवलदेहोऽपि ॥४७॥

येषां गुणगणभारै-राक्रान्ताशेषवपुरिव महद्भिः ।
भोगीशः स्वशरीरं, चालयितुमनीश्वरः सम्यक् ॥४८॥

येषां कीर्तिं कुलटा-मिव सततं स्वैरमखिललोकानाम् ।
कण्ठाश्लेषं सृजती-मपि जगति सतीं वदन्ति बुधाः ॥४९॥

येषां रूपातिशयं, लक्षीकृत्याऽद्रिजाप्रमोदकृते ।
दिग्वासाः किमु कञ्चि-न्मन्त्रं साधयति शम्भुरसौ ॥५०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

येषामल्पितकल्प-द्रुम _ _ [कल्प]वागगोचरो महिमा ।
विबुधपदं नृणामपि, करस्य भूमौ ददानस्य ॥५१॥

कुब्जीकृतसुरगिरिभिः, स्वकीयगुणराशिना प्रसाद्या तैः ।
प्रीतिप्रसादपत्री, कृशेतरां मयि कृपां कृत्वा ॥५२॥

तैरुपवैणवमनुपम-भाग्यसमुद्रैः सदा कृपावद्भिः ।
श्रीतातैरवधार्या, प्रणतिश्च विनेयपरमाणोः ॥५३॥

किञ्च-

शिवसृष्टिं ध्यायन्तो, जगति जयन्तीह ये यथायोगाः ।
उपदिष्टदुःखसमुदय-मार्गनिरोधा यथा **बौद्धाः** ॥५४॥

तेषां निकटस्थानां, निजवचनातिशयरञ्जितनृपाणाम् ।
श्री**नन्दिविजय**वाचक-वृषभाणां वादिकुम्भिशरभाणाम् ॥५५॥ गीतिः ।

निजमतितुलितबृहस्पति-बुद्धीनां **लाभविजय**बुधानाम् ।
वैराग्यरङ्गरङ्ग-च्चित्तानां प्राज्ञरङ्ग**विजया**नाम् ॥५६॥ गीतिः ।

**शान्तिविजय**विबुधानां, विद्वद्वर**रामविजय**गणिराजाम् ।
तर्कवितर्कवशंवद-चित्तानां **रामविजय**बुधराजाम् ॥५७॥ गीतिः ।

गणि**पद्मविजय**नाम्नां, गणिसिन्धुर**कीर्तिविजया**नाम् ।
गणि**धीरविजय**नाम्नां, गणिबन्धुर**कमलविजया**नाम् ॥५८॥ उपगीतिः ॥

अन्येषां च यतीनां, प्रसादनीये प्रसादमाधाय ।
नत्यनुनती यथार्हं, श्रीमत्तातैः कृपावद्भिः ॥५९॥

शिशुसंनिधिसंस्थानाः, **कुंअरसौभाग्य**गणिमुख्याः ।
**वीराञ्चितसौभाग्या**-स्तथा च **कल्याणसौभाग्याः** ॥६०॥ उपगीतिः ॥
प्रणमन्ति भक्तिनम्राः, श्रीमत्तातक्रमाम्बुजद्वन्द्वम् ।
उपवैणवमामोद-प्रकर्षसम्पादनप्रकटम् ॥६१॥

अत्रत्यः सकलोऽपि, प्रणमति सङ्घस्त्रिसायमुरुभक्तिः ।
**श्रीतातपाद**पाद-द्वितयमतुल्यप्रभाभोगम् ॥६२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आश्विनासितपञ्चम्या-मादित्यजुषि मङ्गलम् ।
भवताद् गुरुपादाब्ज-स्मरणप्रभवोदयम् ॥६३॥

[बहारना भागे-]
उ. श्रीसत्यसौभाग्य ग. लेख

—x—

मुनीश्रीधुरन्धरविजयजी-सङ्ग्रहगत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ८ )

# राजधनपुरस्थित-श्रीविजयसेनसूरिं प्रति पं. श्रीमेरुविजयलिखितं विज्ञप्तिपत्रम्

स्वस्तिश्रियां सन्ततये स देवः, श्रीविश्वसेनक्षितिपालपुत्रः ।
प्रशान्तये सन्तततामसानां, त्रैलोक्यमध्येऽजनि यो मृगाङ्कः ॥१॥

जेता जगज्जैत्रयशोधरिष्णो-र्मदीयशत्रोः करिणां च शत्रोः ।
इति प्रहृष्टो हरिणीतनूजो सेवे यदीयं पदमङ्कदम्भात् ॥२॥

यत्सेवनेनाऽपि मृगीतनूजो, मृगीदृशामाप दृशा समत्वम् ।
वनेचरोऽपि प्रगुणैकधाम्ना(म्नां), न निष्फलाऽऽस्तां महतां हि सेवा ॥३॥

कस्तूरिका यद्वदनानिलेन, पराजिता यत्श(च्छ)रणं गता किम् ? ।
यस्याऽङ्कदम्भेन मृगेण साक-मितीव वक्तुं न हि मेऽस्ति दोषः ॥४॥

स्वस्तिश्रियो यद्वदनारविन्दे मत्तोऽधिका न्यूनतमा इतीव ।
विलोकितुं कैरविणीहृदीशो मित्रं मृगं प्रेषितवान् यदन्ते ॥५॥

एणीदृशामायतलोचनाभ्यां जितो(ता)ऽहमेनं हर मे कलङ्कम् ।
सा प्रेषयामास सुतं यदन्ते, यदङ्कदम्भादिति वक्तुकामा ॥६॥
अस्मादृशां दुर्दमदन्तिवैरिव्यधादितस्त्वं जहि भीतिमीशः(श!) ।
किं प्रेषयामास मृगी तनूजं विज्ञप्तु(?)कामेनि(ति) द्य(य)दङ्कदम्भात् ॥७॥

यत्पादसेवाजनितेन कर्मणा, लब्धं मृगेणाऽऽशु मृगाङ्कमण्डलम् ।
नो चेत् कुतस्ताविषवासिवाञ्छिते, तत्र स्थितिस्तस्य सुखाय सोऽस्तु ते ॥८॥

कुर्वन् विवादं तव लोचनाभ्यां पराभिभूतो हरिणीतनूजः ।
इतीव सेवारसिको बभूव, यदङ्कदम्भेन यदीयतीरे ॥९॥

स्वस्तिश्रियं न्यूनतमां मदीयां, यदाननेऽन्यूनतमां च दृष्ट्वा ।
आदातुमेतामिति कौमुदीशो मित्रं मृगं प्रेषितवान् यदन्ते ॥१०॥

सन्धिं विधातुं भवदाननेन, समं मृगं प्रेषितवान् मृगाङ्कः ।
स्वं सेवकं तेन जितः स तेन शिश्राय पादाम्बुजमङ्कदम्भात् ॥११॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गवेषितुं तच्छलमौषधीशो मुखान्न गन्धो मृगमात्मभृत्यम् ।
किं प्राहिणोदङ्कमिषात् कुरङ्गः संलक्ष्यते तेन यदंह्रिपीठे ॥१२॥

अपाकुरु त्वं जगदर्तिहर्ता, जगत्प्रसिद्धं स्वकुरङ्गनाम ।
विज्ञप्तिकां कर्त्तुमितीव यस्य, मृगं(गः) शि(सि)षेवे पदपद्मपीठम् ॥१३॥

स्वस्तिश्रियं यत्पदपद्मसङ्गं, वितन्वतीं वीक्ष्य कलातिरेकाम् ।
इतीव भेजे भगवन्तमङ्क-च्छलेन तां प्राप्तुमनाः कुरङ्गः ॥१४॥

कलङ्कमुक्तं कलयाऽभिरामं, विस्तारयन्तं कुमुदां प्रकाशम् ।
यथा द्वितीयोदितशर्वरीशं, प्रणम्य तं सर्वविदामधीशम् ॥१५॥

अथ नगरवर्णनम् –

पदे पदे यत्र वसन्ति लोकाः, सूर्यप्रकाशा इव रागभाजः ।
प्रबुद्धपद्मावलिराजमाना रेजे **पुरं राजधना**भिधानम् ॥१६॥

मित्रोदये प्रीतिमताः प्रधानां(ना) दोषागमे निर्मितबाढवैराः ।
पद्मानुरागाः सुविलक्षपक्षा वसन्ति कोका इव यत्र लोकाः ॥१७॥

अन्यूनराजोदयराजमानाः, समुद्रलीभां(लां) परिवर्द्धयन्तः ।
कृतप्रमोदाः कुमुरा वसन्ति, शशिप्रकाशा इव यत्र लोकाः ॥१८॥

अष्टापदालङ्कृतमध्यदेशाः सुवर्णगात्रोचितभूमिभागा(ः) ।
जम्बूच्चशाखा निवसन्ति जम्बु-द्वीपप्रदेशा इव यत्र लोकाः ॥१९॥

प्राप्तप्रसादाः सवितुर्नितान्त-निर्मापितैकक्रमकेलिभाजः ।
केलिं कलानां कलयन्ति नित्यं, द्विजेन्द्रबिम्बा इव यत्र लोकाः ॥२०॥

विस्तारयन्तो बहुदानधारां, भूमण्डले भद्रकजातिभाजः ।
स्वस्वामिनां शालिसुखं सृजन्तो, भान्ति द्विपेज्जा(न्द्रा) इव यत्र लोकाः ॥२१॥

प्रोद्भूतपुण्याङ्कुरपूरिताशाः, प्रधानसम्प्राप्तसमीहितार्थाः ।
प्रबर्हबर्हावलिभिर्महार्हा वसन्ति कल्पा इव यत्र लोकाः ॥२२॥

विशालशाखाः सवयःकलापाः, पर्युल्लसन्तः सुमनःसमूहैः ।
छायाभिरामाः सफलाः विपत्रा वसन्ति वृक्षा इव यत्र लोकाः ॥२३॥

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

विशेषिताभास्तिलकैर्विशेषैः, पर्युल्लसत्पत्रलताभिरामाः ।
छायातिमात्रं कलयन्ति यत्राऽऽरामा बहिर्मध्यगताश्च रामाः ॥२४॥

प्रशस्तशास्त्राध्ययनप्रवीण-व्यापारदक्षैर्गुरुभिर्वलक्षाः ।
परीतदेशा धनदप्रजाभिः स्वर्गश्रियं यत्र हसन्ति वासाः ॥२५॥

प्रभाभरैर्भूषितभूमिभागाः सच्चक्रचित्तेषु सुखं सृजन्तः ।
यत्रांऽशुहस्ता इव शक्तिमन्त-स्त्रस्तान्धकाः सज्जनसन्निवासाः ॥२६॥

लीलाविलासैर्विबुधव्रजानां कीर्णान्तरालाः सुरसालकल्पाः ।
बिभर्ति या काञ्चनपद्मवासां गिरेर्धरित्रीव सुधाशनानाम् ॥२७॥

प्रणुन्ननीरन्ध्रतमोवितानाः जगत्त्रयव्यापिघनप्रतापाः ।
सदोदयैर्वर्धितदीप्तिमन्तो वसन्ति हंसा इव यत्र लोकाः ॥२८॥

राजोदये प्रेम परं प्रपन्ना ध्वान्तद्विषा सख्यमसंसृजन्तः ।
कलानिपानेषु निबद्धचित्ता लोकाश्चकोरा इव यत्र सन्ति ॥२९॥

जैवातृकालङ्कृतमध्यभागा मुनीमहामङ्गलमित्रभाजः ।
कवीन्द्रभास्वद्गुरुराजमाना नभःप्रदेशा इव यत्र बोसाः (लोकाः) ॥३०॥

समीरधूतध्वजदण्डमण्डि-प्रोत्तुङ्गशृङ्गोल्लसदाप्तगेहैः ।
विभ्राजमानान्तरभूमिभागे महाजनानां स्थितिराजमाने ॥३१॥
श्रीतातपादद्वितयारविन्द-परागपूगैरभितः प्रपूते ।
सन्नीतिभूषाभरभूषितान्त-र्विश्वम्भरावल्लभाभि(?) तत्र ॥३२॥

ताताभिधानगुणगानवितानतान(?)-तिग्मांशुरश्मिहतशोककलोककोकात् ।
माहात्म्यभृद्**विजयदान**शमीन्द्रसिंह-प(पा)दारविन्दमकरन्दविभूष्यदेशात् ॥३३॥

श्री**विश्वसेन**धरणीरमणा**श्वसेन-सिद्धार्थभूपतनयालय**लीनलोकात् ।
अत्रस्तशास्त्रपठनप्रवणप्रयास-प्राकद्य(ट्य)भृत्प्रशमिवासितसाधुवासात् ॥३४॥

सौराज्यभाग्यभरभूषितभूरिदेश-भूमीसमागतसमस्तजनाभिरामात् ।
सद्वर्ण्यवस्तुविसरव्यवसायसार-लङ्कानुकारिनगराद् **वटपल्लि**काह्वात् ॥३५॥
॥ त्रिभिर्विशेषकम् ॥

सद्भक्तिनिर्भरभराभरणाभिभूष्य-भूषाविभूषिततमाङ्गसमप्रदेशः ।
हर्षप्रकर्षसरसीरुहिणीहृदीश-नव्यत्विषोन्मिषितमानसमध्यदेशः ॥३६॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भून्यस्तमस्तकतटीमुकुटीकृतैक-हस्ताम्बुजन्मयमलः प्रमदप्रकर्षः ।
पाथोजिनीप्रियतमप्रमितप्रणाम-रावर्त्तकैः प्रणयकेलिकृतप्रणामः ॥३७॥

नम्राङ्गभृद् विविधवर्णविचित्रचित्रै-रुट्टङ्किता पटुपटीमिव तन्तुवायः ।
विज्ञप्तिकां वितनुतेऽतनुमूर्खमुख्यः, प्रेष्याणु**मेरुविजयः** सनयस्तथाहि ॥३८॥

पाथोजिनीहसिततीरजलोचनानां, नीहारचारनयनाम्बुनिराकरिष्णौ ।
पूर्वाशिलोच्चयशिखाललनाललाट-पट्टे ललामकमलायितपद्मबन्धौ ॥३९॥

अम्भोजिनीहृदयनायककान्तकान्ति-बुद्धारविन्दनिलयाच्च विनिर्गतासु ।
रोलम्बसंहतिषु मञ्जुलमञ्जुगुञ्जद्-गुञ्जारवप्रथनतत्परमानसासु ॥४०॥

निःसीमविश्वसदनान्तरतिप्रसार-माप्तेषु सौरभभरेषु सरोरुहाणाम् ।
पाथोजिनीप्रियतमद्युतिमण्डलीभि-र्व्याप्तासु भूमिधनपद्धतिमेदिनीषु ॥४१॥

पत्नीमुखाम्बुजनिरीक्षणशिक्षितानां, पद्मप्रवालदलदानसुलालसाभिः ।
द्वन्द्वेषु कोकवयसां च विशेषितानां, सागत्यमात्मगृहिणीभिरमागतेषु(?) ॥४२॥

आमोदवृन्दजुषमम्बुजिनीं मराल-बाला इवाऽमलमुखाः कमलालिदानैः ।
सम्पादितप्रवरमानमहामहेभ्य-सभ्याः सभान्तरभुवं समुपेयिवांसः ॥४३॥

**श्राद्धप्रतिक्रमणपारगतोक्तिवृत्ति-व्याख्या** व्रतिप्रकृतिशास्त्रसुपाठना हि ।
श्राद्धीजनावलिसमेतसुधामि(मि)काणां, नित्योपधानवहनादि सुखोपकारि ॥४४॥

सानन्दनन्दिभवनादिभवान्तरारि-दुर्दान्तदन्तिदमनप्रवणप्रचारम् ।
इत्यादिकं सुकृतकर्म सधर्मकर्म निर्मर्म शर्म समजायत जायते च ॥४५॥

पाट्यागते सकलपर्वमणीयमाने पर्वाभिमानगिरिपक्षपवीयमाने ।
धर्मैकचित्तसदने सुकृतप्रचारे हर्षप्रकर्षजुषि वार्षिकपर्वसारे ॥४६॥

त्रैलोक्यलोकपरिकल्पितकल्पकल्प-**श्रीकल्पसू**त्रपरिवाचनमीप्सितश्रीः ।
श्रद्धालुभिर्विशदसप्तदशप्रकार-पूजाविधानमखिलाभयदालयेषु ॥४७॥

निःसीमजीवभयदाननिषेधहेतू-द्घोषप्रवीणपटहाहननं पुरान्तः ।
सर्वत्रनिर्मथिततैलिकचाक्रिकादि-निर्वर्तितप्रचुरकर्मभरप्रवृत्तिः ॥४८॥

द्युम्नादिदानकरणं वरयाचकानां, तेषां च गानमपि सर्वसभासमक्षम् ।
मिष्टान्नपानबहुमानसमानदानैः, सन्तोषणं सकलसङ्घजनव्रजानाम् ॥ ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मासा-ऽर्द्धमास-दशमा-ऽष्टक-षष्टकादि-नानाप्रकारतपसां तपनं नितान्तम् ।
निःशेषदोषविषपेषणनागमन्त्र-यात्राकृतिः सकलतीर्थकरालयेषु ॥५०॥
इत्यादि पर्वसुकृतैकसमस्तकृज्यं(त्यं?) प्रार्वतत प्रचुरभीतिविवर्जितं यत् ।
तत्राऽभवद् **विजयसेन**मुमुक्षुमुख्य-प्रख्याभिधानगणनं गुणवन्निदानम् ॥५१॥

अथ गुरुवर्णनम् –

श्रेयःश्रियां सततपङ्क्तिरिव स्फुरन्ती मूर्त्तिः सुधाशनलतेव समुल्लसन्ती ।
आपादिताभिमतशस्तसमस्तवस्तु-र्जीयादसौ **विजयसेन**शमीन्द्रचन्द्रः ॥५२॥

गृहे गृहेऽपि क्रमणैकशीलां, सन्तः सतीमाहुरमुष्य कीर्त्तिम् ।
प्राहुः परेषामपि मन्दिरान्त-रनिःसरन्तीमसतीं च कीर्त्तिम् ॥५३॥

गणीन्द्रकीर्त्तिर्गणिकेव मन्ये, साधारणा ते बहुवल्लभाऽपि ।
तथाऽपि सा शीलवतीति लोकै-रूचे यशः पुण्यनिबन्धनं हि ॥५४॥

यदीयपीयूषरसाभिषिक्त-कर्पूरपूरद्रवकान्तकीर्त्तिः ।
स्पर्द्धां दधानोऽजनि तारकेशो निधिः सुधानामपि तारकेशः ॥५५॥

मुनीन्द्र ! मन्ये भवदीयकीर्त्तिं, शीतामशीता(तां) द्विषतां च कीर्त्तिम् ।
न चेत् कथं सा भवतां च तेषां शुभाशुभानां जननी जनानाम् ॥५६॥

यथाऽप्यरामा मुनिरामकीर्त्ति-रानन्दयामास सतां मनांसि ।
रामाऽपि न त्वद्द्विषतां च कीर्त्ति-र्मन्यामहे चित्रमिदं महीयः ॥५७॥

यथाऽप्यकान्ता यतिकान्तकीर्त्तिः, सुखं सृजन्ती कृतिनां मनस्सु ।
कान्ताऽपि कीर्त्तिर्द्विषतां च नैवं, मन्ये महच्चित्रमिदं मुनीन्द्र ! ॥५८॥

सङ्गं सृजन्ती हृदयैः परेषां, सती तथाऽपीह निरीहकीर्त्तिः ।
कीर्त्तिर्द्विषामन्यहृदा निषङ्ग-मसन्दधानाऽप्यसती यतीश ! ॥५९॥

यदीयकीर्तिः सुरभीचकार मुखाम्बुजन्मानि सुदृग्जनानाम् ।
तत्स्पर्द्धयेव द्विषतां च कीर्त्ति-श्चक्रे तदास्यान्यसुगन्धभाञ्जि ॥६०॥

सर्वंसहामण्डलमासमुद्रं बभूव सौरभ्यभराभिरामम् ।
योगीन्द्रकीर्त्या जगदेकगत्या, विना त्वदीयद्विषतां मुखानि ॥६१॥

कीर्त्तिं व्रतीशध्वज ! तावकीना-मीशं श्रितामभ्रसरिच्छलेन ।
निरीक्ष्य तद्द्रोहधियेव काल-कूटच्छलात् तं द्विषतां च कीर्त्ति(:) ॥६२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्वस्तिश्रियां धाम सुरेन्द्रवामा-दृशाऽस्य नीतं न मनो विकारम् ।
चित्रं न तच्चेतसि चिन्तनीयं, निवेदितं येन नपुंसकं तत् ॥६३॥
न चित्तवृत्तिं भगवंस्त्वदीयां, विकारमार्गं सुदृशो नयन्ति ।
न चित्रमेतच्चलिताचलेन, किं मेरुमूर्द्धा मरुता व्यकम्पि ? ॥६४॥
ध्यानप्रवीणा तव चित्तवृत्ति-र्निवर्त्तिता न स्मितलोचनाभिः ।
चित्रं न तद् यद्र(द्) सुधियोऽपि लोके, दृशामतीतं न हि भेत्तुमीशाः ॥६५॥
तीक्ष्णैरतिस्मेरदृशां कटाक्षैः, शरैर्यदीयं न मनो विभिन्नम् ।
चिन्त्ये न चित्रं चतुरैः स्वचित्ते, यस्मादलक्षे(क्ष्ये) न विशन्ति बाणाः ॥६६॥
[सद्]ध्यानप्रस्थप्रवणं मनस्ते, विनाशिनं(तं) नाऽऽयतलोचनाभिः ।
चित्रं न तच्चेतसि चिन्तनीयं, कदापि नित्य(त्यं) न विनाशशालि ॥६७॥
मनस्त्वदीयं न भिदाञ्चकार चकोरदृग्लोचनलोहबाणैः ।
मन्ये मनस्तेन सरोजजेन, विनिर्ममे निर्ममवज्रसारैः ॥६८॥
निवेदितं वेदविदां वरेण्यै-र्यद् देहिनां हृत् परमाणुरूपम् ।
असूनृतं तत् तव मान्ति चित्ते, पूर्वेतराम्भोधिमिताः पदार्थाः ॥६९॥
विवर्जितं कामभरेण कामं, ददाति कामं हृदयं त्वदीयम् ।
संशीतिरेषा हृदये मदीये, दत्ते न यस्मादधनो धनानि ॥७०॥
स्थानं गुणानामिभसम्मिताना-मुक्तं मनस्तार्किकमौलिरत्नैः ।
न युक्तियुक्तं तदधीश! चेतः, स्थानं गुणानां गणनातिगानाम् ॥७१॥
सुधारस-स्फाटिकरत्नसार-भास्वन्मणी-दर्पणमण्डलेभ्यः ।
मन्ये मनः स्वच्छतरं त्वदीयं, यद् यत्र सङ्क्रामति वस्तुवारः ॥७२॥
एवं प्रवीणव्रजवर्ण्यमान-गुणौघमुक्ताफलनीरनाथैः ।
कप्पू(र्पू)र-पारी-मचकुन्द-कुन्द-शशिप्रभाजेतृयशःसनाथैः ॥७३॥
प्रोन्मादिवादिव्रजकुञ्जराह-ङ्कारप्रथाकुञ्चनसिंहनादैः ।
स्य(स)र्वसहावल्लभचक्रवाल-सम्भात(सभान्त?)रालप्रथितप्रवादैः ॥७४॥
नरेन्द्र-नागेन्द्र-सुरेन्द्रजेतृ-कन्दर्पदर्पक्षतिचू(च)न्द्रचूडैः ।
सन्नीतिरीतिस्थितिशर्वरीश-वधूसमुद्बोधनताम्रचूडैः ॥७५॥
जगत्त्रयव्यापिगुणप्रपञ्च-विधूतनिर्धौतगिरीशहासैः ।
व्यापल्लवव्यापलताप्रतान-प्रपञ्चसङ्कोचनचन्द्रहासैः ॥७६॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पानीयपूरप्रचितान्तराल-पयोधरव्यूहगभीरनादैः ।
विनम्रदेवेन्द्रनरेन्द्रमौलि-किरीटरत्नद्युतिधौतपादैः ॥७७॥
**श्रीतातपादैः** प्रहितं स्वदेह-बर्हाङ्गनैर्मल्यवचोमरीचि ।
प्रसत्तिपत्रामृतरश्मिबिम्बं समीहते चेटचकोरपोतः ॥७८॥ षड्भिः कुलकम् ॥

अपि च-

यत्रोत्तमाङ्गे कुरुते करं वः शिमुर्गत(?)श्रीरिव कामकुम्भम् ।
पुष्णाति पक्षः स मनोरथं मे, सरोजिनीनामिव वासरेशः ॥७९॥
यस्यां रुचां राशिरिवा सुहस्त(?)-मनुव्रजामि व्रतिवारणेन्द्र! ।
सन्तोषपोषं तनुते तिथिः सा स्वान्ते शिशोः सद्ममणीव ग्विहे(गेहे) ॥८०॥
पितुः समीपे निवसामि यत्र, गिरीन्द्रकुक्षाविव पञ्चवक्त्रः ।
स केलिकौतूहलमातनोति, वारः स्वचित्ते सरसीव पद्मम् ॥८१॥
संस्पर्श्यते तातपदारविन्द-रजः स्वशिष्येण निजालिकेन ।
तं वासरं चेतसि चिन्तयामि, प्रकाममाम्रद्रुमिवाऽन्यपुष्टः ॥८२॥
पश्यामि यस्मिन् भवदुक्तिचन्द्र-भासा सभाकैरविर्णीं स्मितास्याम् ।
स्वान्तस्थितं तं घटयामि यामं यमीव यामं जनितानुरागम् ॥८३॥
यस्मिन् निदेशं निदधामि मूर्ध्नि त्वदीयमुर्वीश इवाऽवतंसम् ।
मुहुर्मुहुर्मानसमध्यमग्रं कुर्वे मुहूर्त्तं तमलीव पद्मम् ॥८४॥
शृणोमि यस्यां पितृपादवाक्यं, कामं कलापीव पयोदनादम् ।
हृद्वर्त्तिनीं ता (तां) घटिकां करोमि, शावः सवित्रीमिव सातभाजम् ॥८५॥
पीयूषरश्मेरिव वारिराशे-र्वप्तुर्स(र्भ)वेद् वक्त्रनिरीक्षणं मे ।
ध्यायामि चित्तेऽवसरं तमेव, विन्ध्याद्रिभूमीमिव सामयोनिः ॥८६॥
यस्यां पितुः पादपयोजयुग्म-सेवाविलासैकमना भवामि ।
तां केलिवेलां हृदये स्मरामि, युवेव नीलोत्पलपत्रनेत्राम् ॥८७॥
यस्मिन् निषेवे भवदीयपादा-नकिञ्चनः स्वर्गसदामिव _ ।
शिशोः प्रकामं समयः समेति, सौभाग्यहेतुः स्वमिवाऽधनस्य ॥८८॥
वन्ध्यातनूजन्मनिभैः किमेभि-र्मनोरथैर्नुन्नवृर्ष(ष)स्य जन्तोः ।
एतद्विधाने गुरवः समर्थाः सिक्तौ पयोदा इव सिन्धुनेमेः ॥८९॥
बहूनि पुण्यान्यवनीतलेषु, यैर्लभ्यते भूमिभुजां विभूतिः ।
तद्दुर्लभं धर्मभवं सुकर्म, स(स्म)रामि सेवां शमिशेखराणाम् ॥९०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भवन्ति लोके सुकृतामि(नि) तानि, सम्प्राप्यते हस्तिहयादिसम्पत् ।
न जायते तत् सुकृतं सुलम्भं(भ्यं), भवत्पदोपास्तिमना भवामि ॥९१॥

कल्पद्रु-चिन्तामणि-कामकुम्भाः फलप्रदा यैः सुकृतानि तानि ।
तद्दुर्लभं भूवलयेषु भाग्यं, सत्कर्मणा मे तव संस्तवः स्यात् ॥९२॥

मनोभिलाषैरिव निर्धनस्य, किमेभिरानन्दमयैरहोभिः ।
यत्राऽपि नैव श्रवणावतंसी-करोमि वाक्यं व्रतिचारणानाम् ॥९३॥

कान्ताकदम्बैरनुगीयमानः समाप्नुते शर्म शिशुर्न तादृक् ।
**श्रीतातपाद**क्रमणौ कराभ्यां, सम्मार्जतो मे सुखमेति यादृग् ॥९४॥

विचित्रितैः[त्रचित्रैः] खचितासु पट्ट-शालासु तिष्ठन् न सुखं बिभर्ति ।
यादृग् सुखं वप्तृपदारविन्द-च्छायासु तिष्ठन् निहतातपासु ॥९५॥

सुवर्णपुष्पैश्च सिताभ्रपूरै-रभ्यर्चितोऽपि श्रियमेति नाऽर्भः ।
यादृग् श्रियं श्रीपितृपादरेणु-भरैर्ललाटे तिलकं दधानः ॥९६॥

न प्रौढिमा मे पृथुपादपीठो-परिस्थितस्याऽपि सभात(न्त)राले ।
पीठोपरिस्थस्य पितुः पुरस्तात् स्थितस्य यादृग् वसुधातलेषु ॥९७॥

किञ्च-

निशीथिनीनां हृदयाधिनेतु-र्लेखामिवालिश्चलकञ्चुकानाम् ।
सरोजसौरभ्यमलीव पत्रीं, समीहतेऽसौ पुनरेव देवः(वा) ॥९८॥

विन्ध्यप्रदेशानिव वारणेन्द्र-श्चकोरपोतः किरणानिवेन्दोः ।
पानीयवाहानिव बर्हिबालः, श्रीतातपादाननिशं स्मरामि ॥९९॥

निर्मोकसम्बन्धमिव द्विजिह्वो-ऽपराधसन्धिप्रकरं विमुञ्चन् ।
कुर्वन् ललाटे मुकुटं कराभ्यां, शिशुस्त्रिसायं तनुते प्रणामम् ॥१००॥

एषाऽञ्जनश्यामलवर्ण्यवर्णा हर्षप्रकर्षप्रदसाधुशब्दा ।
भवद्दृगम्भोरुहिणीममन्दामोदाय पटी(ट्वी?) मधुपी प्रयातु ॥१०१॥

समताकमलासङ्गम-कृष्णसमाः **कृष्णविजयगणि**मुकुटाः ।
जह्नुसुतासमसहजाः **सुसहजहर्षा** गणिप्रख्याः ॥१०२॥

ध्वनिगम्भीरिमनिर्जित-मेघध्वनि**मेघविजयगणी**न्दुवराः ।
वैयावृत्तिसुरङ्गा गणिकरिणो **रङ्गविजया**ह्वाः ॥१०३॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सुरगिरिबन्धुरधीरिम-धीरा **गणिवीरविजय**नामानः ।
नन्दितसज्जनमानसः(स-) सुनन्दयो **नन्दिविजया**ह्वाः ॥१०४॥

वरलब्धि**लब्धिविजया** गणयो **गणिशान्तिविजय**नामानः ।
वरमति**मतिविजया** स-द्विद्या **विद्यादिविजय**साधुवराः ॥१०५॥

सत्तेजस्**तेजविजया** मुनिमणयो रत्न-**रामविजया**श्च ।
राजोदय**राजविजया** **विवेकविजया**दयो यतिनः ॥१०६॥

इत्यादि वाचंयमकुञ्जरेन्द्रान्, वन्देऽनुवन्दे च यथानुयोगम् ।
श्रीतातपादक्रमपुण्डरीक-सेवारजस्तत्परचञ्चरीकान् ॥१०७॥

अत्रत्य**रायमल्ला** **गणयः** **शान्तिविजयवीरा**ख्याः ।
**भीमविजय-सीहविजयौ**, सहर्ष**हर्षादिविजय**मुनिः ॥१०८॥

इत्यादिकाः संयति-संयतिन्यः सद्भक्तिभूषाभरभूषिताङ्गाः ।
अहर्निशं श्रीगुरुपादपाद-पद्मप्रणामप्रवणा भवन्ति ॥१०९॥

इहत्यसङ्घः शमिशेखराणां, भक्त्या प्रणामं तनुते त्रिसायम् ।
वाचंयमक्षोणिधनाभिधानै-र्नमामि तीर्थाधिपतीनिहत्यान् ॥११०॥

मास्याश्विने दिग्प्रमिते दिने च, चन्द्रावदाते भृगुराजपुत्रे ।
विनिर्मितालङ्कृतिरम्यमूर्त्तिः पत्री हरस्त्रीव तनोतु भद्रम् ॥१११॥

॥ इति श्रीविजयसेनसूरिलेखः समाप्तः ॥ सं. १९७० चैत्र सुदि ११, वृस्यवार ॥

—x—

कान्तिविजय शास्त्रसंग्रह - वडोदरा
नं. २०९०

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ९-१० )

## श्रीमेघचन्द्रमुनेः पत्रद्वयम्

( १ )

### श्रीविजयसेनसूरिं प्रति प्रेषितं पत्रम्

श्रिये स वः **सप्तमतीर्थनेता**, यस्यांऽह्रियुग्मश्रयणादवाप ।
यः स्वस्तिको मङ्गलतामनर्घ्यां, सर्वासु सन्मङ्गलमालिकासु ॥१॥

रेजुः पञ्चफणा यस्य, शीर्षे पृथ्वीभुवः प्रभोः ।
मन्ये सुमतयः पञ्च, पञ्चाऽऽचारा इमेऽथवा ॥२॥

अष्टाभिर्भवसम्भवैर्नवनवस्नेहैकपाशैर्दृढं,
बद्धामिन्दुमुखीं विहाय तृणवद् राजीमतीमादरात् ।
दीक्षां क्षीणभवोऽभजच्छिववधूसंयोगसद्दूतिकां,
**शङ्खाङ्कः** स **शिवा**सुकुक्षिसरसीहंसः शिवायाऽस्तु नः ॥३॥

यस्मिन् दुष्टकलौ गताखिलमणीयन्त्रमन्त्रप्रभावे,
गोमांसाशनदुष्टमुद्गलदलोद्वासिताशेषदेशे ।
सर्वत्र प्रचुरप्रभावमहिमाविस्तारमाप्तस्तदा,
स श्री**पार्श्व**विभुर्जगत्त्रयजनानन्दकन्दाम्बुवाहः ॥४॥*

* * *

स्वस्तिश्रीः किलिकिञ्चिताद्भुतसुखान्यास्वादितुं स्वेच्छया,
श्रीमत्पार्श्वजिनेश्वरे प्रणयिनीभावं प्रपद्य स्वयम् ।
आशिष्टे(श्लिष्टा?) हरियोगवा(का?)तरतया क्षीरे पयोवत् तथा,
नाम्नोऽपि प्रवराक्षरावलिरलं जाता यथा तन्मयी ॥१॥

---

* इदं श्लोकचतुष्टयमनेनैव मुनिना लिखिते ३०तमे पत्रेऽप्यादौ समस्ति । अत्रस्थपञ्चम-श्लोकस्य आदौ 'स्वस्तिश्रीः' इत्युल्लेखं श्लोकस्य पुनः प्रथमक्रमाङ्कदानं च दृष्ट्वा संभाव्यते यत् पत्रमिदमित एव आरभ्यते ।आदौ श्लोकचतुष्टयं सङ्ग्रहार्थमेव लिखितं स्यादिति भाति ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रागल्भ्याभावभ(भा?)रावतमसविसरं ध्वंसमानो नितान्तं,
सम्यक्त्वत्व(क्तत्व?)प्रतीपोद्धतपतगगणं देदिहानः प्रकामम् ।
बिभ्राणः स्थैर्यमत्युत्कटमदनमरुत्पूरसंक्षोभितोऽपि,
स्फूर्जत्स्नेहप्रियोऽर्हंस्त्रिभुवनभवनं भूषयन् भासते यः ॥२॥
स्वस्तिश्रीभुवनेशितुर्जिनपतेर्जन्माभिषेकोत्सवे,
शृङ्गे निर्जरभूधरस्य विहिते सम्भूय देवेश्वरैः ।
साकं देवगणेन हर्षविवशैः पुष्पौघवृष्टिः कृता,
ताराणां व्यपदेशतोऽम्बरतले शोशुभ्यते सा शुभा ॥३॥
अंह्रिस्थेन समीक्षितं फणभृता चेतश्चमत्कारि यत्,
श्रीमत्पार्श्वपतेश्चरित्रममलं भूभारमाबिभ्रता ।
चित्ते तत् स्मृतिगोचरं कलयता बाढं शिरो धूनितं
क्षुब्धादुच्छलितास्तदा जलनिधेस्ते बिन्दवस्तारकाः ॥४॥
यस्य स्फारजनिक्षणे सुरवरैर्या निर्मिताऽर्चा चिरं,
तस्यामष्टमितानि मङ्गलवराण्यालेखितानि स्फुटम् ।
स्रस्तास्तत्समये सुरोत्करकरस्तोमात् पुनस्तन्दुला,
रौप्यास्ताः खलु तारका इति मतिश्चित्ते समुज्जृम्भते ॥५॥
यद्वा स्वर्गतरङ्गिणीं हरिकरिस्नानेन जाताविलां,
कासारं किल मानसाभिधमलिश्रेण्या कलङ्कीकृतम् ।
मत्वा बालमरालसन्ततिरियं ताराततिव्याजतो,
मेरोर्मूर्ध्नि जिनाभिषेकसलिलेऽस्थात् सातजातान्विता ॥६॥

किलैकया तीर्थपतेः स्तवामृतं, द्वितीयया कुण्डगतं सुधारसम् ।
पिबन् प्रमोदाद् युगपद् रसज्ञा-युगं स्तवीतीति फणी यदङ्कगः ॥७॥

अनन्तसामर्थ्यभृतोऽर्हतोऽङ्कगो, निषेवयाऽसावधिगत्य भूयसीम् ।
शक्तिं धराभारमिहोदुवाह, यथाऽधुनाऽप्युज्झति नो स्वयं फणी ॥८॥

सुबोधसद्बीजसमाजवाप-कृते प्रभुः सप्तफणामिषेण ।
सज्जानि चक्रे विलसद्धिलानि, स्फुरद्रुचीनीह जगद्धिताय ॥९॥

वक्षः स्वकं यो जिनराजनाम-मन्त्राक्षराणां हि पदं विधत्ते ।
अंहांस्यनेशन्निखिलानि तस्माद्, व्याला यथा सिंहयुताद् वनात् तु ॥१०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

व्यवायविस्तारितमस्तमोत्कर-व्यपोहने भासुरभानुभास्करः ।
तमीशमाशीविषकेतनं जिनं, सुचित्तवृत्त्या प्रणिपत्य भक्तितः ॥११॥
निजांह्रिपद्मैः प्रभवः पुनन्ति, धरामलङ्कारयितुं ततोऽत्र ।
स्वर्गैकदेशो हरिणा प्रमुक्तो, विभाति राष्ट्रो नयनप्रियस्सः ॥१२॥
समुल्लसत्श्रीमुनिराजरत्न-विराजितं मङ्गलकेलिधाम ।
विभासते यत्र पुरं प्रधानं, महीमहेलातिलकावदातम् ॥१३॥
सुपक्वसुस्वादुफलादिदानतो, नृणां हि यस्योपवनानि शर्मणे ।
बभूवुरुल्लासिविलासभाजिनां, मरुद्वनाभानि मनोहराणि ॥१४॥
भृङ्गावली मधुकरीपटली प्रकामं, मत्ता प्रसूनविगलन्मकरन्दपानात् ।
झङ्कारितानि वितनोत्यमलस्वरेण, शर्मावहान्युपवनेषु नृणां हि यस्य ॥१५॥
चाञ्चल्यदोषं परिहीय लक्ष्मी-स्तिष्ठत्यजस्त्रं स्थिरतां प्रपद्य ।
अतोऽब्धिरागान्मिलितुं स्वपुत्रीं, कल्लोललोलत्परिखामिषेण ॥१६॥
पयोधिपुत्रीं पृषताम्बुजाक्षीं, वशां विधातुं शतपत्रजेन ।
विशालसालच्छलतो व्यधायि, ह्यभङ्गुरा सुन्दरवागुरेयम् ॥१७॥
विहारसानूच्छ्रितकेतनाञ्चलोल्लसच्चलत्पेशलपाणिपल्लवैः ।
.............................................................................. ॥१८॥
.............................................................................. ।
............ स्फुरत्सहसेक्षितेषु, मिथस्तके तेषु विलासभाजः ॥१९॥
यत्र स्फुटस्फाटिककुट्टिमेषु, बभुर्जना भूषणभूषिताङ्गाः ।
दिदृक्षवः _ _ _ किन्नरस्य दिवौकसोऽमीव विषात् समीयुः ॥२०॥
सद्धर्ममर्मसमकर्मविधानदक्षा, विक्षिप्तजैनवचनप्रतिपक्षलक्षाः ।
औदार्यवर्यगुणनिर्जितलेखवृक्षाः श्रद्धाल. ........................ ॥२१॥
.............................................................................. ।
...................................., श्रीराजि **राजनगरे** नगरप्र _ _ ॥२२॥
............................ वाक्यानिलैरतितरां प्रविचालितोऽपि ।
स्थैर्यं बिभर्ति पुरि यत्र विशुद्धचेताः, श्राद्धो जनोऽमरमहीधरवन्नितान्तम् ॥२३॥
सूरीशनामशुचिसंस्मृतिचन्द्रिकाभि-रुज्जृम्भदुल्लसदुरःसरसीरुहश्च ।
यस्मिन् शुभार्हतजनो निवसत्यनिद्रः, श्रीकेलिपेशलसुरा**णकमेरुदुर्गा**त् ॥२४॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

हर्षप्रकर्षजनितोत्पुलकप्रपञ्चः, सुक्षोणिमण्डलमिलन्निजकोत्तमाङ्गः ।
संयोजयन् शयकुशेशययामलं च, शिष्याणु**मेघशुभचन्द्र**विनयावनम्रः ॥२५॥
श्रीकण्ठसूनुनयनप्रमितैः प्रशस्तै-रावर्तकैः शुभधिया विधिवत् प्रणत्य ।
संसारनीरनिधिपारविधाननावं, विज्ञप्तिकां वितनुतेऽतनुभक्तियुक्तः ॥२६॥
कार्यं यथोदयमहीधरचारुसानौ, भानावुदञ्चति विभास्वति भूरिभासि ।
प्रातर्महेभ्यशुभसंसदि वृत्तियुक्त-**श्रीउत्तराध्ययन**वाचनमादरेण ॥२७॥
अध्यापनं सततमध्ययनं समन्ताद्, योगोपधानपरिवाहनमुग्रभावात् ।
सानन्दनन्दिभवनादिसुधर्मकर्म, बोभूयते स्म निखिलं च भवत्यजस्रम् ॥२८॥
खर्वीकृताशेषकपर्वगर्व-सर्वस्वपूरे दलिताखिलाघे ।
महेभ्यसृष्टप्रकटोत्सवौघे, क्रमागते **वार्षिकपर्वणी**ह ॥२९॥
निरन्तरं भावभरेण भक्त्या, सदर्चनं श्रीजिनबिम्बपङ्क्तेः ।
मिष्टान्नपानैर्विविधैर्विशेषात्, साधर्मिकालीपरिपोषणं च ॥३०॥
सङ्कल्पितार्थाधिककल्पनेन, कल्पद्रुमादप्यधिकस्य विश्वे ।
**श्रीकल्पसूत्रस्य** सुवाचनं च, नवक्षणैः सक्षणमादरेण ॥३१॥
**दिनानि चाऽद्रिप्रमितानि याव-न्निवर्तनं जीववधस्य गाढम् ।**
असाध्यसंसिद्धिनिबन्धनाना-मनेकभेदैस्तपसां विधानम् ॥३२॥
सुनीतिरीत्यार्जितपृक्तसार्थसुबीजराजीवपनं प्रमोदात् ।
शस्यामृतश्रीप्रभवाय सप्त-क्षेत्र्यां हि पुण्योदकपूरितायाम् ॥३३॥
इत्थं प्रशस्ताखिलधर्मकृत्य-सन्दोहपद्मप्रकरः प्रकामम् ।
उज्जृम्भते श्रीवर**तातपाद**-प्रसादचन्द्रातपमाप्रपद्य ॥३४॥
निश्शेषकामितकरं कनकं प्रतीतं, पाथोधरः क्षितितलेऽखिलसस्यराशेः ।
विश्वे तथा सकलमञ्जुलमङ्गलाली-हेतुर्यकः शमभृतामधिपश्चकास्ति ॥३५॥
धर्मोपदेशनविधौ शमिनामधीशः, प्रासीसरद् दशनसन्ततिरश्मिराशीः ।
पातुं हि भूघनभृतां पततां भवाम्भो-राशौ कृपारसनिधिर्जगदेकबन्धुः ॥३६॥
संसत्समागतजनान् बहुभक्तियुक्ता-नातिथ्यमाप्रथयितुं प्रमदादपीप्यत् ।
व्याहारसारतरभूरिसुभक्ष्ययुक्त-सद्दन्तकान्तिततिपुंसवनानि नित्यम् ॥३७॥
संसत्समेतवनिताश्रवणेषु चञ्च-च्चामीकरोज्ज्वलसुकुण्डलमण्डलानि ।
सम्पर्कतो मुनिपतेर्दशनांशुपङ्क्ते-रुद्यच्छशाङ्कपटलीसुखमाश्रयन्ति ॥३८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भक्तासुमद्भृदवनीषु समुद्गतानां, श्रेयोमनोरथमरुद्द्रुसदङ्कुराणाम् ।
साफल्यमाकलयितुं किल सिञ्चतीह, यः कान्तदन्ततिदीधितिवारिपूरैः ॥३९॥
यद्गीः श्रुताऽपि तनुते भुवनं पवित्रं, तच्छिक्षितुं हि घनवाहनशेखराऽसौ ।
शुश्रूषणां शुचितमां रचयत्यजस्रं, राजद्रदालिविमलद्युतिकैतवेन ॥४०॥
चन्द्रावदातविकसद्वदनाम्बुजन्म-कान्तेः पराभवमवाप्य नितान्तमेतत् ।
शुभ्रं सरोजमपि कश्मलतां बिभर्ति, चुम्बन्मलीमसशिलीमुखमण्डलीभिः ॥४१॥
शीतद्युतिं शुचिवरं बहुशोऽथ सृष्टं, भङ्क्त्वा मुहुर्मुहुरयं शतपत्रजन्मा ।
उद्धृत्य सारमभितः परिपुष्यतीह, तस्माद् यदीयवदनाब्जविभाप्रपञ्चम् ॥४२॥
अश्रान्तयातपरितान्तसितांशुरेष, विश्रान्तिमाप्तुमिह वाससुखाभिकाङ्क्षी ।
यद्विश्ववल्लभमुखस्य रुचेर्मिषेण, तिष्ठत्यजस्रमटनोत्कटदुःखभीतः ॥४३॥
यस्योल्लसद्वदनपद्मरदावलीनां, ज्योत्स्ना वियज्जलधिजा तटसंश्रिता हि ।
संसन्निविष्टजनताननधोरिणीयं, रेजे मरालपटलीव विलाससारा ॥४४॥
यस्याऽधरारुणरुचा धृतशोण(णि)तासु, मुक्तासु चारुतरहारलतागतासु ।
संसत्समेतवनिताङ्कगतार्भकाल्य-क्षैप्सीच्छयान् धिषणया कुचलीफलानाम् ॥४५॥
शास्त्रार्थसाररसपानपरा यदंह्रि-पद्मे स्थिता सुपठनोद्यतशिष्यलेखा ।
भेजेतरां मधुरिमाधरितामृतौघ-झङ्क(ङ्का)रपूरितमुखेव शिलीमुखाली ॥४६॥
मिथ्याप्रवादमलिनान् परिवादिनोऽमून्, संत्यज्य साधुपमशिश्रियदेष लोकः ।
हंसव्रजो जलधरानिव सत्तडागं, स्वच्छाशयं मनसि मानसमाकलय्य ॥४७॥
प्रातः प्रभोः शमभृतां सुकृताम्बुराशेः, शश्वत्प्रसादसदनं वदनाम्बुजन्म ।
स्नेहेन लोचनपुटैः परिपीय भव्या, ज्योत्स्नाप्रिया इव भृशं बिभराम्बभूवुः ॥४८॥
यस्य स्मितो_ _ _ वक्त्ररदावलीनां, ज्योत्स्नापयोझरभरैः परिधौतगोष्ठ्याम् ।
सभ्याननावलिरलं शुशुभेऽम्बुदाम्भो-धौता यथा विज(य?)ति शारदचन्द्रलेखा ॥४९॥
दन्तद्य(द्यु?)तिः शुभतमा शुशुभे यदीय-प्रोद्यत्प्रवालविम _ _ _ शोणभासा ।
बालार्ककान्तिनिचयैः खचितेव काम-मुद्दामकुन्दकलिकापटलीपटिष्ठा ॥५०॥
माहात्म्याद्भुतसारसौरभभरैरापूरयन् दिग्वधू-
वक्त्राम्भोजततीर्निजान्वयवनीं संवासयन् सर्वतः ।
अश्रान्तं भवतापताम्यदसुमत्तापापहारी भुवि,
श्रेयोहेतुतया विभाति मुनिपः श्रीखण्डशाखिप्रभः ॥५१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

निरन्तरं भक्तिभरेण संनमत्तनूमतां याप्यतमान्यघानि ।
जरीहरीतीह यदीयदर्शनं यथा रजांसि प्रलयानिलोत्करः ॥५२॥

विपक्षवर्गादवमाशयाच्च, पराभिभूतिं लभते जनो न ।
पक्षं श्रितः साधुपतेः शकुन्तो, यथोद्धुराद् बन्धुरसिन्धुरारेः ॥५३॥

कृपासुधापूर्णदृशो जनोऽयं, यस्येक्षणात् स्यान्नवपल्लवश्रीः ।
प्रदुष्टदोषानलदूषितोऽपि, यथा पयोदस्य जलेन शैलः ॥५४॥

सदोषजन्योऽपि मलीमसोऽपि, भवेज्जनोऽयं जगदर्चनीयः ।
यं संश्रितः स्यान्मृगनाभिजेव, गुणं श्रिता सौरभमेकमुद्धम् ॥५५॥

काष्ठं सुरद्रुः सुरसौरभेयी, पशुः पुनश्चिन्तितरत्नमेतत् ।
विश्वे दृषत्खण्डतया प्रतीतं, ततः श्रितः श्रीगुरुमत्र लोकः ॥५६॥

शृङ्गारभासुरविभाभरभूषिताङ्ग्यः, प्रातः समेत्य पुरतश्शमिपस्य यस्य ।
कुर्वन्ति कोमलकराः कमलानिवास-सत्स्वस्तिकादिरचनां सधवा मृगाक्ष्यः ॥५६(५७)॥

ता एव तत्र समये किल संमुखीना, वर्धापनं विदधति स्फुटमौक्तिकौघैः ।
तद्वीक्ष्य वक्ति निपुणो रवितापताम्य-दभ्रं विहाय वदनं श्रयते भचक्रम् ॥५८॥

केचित् क्रियानिपुणतामभजञ्जगत्यां, केचिच्च वाङ्मयपयोनिधिलब्धमध्याः ।
केचित् परोपकृतिकारणमत्र किन्तु, सर्वार्थकृच्छुभनिधि**स्तपगच्छनेता** ॥५९॥

........................................................ ।
दौःस्थ्यव्यथाध्वंसनदेवभूमी-रुहानुवादैर्दलितप्रमादैः ॥६०॥

माद्यन्मनोभूमथनैकपादैः, सुनीतिरीतिव्रततिव्रजाब्दैः ।
**श्रीतातपादैः** प्रहतावसादै-र्निरन्तरं निर्मितसुप्रसादैः ॥६१॥

तैः स्वस्फुरत्तनुनिरामयतादिवाच्य-रुच्या मनोघनसुहृत्प्रमदप्रदात्री ।
कार्या प्रसादविषया स्वशिशोः प्रसद्य, पत्री पयोदपद(ट)ली त्वरितं प्रसन्नैः ॥६२॥

अर्हन्मताम्बुजनिशारमणैस्त्रिसायं, कारुण्यपुण्यकरणप्रवणैः प्रणामः ।
श्रीकान्ततातचरणैर्घृणयाऽवधार्य भक्त्या नमन्निजविनेयकणस्य शश्वत् ॥६३॥

**श्रीतातपाद**दिविषन्मणिमञ्जुसेवा-लब्धेशताम्बुधिसुतासुविलासभाजाम् ।
दुर्वादिगर्वतिमिरप्रकरप्रभेदे, चण्डत्विषां गतरुषां विमलाङ्गभासाम् ॥६४॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रागल्भ्यवैभवनिशुम्भितवाक्पतीनां, गाम्भीर्यगौरवविडम्बितबाष्पतीनाम् ।
विश्वातिशायिमहिमाद्भुतसच्चरित्र-पावित्र्यभृन्निखिलसूरिपुरन्दराणाम् ॥
नैजोल्लसन्निरुपमाधिकरूपरम्य-श्रीसद्मनां **विजयदेव**शमीश्वराणाम् ॥६५॥

तथा च तत्र प्रभुपादपद्म-मधुव्रतानाममलाशयानाम् ।
स्वपाणिपादच्छविसञ्चयेन, निराकृताशेषकुशेशयानाम् ॥६७॥

क्ष्मापालजालपरिषत्समवाप्तचन्द्र-सान्द्रोल्लसत्सुयशसां निजगोविलासैः ।
विद्यावितानवनितारचिताश्रयानां(णां), **श्रीधर्मचन्द्र**शुभ**वाचक**शेखराणाम् ॥६८॥

श्रीतातचरणैर्नित्यं, नतिरुन्नतिदायिनी ।
यथा स्याच्चित्तविषया-ऽवधार्यं(र्या ?) च तथा शिशोः ॥६९॥

तत्रैव शुभ्रतरभूरियशोभराम्बु-राशिप्लवेन किल पूरितविश्वविश्वाः ।
साधुव्रजेप्सितसुकार्यविधानदक्षाः, श्रीऋद्धि**ऋद्धिविजया**भिधकोविदेन्द्राः ॥७०॥

मेधावधीरितसुचित्रशिखण्डिजाहि-श्रीराम**रामविजया** विबुधप्रतीताः ।
अश्रान्तशान्तविषयादिसपत्नसार्थाः, श्रीसार**शान्तिविजया** विबुधप्रधानाः ॥७१॥

हृद्यानवद्यबुधवर्ण्यतमैकविद्या-विद्याधरीसमुपगूहनकोविदाश्च ।
श्रीसूरिराजपदपङ्कजसेवनाप्त-श्रीश्रेणि**वीरविजया** जितकोविदेन्द्राः ॥७२॥

संवेगरङ्गपरिभावितचारुचित्ताः, श्रीधाम**साधुविजया** विबुधव्रजेन्द्राः ।
धीधाम**चन्द्रविजया** गणिधोरणीन्द्राः, सत्कीर्ति**कृष्णविजयाश्च** गणिप्रधानाः ॥७३॥

निश्छद्म**हस्तिविजया**स्सुयशोवदाताः, श्रीसूरिराजपदपङ्कजभृङ्गतुल्याः ।
कल्याणसारशुभसंयुत**ऋद्धिसोमाः**, सम्यग्धियश्च **उदयाद् विजयाः** प्रतीताः ॥७४॥

इत्येषां समसाधूना-मनेकगुणशालिनाम् ।
श्रीतातचरणाम्भोज-शुश्रूषादत्तचेतसाम् ॥७५॥

प्रणत्यनुनती नित्यं, स्वविनेयविनिर्मिते ।
ज्ञाप्ये कृपाब्ध्युषाकान्तैः, श्रीतातैर्विहितेहितैः ॥७६॥

तथाऽत्र गणिमुख्याश्च, **हीरचन्द्रा**भिधाः शुभाः ।
मुनिस्तथैव **वृद्ध्यादि-चन्द्र( न्द्रः )** सद्विनयाञ्चितः ॥७७॥

**कर्पूराच्चन्द्रयश्चैव, कुशलाच्चन्द्रयो गणिः** ।
**मुनिर्नयणचन्द्रा**ख्यः, साधुयुगलकं तथा ॥७८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इत्येते शमिनः सर्वे भक्तिभावितचेतसः ।
संयोजितशयाम्भोजाः, [प्रणमं]त्यनिशं प्रभून् ॥७९॥

अप्रागल्भ्यान्मतेर्मान्द्यात्, स्मृतेर्दोषात् तथैव च ।
अनभ्यासाच्च शास्त्राणां, लेखेऽत्र लिलिखे मया ॥८०॥

असम्बद्धमलीकं यत्, क्षन्तव्यं तत् क्षमाधनैः ।
श्रीतातचरणैः सर्वं, मत्वा तद् बालचेष्टितम् ॥८१॥

तथा यतिशुभोदर्क-सूचाचरपत्रिका (?) ।
जगत्प्रतीक्ष्यैः श्रीतातैः, शरण्यैः शरणार्थिनाम् ॥८२॥

प्रसादविषयीकार्या शिशुसंमदहेतवे ।
तपोर्जसितपक्षस्य, दशम्यामिति मङ्गलम् ॥[८३]॥

॥ श्रीः ॥ भद्रमस्तु ॥

( २ )

## श्रीविजयदेवसूरिं प्रति प्रेषितं पत्रम्

॥ ॐ ह्रीँ श्रीँ श्री ६ विजयदेवसूरीश्वरपरमगुरुगुरुभ्यो नमः ॥

स्वस्ति.... लितानि, स्फूर्तिमान् जिनपतिर्विलसन्त्यः ।
प्राप यां परमनिर्वृतिमुच्चै _ _ _ सनिदर्शन _ _ ॥१॥
............................................... ।
संस्तुतः सकलमङ्गलसिद्ध्यै, **वैश्वसेनि**भगवानयमर्हन् ॥२॥
पादपोतमिह सत्त्वशरण्यं, यस्य शस्यमुरुरङ्गकुरङ्गः ।
पारमाप्तुमिह संसृतिसिन्धोः, पर्यसेवत स वः शिवदोऽर्हन् ॥३॥
नादरङ्गकलितोऽपि _ _ _, संश्रितो वनमवोचि कुरङ्गः ।
तद्विहायसविहायसि चेन्दुं, तत्र तन्नयणतः(?) स कलङ्की ॥४॥
कर्णकण्टकतुलामधिरूढं तन्निशम्य वचनं धनसारः ।
....च्यतं च विभु .................................. ॥५॥ युग्मम् ।
_ _ _ _ _ _ _ हितमोदा-नंदकं दलितदृष्टिमुदाराम् ।
_ _ _ _ _ _ दुःखिनि दीने, सिद्ध _ _ _ रुणारसराशे ॥६॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सर्वशर्मकमलाकरमुद्रा-विड(द्र?)वैकतरुणारुणबिम्बम् ।
स्वर्णवर्णवपुषं सुषर्माधिं, वैश्वसेनिमभिवन्द्य तमद्य ॥७॥
यत्रार्हत्सौधशृङ्गस्थ-सौवर्णकलशोपधेः ।
दृष्ट्वोद्यच्छन्तमादित्यं न [च]क्रा विरहं ययुः ॥८॥
यत्र प्रासादशिखरा-रूढकुम्भा बभुर्भृशम् ।
पूःपुरन्ध्र्याहिता दीपा, मन्ये मुक्त्यध्वदर्शकाः ॥९॥
यत्रार्हच्चैत्यमूर्धस्थ-स्वर्णदण्डच्छलादिव ।
तर्जन्युदञ्चिता पुर्या, नृणां मोक्षाध्वदर्शने ॥१०॥
पुनः- अर्हच्चैत्यमरुत्कम्प्र-केतुच्छायाशनात् सदा ।
सर्पान् सर्पाशना यत्र, नाश्नन्ति निहतोद्यमाः ॥११॥
शुद्धस्फटिकहर्म्याणि, मिश्राणि शशिरश्मिभिः ।
यामिन्या _ _ _ _ ते, कटरे कज्जलध्वजैः ॥१२॥
पद्मरागनिबद्धोर्वी-तलसङ्क्रान्तमूर्तयः ।
स्फुटोपमा _ _ पौरा, लभन्ते यत्र सुश्रियः ॥१३॥
यत्र कासः सरित्तीरे, स्फुटदूष[ण]तापणे(?) ।
आकिञ्च _ [न्यं] व्रतिव्राते रुद्रे रुद्रत्वमाश्रितम् ॥१४॥
दोषाकरत्वमेणाङ्के, राजहंसे सरोगता ।
खले खलत्वमाभाति, न हि पौरजने क्वचित् ॥१५॥ युग्मम् ॥
किञ्च- सिन्धुना स्वसुता रत्नान्यद्रिणा रोहणेन च ।
सुवर्णं स्वर्णगिरिणा, रजतं रजताद्रिणा ॥१६॥
औदार्यं कल्पवृक्षेण, रूपं मकरकेतुना ।
जगद्गुरुपदोपास्ते-र्ढुढौके यन्नृणामहो ! ॥१७॥
अतुलबलधराणां नम्रभूमीश्वराणां,
मुकुटकुटविनिर्यद्रत्नगोक्षीरपूरैः ।
स्नपितचरणपद्मैः श्रीगुरूणामुदारै-
र्निहतनिखिलविघ्ने तत्र सर्वार्थनिघ्ने ॥१९॥
किञ्च- **चर्मन्वती**सरित्तीरे, पुरं **भृगुपुरा**भिधम् ।
समस्त्यसमशस्यं श्री-समृद्धभवनान्तरम् ॥२०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तत्र- **कल्याणमल्लो**र्वीराट्, प्रजाः पाति वज्रिवत् ।
तत्सूनुवत् क्षितौ ख्यातो, यज्जयो द्विट्क्षयोद्भवः ॥२१॥

यत्र- धनदाश्च कुबेरा न, महारम्भा न पापिनः ।
पुण्यजनाः पलादा नो, ईश्वरा न विषादिनः ॥२२॥

अस्माद् विस्मयदानन्द-समुद्यत्पुलकाङ्कितः ।
नम्रो मूर्ध्नः स्पृशन् भूमिं, भालस्थलकृताञ्जलिः ॥२३॥

सार्वभौममितावर्तै-रभिवन्द्य श्रीसद्गुरून् ।
भक्त्या वितनुते ज्ञप्तिं, **मेघचन्द्रा**भिधः शिशुः ॥२४॥ युग्मम् ॥

प्राच्याद्रिताम्रचूडस्य मूर्ध्नि _ _ _ ते रवौ ।
सहर्षपर्षदि स्त्रीभि-र्विहितस्वस्तिकस्थितौ ॥२५॥

**व्याख्या श्रीशान्तिनाथस्य, चरित**स्य जिनेशितुः ।
सनन्दि श्राद्धव्रन्द(वृन्द)स्य, द्वादशव्रतरोपणम् ॥२६॥

साधुसाधुसमारब्धा-ऽध्ययनाध्यापनादिकम् ।
वर्धते सौकृतं कर्म, श्रीमत्तातप्रसत्तितः ॥२७॥ त्रिभिर्विशेषकम् ॥

अष्टाहिका(ह्निका)ष्टपत्राढ्यं, सत्तपःश्रेणिकर्णिकम् ।
जिनार्चावि[क]सत्कोशं प्रभावनोरुकेसरम् ॥२८॥

सङ्घवात्सल्यपौष्येष्टं, **कल्पव्याख्या**मधुश्रितम् ।
भूरिवित्तव्ययामोद-मत्तार्थिमधुकृद्गुणम् ॥२९॥

धन्याधत्तमहापुण्य-सौरभ्यस्पृष्टविष्टपम् ।
निःशेषतीर्थकृल्लक्ष्मी-विलासैकनिकेतनम् ॥३०॥

सर्वसत्त्वदयानीर-पूरेऽर्हन्मतमानसे ।
गुरुज्ञानमृणालस्थं, **पर्वपर्युषणा**म्बुजम् ॥३१॥

भजति स्म भजत्येतत्, सन्ततोत्फुल्लसम्पदम् ।
सश्रीकतातपादैक-सहस्रकिरणोदयात् ॥३२॥

किञ्च-श्रेयोवल्लीवितानैका-म्भोदसोदरमूर्तये ।
**विजयदेवसूरीन्द्र**त्रिजगद्गुरवे नमः ॥३३॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मुनीन्द्र! तव मूर्तिं ये, पश्यन्ति दिवसोदये ।
नश्यन्ति विपदस्तेषां, तमांसि जगतो यथा ॥३४॥

सद्भावैस्ते विभो! मूर्तिं विधाय विधिरम्बुधौ ।
हस्तधावनमातेने, मुक्त्या रत्नादि तत् किल ॥३५॥

सद्वस्तुसारमुद्धृत्य, धात्राऽधायि तनूस्तव ।
क्षिप्तं तत्कश्मलं मन्ये, चन्द्रेऽङ्कमिषतोऽलगत् ॥३६॥

मन्येऽद्भुतं विभो रूपं, विधाय विधिनोपरि ।
उत्तार्य लवणं क्षिप्तं, क्षारास्तज्जज्ञिरेऽर्णवाः ॥३७॥

तुहिनद्युतिगोस्तन्योः, सारं संगृह्य ते तनु(नुः?) ।
ध्रुवश्चाऽजीघटच्छङ्के, लक्ष्मसङ्कोचसम्भवात् ॥३८॥

स्थैर्यमार्यशरण्यं भू-र्वर्यधैर्यं तु मन्दरः ।
गाम्भीर्यं गुरुपाथोधिः, चातुर्यं चतुराननः ॥३९॥

हर्यक्षः सौ(शौ)र्यमाश्चर्यकार्यौदार्यं सुरद्रुमः ।
सौन्दर्यं शम्बराराति-रैश्वर्यं मेघवाहनः ॥४०॥

सोमः सौम्यमसाम्यश्रि, प्रतापं तपनोऽद्भुतम् ।
धिषणो धिषणां वर्ण्यां, वाग्देवी सकलाः कलाः ॥४१॥

युष्मत्सद्भाग्यसौभाग्या-कर्षिता इव सद्गुरो! ।
एते चाऽढौकयन् भावा, इत्येतानि समेत्य वः ॥४२॥ चतुर्भिः कलापकम् ।

सद्विद्याम्बुधिसोमाः, **श्रीवाचकसुधनविजयगणि**मणयः ।
**श्रीलावण्यविजयवा-चक**सवितारस्तारतेजस्काः ॥४३॥

एतौ सज्जनविबुधा-वर्हन्मतनन्दने श्रितच्छायौ ।
त्रिदशतरू विजि[त]गुरू, स्वधिया वन्दे त्रिसन्ध्यमहम् ॥४४॥

(एतावन्मात्रमेव पत्रमिदमुपलभ्यते)

—x—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## (११)

## पत्तननगरस्थ-श्रीविजयसिंहसूरिं प्रति

# मण्डपदुर्गस्थ-श्रीमेघचन्द्रमुनेः पत्रम्

ऐँ नमः ॥ ॐ ह्रीँ श्रीँ श्री श्री श्री श्री श्री श्री विजयसिंहसूरीश्वरविश्वगुरु-परमगुरुभ्यो नमः ।

स्वस्तिश्रीणां हेतवे सेतवेऽहं, संसाराब्धेर्लब्धिसंसाधनाय ।
**नाभेयाय** श्रीमते भक्तिभावा-न्नित्यं रीत्या प्रीतिपूर्वं नमामि ॥१॥
स्वप्नेषु प्रथमं प्रहृष्टमनसा दृष्टो जनन्या वृषः,
ज्ञात्वैवं भगवंस्त्वयैव विधृतो लक्ष्मच्छलात् पत्कजे ।
मात्रा यद् विहितं तदेव भवता कृत्यं कृतं ज्ञायते,
सत्यं स्याज्जगतीह तीर्थसदृशी माता हि पूज्या सताम् ॥२॥
स्कन्धे वासवभक्तिवाक्यवशतो दीक्षाक्षणे यः प्रभुः,
केशालीमलिवृन्दकज्जलनिभां दक्षो ररक्ष स्फुटम् ।
नाऽसत्या जनगीरिति स्फुटतरं दृष्टान्तसंस्थापिता,
कुर्वन्त्यत्र महान्त एव न सदा मोघामपि प्रार्थनाम् ॥३॥
केशालीच्छलतो बभार भगवान् स्कन्धे निजे लीलया,
हन्तुं कर्मभटांश्च खड्गलतिकां मन्येऽहमेवं सदा ।
देवानां प्रथमः प्रभावभवनो लोकस्थितिस्थापक(को),
भूयान् मे शिवमार्गसाधनविधौ वेधा(:) शिवप्रापकः ॥४॥
पञ्चास(स्य)स्य भयेन कम्पितवपुस्त्यक्त्वा वनान्तं निजं,
स्थानं निर्भयमाकलय्य मनसा यत्पादपाथोरुहे ।
प्राप्तो लाञ्छनदम्भतो मृगयुवा जानेऽहमेवं सदा,
**श्रीशान्तिः** शिवतातिरेव भविनां भूयाद् भवापच्छिदे ॥५॥
श्रेयःश्रेणिकरः क्षितौ गुणकरः कीर्तिप्रथासुन्दरः,
बालब्रह्मधरः पराक्रमवरः सत्त्वैकरक्षापरः ।
तापव्यापहरः प्रतापनिकरः श्यामार्चिरुद्भास्वरः;
**नेमिः** सार्ववरः सुखं वितनुतां धो(धा)राधिपो यः सदा ॥६॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्वस्तिश्रीसदनस्य यस्य जगतीभर्तुर्भवाम्भोनिधेः,
पातात् त्रातुरुदारवृत्तिमनसा दातुर्विशां शासितुः ।
चूला मूर्ध्नि चकास्ति विश्वनयनप्रेमोपदादायिनी,
मन्ये मोहनगुल्मिनी भ्रमरवत् श्यामा जगत्कार्मणम् ॥७॥
यः स्वामी जगदत्ति(र्त्ति)तप्तिहरणे प्रावृट् घनासारवन्-
मिथ्यात्वैकतमः प्रणाशनविधौ यो भानुवद् भासते ।
शीर्षे यस्य फणीन्द्रसम्मदकृतस्फूर्जत्फटाडम्बरो,
जीयात् **पार्श्वजिन**प्रभुस्त्रिजगतीत्राताऽनुशास्ताऽपि च ॥८॥
स्वस्तिश्रीसदनं समग्रसुखदं कल्याणमालास्पदं,
त्रैलोक्याभ्युदयप्रदं कलिमलप्रक्षालनं पावनम् ।
सर्वाभीष्टपरम्परावितरणे चिन्तामणिं प्राणिनां,
वन्दे भक्तिपुरस्सरं जिनवरं श्रीपार्श्वपार्श्वं जिनम् ॥९॥
स्वस्तिश्रीयुतपादपद्ममतुलं श्रेयःश्रिदं देहिनां,
गीर्वाणैर्नरपुङ्गवैः स्तुतमिति ध्यातं च योगीश्वरैः ।
भव्यानां भवभूरितापहरणं सिद्धौ दृढप्रश्रयं,
वन्दे भक्तिपुरस्सरं जिनवरं श्रीपार्श्वपार्श्वं जिनम् ॥१०॥
मेरुर्मोदयुते सुरेश्वरगणे यस्य जन्माभिषेकं,
निर्मायं विहितैकचन्दनयुतैः स्नात्रवारिप्रवाहैः ।
प्राप्तः पीतगुणं ततो गिरिरसौ काञ्चनीयो जनोक्तिः,
**श्रीसिद्धार्थधराधरान्वयमणिः** भूयात् स वः सिद्धये ॥११॥
एतांस्तीर्थपतीन् नतामरपतीन् नत्वाऽतिभक्त्याऽन्वहं,
कन्दर्पोत्कटसर्पदर्पदलनव्यापारनागान्तकान् ।
मुक्तिस्त्रीकुचकुम्भकुङ्कुमरसानानन्दकन्दाङ्कुरान्,
दुष्टव्याल-मृगारि-कुम्भि-रणभीविध्वंसकानादरात् ॥१२॥

अथ श्रीतपोगणगगनमणि-भट्टारक-श्रीविजयसिंहसूरीश्वरचरणविन्यास-
पावनीकृतश्री**राजत्पत्तन**नगरचरवर्णनम्-

यत्राऽऽरामाश्च रामाश्च, सपुष्पाः फलमण्डिताः ।
अदृष्टसूर्याः सरसाः, पत्रालीतिलकाङ्किताः ॥१३॥

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

चान्दनास्तरवो यत्र, भुजङ्गगणसंश्रिताः ।
पण्यस्त्रियः सदाकाराः, भुजङ्गगणसेविताः ॥१४॥
अशोका यत्र मोदन्ते, योषिच्चरणताडिताः ।
कामिनो यत्र मोदन्ते, योषिच्चरणताडिताः ॥१५॥
इभ्या यत्र पुरे नित्यं, कमलाबद्धमानसाः ।
समदा यत्र रोलम्बाः, कमलाबद्धमानसाः ॥१६॥
जलहर्त्र्यो विराजन्ते, सकुम्भाः प्रक्षरज्जलाः ।
हस्तिन्यः समदा यत्र, सकुम्भाः प्रक्षरज्जलाः ॥१७॥
दानिनो यत्र शोभन्ते, कृतोन्नतकराः सदा ।
मदोद्धता गजा यत्र, कृतोन्नतकराः सदा ॥१८॥
सुधावदाताः प्रासादाः, सुवर्णकलशाङ्किताः ।
यत्र तीर्थकृतां रेजुः, कैलासस्याऽनुजा इव ॥१९॥
ध्वस्तान्धकारैः कलशैः, प्रासादशिखरस्थितैः ।
निशा-दिवसयोर्भेदो, लक्ष्यते यत्र नो जनैः ॥२०॥
गवाक्षतस्थुषीणां च, दृष्ट्वा चपलचक्षुषाम् ।
वितर्कयन्ति वक्त्राणि, शतचन्द्रं नभस्तलम् ॥२१॥
चञ्चलत्वमपास्य श्रीः, धनिगेहेषु सर्वदा ।
चकार वासं चतुरा, मन्ये पर्यटनच्छलात् ॥२२॥
कामुकीकटिदेशेषु, कार्श्यं स्वाभाविकं सदा ।
कार्ष्ण्यं कुचमुखेष्वेव, तत्रैव करपीडनम् ॥२३॥
निरालम्बत्वमाकाशे, सङ्कोचः पद्मिनीदले ।
दण्डो देवालये यत्र, बन्धनं कुसुमस्रजि ॥२४॥
पारदे मारणं यत्र, कटुता ज्वरिणां मुखे ।
यत्र म्लानिः सुमे ख्याता, क्षेत्रे यत्र निरीतिता ॥२५॥
मथनं यत्र दधिषु, मारिः सारिषु गीयते ।
परापवादे मूकत्वं, काठिन्यं शकलेऽश्मनः ॥२६॥
वियोगः कर्मणां यत्र, तापस्तपनमण्डले ।
वक्रत्वं यत्र शङ्खे स्यात्(द्), लघुता तूले सर्वदा ॥२७॥
श्रद्धालवः सदाचाराः, पापव्यापपराङ्मुखाः ।
गुरु-देवरता नित्यं, द्वादशव्रतसुव्रताः ॥२८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत्र श्राद्ध्यः शुभाचाराः, पात्रदानविधायिकाः ।
रूपनिर्जितपौलोम्यः, शीलभूषणभूषिताः ॥२९॥
लङ्का शङ्काकुला जाता, चम्पा कम्पमवाप्नुयात् ।
विशालाऽप्यविशाला हि, यत्पुरोऽप्यलकाऽलका ॥३०॥
देशायातक्रयाणादि-वस्तुविक्रयशालिनी(नि) ।
श्रीमत्**पत्तननगरे**, धनि(न?)धान्यविराजिते ॥३१॥
अनन्यरूपसौभाग्य-भाग्यसौन्दर्यशालिनाम् ।
श्रीमत्(च्छ्री)**तातपादानां**, क्रमन्यासपवित्रिते ॥३२॥ युग्मम् ॥

**अथ श्रीमण्डपदुर्गवर्णनम्-**

सदण्डा यत्र राजन्ते, प्रासादाश्चाऽर्हतां सदा ।
अङ्गुल्या दण्डमिषतो, दर्शयन्ति दिवं किमु ? ॥३३॥
ग्रहणं सूर्य-चन्द्राणां, जडत्वं यत्र वारिणि ।
दरिद्रतासु दारिद्र्यं, तरुपत्रेषु कम्पता ॥३४॥
द्वैमुख्यं मद्दले यत्र, तत्रैव करकुट्टनम् ।
मोटनं स्फोटनं यत्र, दन्तधावनकर्मणि ॥३५॥
कुरङ्गत्वं मृगे यत्रो-द्धत्वं समदहस्तिनि ।
पृषोदरादिषु ज्ञेयो, निपातो यत्र नो पुरे ॥३६॥
*यत्र निस्त्रिंशता खड्गे, मुष्टिबन्धोऽपि तत्र हि ।
निर्नामिकत्वं यत्राऽसी-न्मत्कुणेषु जने न हि ॥३७॥
व्यसनं यत्र दानेषु, नीचत्वं यत्र वारिणि ।
दात्रदेशेषु वक्रत्वं, यत्र पुण्यस्य बन्धनम् ॥३८॥
यत्र श्राद्धाः सदा दान-विधिविज्ञानशालिनः ।
जिनेन्द्रधर्ममर्मज्ञाः, साधुसेवापरायणाः ॥३९॥
श्राविका यत्र राजन्ते, सतीजनमतल्लिकाः ।
जिनधर्मरता नित्यं, शुद्धसम्यक्त्वसंयुताः ॥४०॥
पद्मिन्यो विकसत्कोशा, निर्यद्भ्रमरपङ्क्तयः ।
स्वकान्तकरसंस्पृष्टाः, सहर्षाः स्युर्न योषितः ॥४१॥

*इत आरभ्याऽस्य पत्रस्य बहवः श्लोकाः मुनिहीरचन्द्रेण श्रीविजयदेवसूरिं प्रति प्रेषिते पत्रेऽपि सन्ति । मुनेरस्य नाम अस्मिन् पत्रे लेखकस्य सहवर्तिषु दृश्यते ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

त्रियामाविरहोद्भूत-ज्वरापगमकोविदम् ।
अवाप विधुरा चक्र-वाकी हृदयवल्लभम् ॥४२॥
कुण्डोध्न्यः प्रक्षरद्दुग्धा जिह्वास्पृष्टैकतर्णकाः ।
दामनीबन्धनं त्यक्त्वा, ययुर्गावो वनान्त(न्ति)के ॥४३॥
सस्नेहाः सग(गु)णाश्चैव, तमोदर्शितमार्गकाः ।
पात्रसंस्था अपि पा(प्रा)पु-र्म्ला(र्म्ला)निं कज्जलकेतवः ॥४४॥
लूतातन्तुपटाशङ्का-मवाप रजनीकरः ।
गतोद्यमा इव स्पष्टं, क्षयमापुश्च तारकाः ॥४५॥
गिरेर्गुहासु वसतिं, भेजे भीत्या तमोभरः ।
अपश्रियः कुमुद्वत्यो, भेजुः सङ्कोचमुल्व(ल्ब)णम् ॥४६॥
तदेभ्यजनयुतायां, संसदि प्रतिवासरम् ।
**धर्मकल्पद्रुमाख्यस्य**, वाचना प्रविधीयते ॥४७॥
श्रीमज्जिनेन्द्रभवने-ऽभवन् स्नात्राणि भक्तितः ।
तथैव साधुवर्गस्या-ऽध्ययनाध्यापनादिकम् ॥४८॥
इत्यादि धर्मकार्याणि(र्ये हि), क्रियमाणे निरन्तरम् ।
सर्वपर्वशिरोरत्न-मगाद् **वार्षिक**सञ्ज्ञकम् ॥४९॥
दुष्टाष्टकर्मसङ्घात-घाति षष्टाष्टमादिकम् ।
विधानं तपसो जात-मात्मनः शुद्धिसिद्धये ॥५०॥
व्याख्यानैर्नवभिस्तत्रा-ऽनल्पसङ्कल्पपूरणे ।
वाचनं **कल्पसूत्रस्य**, कल्पद्रुरिव जङ्गमः ॥५१॥
मार्गणद्रविणादानं, शोषणं दुष्टकर्मणाम् ।
**लोचनेन्दु(१२)मितान् घस्रान्, जीवामारिप्रवर्तनम्** ॥५२॥
महामहःसमं य(ज)ज्ञे, चैत्यानां परिपाटिका ।
मन्ये सिद्धिवधूभाले, पत्रालीच(व) मनोरमा ॥५३॥
इत्यादि पुण्यकृत्यानि, बभूवुस्तातनामतः ।
जायन्ते च तथा नित्यं, तातानां सौम्यचक्षुषा ॥५४॥

अथ परमगुरुगच्छाधिराजश्रीविजयसिंहसूरीन्द्रचन्द्रवर्णनम्-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कामं कामगवी-सुरद्रुमलतामुख्याः पदार्थाश्च ये,
चिन्तारत्न-विचित्रचित्रलतिका-सत्कामकुम्भादयः ।
सर्वेषां निजचित्तकल्पितमहाभीष्टार्थसंसाधका-
स्तेभ्यस्त्वं मम वाञ्छितार्थकरणाधिक्यं दधानो जय ॥५५॥
आस्यं यदीयं प्रतिभाषतेऽत्र, सरोरुहं वाऽतिमनोहरश्रि ।
समुल्लसल्लोचनचञ्चरीकं, सद्वृत्तताशालिविशालशोभम् ॥५६॥
येषां गुरूणां पदपद्मयुग्मं, ये ये नमस्यन्ति सदाऽऽदरेण ।
तांस्तान् जनानाऽऽशु समाश्रयन्ते, तास्ताः समग्राः सकलाः कलाश्च ॥५७॥
श्रीमत्(तः) सूरिराजेन्द्र(न्दोः), वयं के गुणवर्णने ।
यत्कीर्तिकामिनीभाले, कस्तूरीतिलकं नभः ॥५८॥
श्रीमत्[श्री]सूरिराजेन्द्र-निर्माणे ब्रह्मणः करात् ।
परमाणुकणाः कीर्णाः, कर्ण-कल्पद्रुमादयः ॥५९॥
वर्योऽपि तुर्यारक एव सूरे!, चेतश्चमत्कारकरो न चाऽऽसीत् ।
प्रशंसनीयः किल पञ्चमोऽयं, यत्र प्रभो! त्वं जनतारकोऽभूः ॥६०॥
श्रीमत्**तपागच्छ**सुराजलक्ष्मी-र्न त्वां विना शोभत एव देव! ।
कार्त्तस्वरीयोत्तमभाजनं विना, व्याघ्रीपयस्तिष्ठति नो कदापि ॥६१॥
अयि गुरो! तव कीर्तिनटी स्फुटं, त्रिभुवने किल नृत्यति रङ्गतः ।
श्रवणसम्पुटतः पतिते किमु, शशि-रविच्छलतः शुभकुण्डले ? ॥६२॥
इलातलमिलन्मु(न्मौ)लिः, संयोजितकरद्वयः ।
शिष्याणु**र्मेघचन्द्रा**ख्यो विज्ञप्तिं तनुतेतराम् ॥६३॥
तथा **श्रीतातपादा**ब्ज-सेविनां शिवकाङ्क्षिणाम् ।
यथार्हं नत्यनुनती, प्रसाद्य[द्ये?] करुणापरैः ॥६४॥
भव्याः! प्रमादमवधूय भजध्वमेनं, सूरीश्वरं **विजयसिंहगणाधिराजम्** ।
**ऊकेशवंश**वरनीरधिपूर्णचन्द्रं, मायारसाधरविनाशविधौ सुरेन्द्रम् ॥६५॥
तत्रैव शुभ्रतरभूरियशोभराम्बु-राशिप्लवेन किल पूरितविश्वविश्वाः ।
साधुव्रजेप्सितसुकार्यविधानदक्षाः, श्रीहस्ति**हस्तिविजया**भिधकोविदेन्द्राः ॥६६॥
मेधावधीरितसुचित्रशिखण्डिजा हि, श्रीपं.**जितोदयशुभा** विबुधप्रतीताः ।
अश्रान्तशान्तविषयादिसपत्नसार्थाः, श्रीसार**सु( मु )क्तिविजया** विबुधप्रधानाः ॥६७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

श्रीसत्यविजयविबुधाः, विबुधाः श्रीहर्षविजयनामानः ।
श्रीवीरवीरविजय-मुनयः श्रीलालु(ल?)विजयाख्याः ॥६८॥
तत्राऽत्र हीरचन्द्राख्यो, वृद्धिचन्द्रस्तथा मुनिः ।
इत्यादयो नमन्ति स्म, तातपादपयोरुहम् ॥६९॥
यदत्र लिखितं लेखे, मदीयमतिमान्द्यतः ।
क्षन्तव्यं तत्क्षमासारै-र्न्यूनं वाऽधिकमेव हि ॥७०॥

तथाऽत्रत्य सङ्घः प्रणमति । शिशूचितं कार्यं प्रसाद्यम् । तथाऽत्र परिसरे **पडधरीपुर मयाणी** च नाम ग्राम(मः) द्विस्थानकयोग्यो वर्तते । साम्प्रतं यद्यादेशपट्ट(ट्टे) तन्नाम लिखितं स्यात् तदाऽऽदेशपट्टलिखनावसरे श्रीताता अवधारयन्त्यपि ।

अन्यच्च- योगोद्वहनादिकविषये बह्व्युत्कण्ठा वर्तते । तेनाऽस्मिन् वर्षे तत्कृत्यं भवति तथा विधार्यम् । एतद्विषये श्रीताता एव सामग्रीमिलनप्रभवः ।

अन्यच्च- श्रीतातचरणारविन्दे मधुकरीभवितुकामः शीघ्रमेवाऽस्मि । तथाऽपि दूरदेशत्वाद् मार्गवैषम्याद् यदि कियन्ति दिनानि लगन्त्यपि । तथा श्रीतातैरेतत्कार्यं स्वकार्यीकृत्य येषामादेष्टव्यं भवति तेषामादेष्टव्यमादेश (तेषामादेष्टव्य आदेशः) । क्षेत्रादिसामग्री प्रसाद्या भवति । सा प्रसाद्यैव । नाऽत्राऽर्थे गजनिमीलिका सिंहशौण्डीर्यं वा चिन्त्यम् । अथैतत्कार्ये श्रीपूज्यचरणा एव स्रष्टार इति भद्रम् ।

* * *

ऐँ नमः ॥
श्रीमत्त्रिशलासुतः सौख्यं, तारः परमवीभवः ।
सततं निर्मिमीतां मे, तारः परमवीभवः ॥१॥
भवभीतिभरात् पान्तु, सकलाः कलायान्विताः ।
जिनाधीशा जगज्जन्तून्, सकलाः कलयान्विताः ॥२॥
श्रीमज्जिनाधिराजस्य, मतं विभववर्द्धनम् ।
विश्राणयतु मे नित्यं, मतं विभववर्द्धनम् ॥३॥
श्रीमत्सिद्धायिकां स्तौमि, वरदाममदां सदा ।
हीरालङ्कारसंयुक्तां, वरदाममदां सदा ॥४॥ इतिश्री महावीरस्तुतिः ॥
श्रेयोऽस्तु लेखक-पाठ(क)योः ॥ श्रीरस्तु सङ्घस्य ॥

* * *

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर, सूरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( १२ )

# पुरबन्दिरस्थ–श्रीविजयप्रभसूरिं प्रति
# राजनगरतः पण्डितश्रीनयविजयस्य लेखः

स्वस्तिश्रीरङ्गभूमिर्भवभयतिमिरध्वंसहंसप्रकाशः,
संकाशः पुण्यकल्पद्रुमनवकुसुमप्रोद्गमस्य प्रसर्पन् ।
हासः पाथोधिमाथोद्भवदमृतरसस्यन्दमन्दक्रमस्य,
श्रीसिद्धार्थस्य सूनोर्जयति भगवतः कोऽप्यहो ! दृग्विलासः ॥१॥

स्वस्तिश्रीदानहर्षात् कृतभविकमनःक्षेत्रपीयूषवर्षाः,
सामर्षा मोहमल्लस्मयदलनविधौ ध्वस्तरोषप्रघर्षाः ।
दुर्धर्षा दुर्मतानां प्रगुणितसमताजन्मभूपारमर्षा-
भूयासुः सन्निकर्षाद्विपुलवृषपुषो वीरभावप्रकर्षाः ॥२॥

स्वस्तिश्रीः पद्मखण्डं ध्रुवमलिमलिनं सिन्धुमौर्वाग्निदुःस्थं,
स्फीतां पीताम्बरीयां तनुमपि दलितोद्दामदैत्यास्त्रमिश्राम् ।
त्यक्त्वा यत्पादपद्मं धृतरतिरभजत् सर्वतोऽवद्यमुक्तं,
मुक्तिस्त्रीभोगलीलां दिशतु स भगवान् भाविनां वर्द्धमानः ॥३॥

स्वस्तिश्रीमन्नतेन्द्रस्फुटमुकुटमणिव्रातकान्तिप्ररोहै-
श्छिन्दन्तु त्रैशलेयक्रमयमलनखा दन्तुरा नन्तुरागः ।
साधर्म्याज्जातमोदो मृगपतिरतनोदङ्कदम्भेन सेवां,
येषां कामेभकुम्भस्थलदलनरसस्पष्टसान्द्रष्टिकेन ॥४॥

स्वस्तिश्रीसद्मपद्मक्रमसमनुसृतानम्रकम्रेन्द्रमौलि-
प्रेङ्खन्माणिक्यमालामिलदलिपटलीदत्तविश्वाद्भुताय ।
भम्भासारे विदम्भाशयभजनपरे पुण्यसम्भारलीलां,
रम्भानाथानवाप्यां सपदि विदधते वर्द्धमानाय भद्रम् ॥५॥

अङ्कारूढमृगो हरिर्न भुजगातङ्काय सर्पासुहृ-
न्निश्शङ्काश्च सुरासुरा न च मिथोऽहङ्कारभाजो नृपाः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यद्व्याख्याभुवि वैरमत्सरकृतातङ्का न पङ्कावहाः,
**श्रीमद्वीर**मुपास्महे त्रिभुवनालङ्कारमेनं जिनम् ॥६॥
यस्याऽभिधानाज्जगदीश्वरस्य,
समीहितं सिध्यति कार्यजातम् ।
सुरासुराधीशकृतांह्रिसेवः,
पुष्णातु पुण्यानि स **वीरदेवः** ॥७॥
अनाकलितमन्यथाकलितमन्यतीर्थेश्वरैः,
स्वरूपनियतं जगद् बहिरिवान्तरालोकते ।
य एष परमेश्वरश्चरणनम्रशक्रस्फुरत्-
किरीटमणिदीधितिस्नपितपादपद्मः श्रिये ॥८॥
दृप्यद्यन्नखदर्पणप्रतिफलद्वक्त्रेण वृत्रद्रुहा,
शोभा काऽपि दशावतारसुभगा लब्धाऽनुजस्पर्द्धिना ।
मुक्तिद्वारकपाटपाटनपटू दौर्गत्यदुःखच्छिदौ,
तावंह्री शरणं भजे भगवतो **वीरस्य** विश्वेशितुः ॥
चञ्चत्काञ्चनकान्तिकान्तिरनिशं गीर्वाणजुष्टान्तिको,
विक्रान्तिक्षतशत्रुरस्तजननभ्रान्तिः सतां शान्तिकृत् ।
**वीर**स्तान्तिमपाकरोतु भगवान् कल्याणकल्पद्रुमो,
धीरा यस्य सदा प्रयान्ति शरणं पादौ शुभप्रार्थिनः ॥१०॥
गतप्रत्यागतैर्यस्य, स्तवं कुर्वन्ति साधवः ।
पाण्डित्यडिण्डिमध्वान-भृतब्रह्माण्डमण्डलाः ॥११॥
तथाहि- *सेवारसां रक्षदमाश्रयाच्छा, भूयादयार त्वयि मे क्षतांहः ।
हताक्षमेऽयि त्वरया दयाभू, च्छायाश्रमादक्षरसारवासे ॥१२॥
वंदे रवीनुन्नतकांतिजातैः, पराजयंतं द्विमतावमाक्षम् ।
क्षमावतामद्वितयं जरापं, तैर्जातिकांतन्ननु वीरदेवम् ॥१३॥
तेजसाक्षपरवत्तयानया, तातसंक्षुभितहृद्यतारधीः ।
धीरताद्यहृतभिक्षुसंतता, यानयात्तवरपक्षसाजते ॥१४॥
पाताविद्यामुक्तसंज्ञाप्रकारे, सातेदत्तासर्वगत्यासदामा ।
मादासत्यागर्वसत्तादतेसा, रेकाप्रज्ञासक्तमुद्यावितापा ॥१५॥

* एतेषां गतप्रत्यागतश्लोकानामर्थावगतेः प्रायोऽभावात् पदच्छेदादिकं न विहितं - सं. ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तारसारस्वतेद्धाशु-हरते द्युसदां मनः ।
नमदासद्युतेरंह; शुद्धा ते स्वरसारता ॥१६॥
व्रातीताभूस्तेस्वाराधा-मायामानागाराच्छया ।
याच्छरागानामायामा-धारास्वास्तेभूतातीव्रा ॥१७॥
नासवाक्षपरावर्त्त्या-क्तामुदारं त्वदागमे ।
मेगदात्वरदामुक्ता-र्त्यावरापक्षवासना ॥१८॥
संहारधीपक्षमथाप्रकाशं, न ते मनः पुण्यगतं कदाचित् ।
चिदाकतं गण्यपुनर्मतेन, शंकाप्रथामक्षपधीरहासम् ॥१९॥
मतगौरवगत्यास, भेजे रागं त्वयि व्यभाः ।
भाव्ययित्वगराजेभे, सत्यागं वरगौतमः ॥२०॥
त्वामनंजितमसक्तिमुदंकं, ज्ञामसत्यभृतहृत्वमवंदे ।
देवंमत्वहृतभृत्यसमज्ञा, कंदमुक्तिसमतं जिन मत्वा ॥२१॥
त्वं सत्यसारस्तनुभावभास्व, शमीदमोदर्कततं श्रियानः ।
नयाश्रितं तर्कदमोदमीश, स्वभावभानुस्तरसात्यसत्वः ॥२२॥
वैभारसानुक्वपदांचितं त-दवार्यवातव्यसनासहाम ।
महासनासव्यतवार्यवाद, ततं चिदापक्वनुसारभावैः ॥२३॥
बलपात्रनतेद्राक्षु-राभां येन वितागसः ।
संगताविनयेभाराः, क्षुद्राः तेन त्रपालवम् ॥२४॥
तारितेहितदादान-वादेसारकदत्वया ।
यात्वदंकरसादेवा-नंदादांतहितेरिवा ॥२५॥
इत्थं यस्य सुधोर्मिवर्मितमपि स्तोत्रे क्रमैः कोमलै-
र्दुःप्राज्ञस्मयदारणात् कठिनमप्युज्जृम्भते नो वचः ।
**वीरः** क्षीरसमुद्रसान्द्रलहरीगम्भीरधीराजितः,
सोऽस्माकं वितनोतु वाञ्छितफलं धीरस्त्रिलोकीगुरुः ॥२६॥
एनं मेरुविराजि**राजनगर**श्रीवल्लिपाथोधरं,
यात्रोत्साहधरैर्नरैः कृतमहं तत्तत्प्रदेशागतैः ।
कस्तूरीघनसारचन्दनमिलत्कश्मीरजन्मद्रवै-
र्नित्यं निर्मितपूजनं जिनवरं **वीरं** प्रणम्याऽऽदरात् ॥२७॥
॥ इति श्रीदेववर्णनम् ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

★

॥ अथ नगरवर्णनम् ॥

यदीयाः प्रासादा गगनशिखरैस्तुङ्गिममदात्,
सह स्पर्द्धाभाजस्तदुपरि भयत्राण्यदुरिव ।
समुन्मीलन्त्येषु प्रसृमरतरश्रीसमुदयः,
परेषु श्यामत्वं स इह जयभङ्गव्यतिकरः ॥१॥

यदीयप्रासादेष्वनलस्थितकृष्णागुरुगुरु-
स्फुरद्धूमे चञ्चन्मणिकिरणदेवेन्द्रधनुषि ।
मृदङ्गोरुध्वानस्तनितसुभगे विस्मयरसा-
दकाले पाथोदभ्रमममरवध्वो विदधति ॥२॥

मणीमुक्ताहारं दधति मम सारं स्तनतटे,
सुधामेतां मुग्धास्तव मृगदृशो व्यक्तमधरे ।
समक्षं लोकानामिति कृतविवादो जलनिधि-
र्यथावेलं यत्र ध्वनिजनितभीर्वल्गति मुहुः ॥३॥

अपि त्रासादासादिततरलभावात् स्थितमहो,
पदौ पद्भ्यां बद्ध्वा निजजनशुभादृष्टनिहितम् ।
समादत्ते मत्ते भवति कलहे घर्घररवा-
न्न रत्नानां राशिं किमु यदधमर्णो जलनिधेः ॥४॥

रमाभिभ्याः सभ्याः सुमधुरगिरः सर्वममृतं,
यदीयं गाम्भीर्यं जगृहुरगृहस्थाश्च गुरवः ।
अतो यत्राऽम्भोधिः प्रलपति किमप्यस्फुटरवः,
श्रवःप्रीत्यै कस्याऽप्यहह नहि तन्निर्धनवचः ॥५॥

श्रियं दत्त्वा यस्मै तदिह गृहजाममृतिधयो(मृतधियो)-
ल्लसत्प्रेमस्थेमोदधिरधितमूर्च्छद्विरहभीः ।
असौ वस्तु स्वाप्तं वितरति तदस्मै किमनिशं,
न वाल्लभ्यात् सर्वक्षितिवलयवृत्यद्भुततरम् ॥६॥

अहं शङ्के पङ्केरुहजघटजन्मप्रकृतिविद्,
यदङ्के पाथोधिर्लुठति तदयं तस्य जनकः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

महत्ता चैतस्य स्वमिह जनकार्यैव ददत-
स्तदाशीर्दासीति स्फुटमघटमानं किमपि नो ॥७॥
स्मितां यत्र स्त्रीणां वदनततिमुद्वीक्ष्य तमिमं,
मुहुः कायव्यूहं निजसुतविधोरेव विमृशन् ।
तरङ्गै रङ्गैः स्वैर्मुदमिव विवृण्वन् समुदितां,
प्रवालोद्यद्रोमा जलधिरिह नृत्यं वितनुते ॥८॥
हृते चन्द्रे देवैस्तनयविरहोर्वाग्निदलितः,
स्वमज्ञासीदब्धिः सुतविरहिणामाद्यमधनम् ।
इदानीं यत्पोतांस्तनयशतमासाद्य मुदितो,
धुरि स्वं जानीते तनयसुखभाजां गतवयाः ॥९॥
इलावेलाखेलाप्लुतपवनहेलाहतरत-
श्रमाणां यद्वाटीष्वमिलितकपाटीकृतमुदाम् ।
शुभंयूनां यूनां रतिरतिशयं याति किल या,
लभन्ते तां देवा अपि न चतुराश्चैत्ररथगाः ॥१०॥
स्फुरत्तारारत्ते तदुपरि परिभ्राम्यदुदक-
स्फुटश्यामच्छाये बहुमकरदुष्टग्रहभृते ।
नदन्ते कस्याऽब्धेर्नभसि निशि यत्राऽद्भुतरसं,
महामायाच्छायाहितपुटपरावृत्तिमहिमा ॥११॥
जगज्जैत्रा मैत्रावरुणिसदृशा यत्र गुरवो,
न लेशादप्यागः किमधिकरवै(वैः?) तत्र नियतम् ।
नमस्कर्तुं तस्मै तदुदधिरधिष्ठातृजनित-
श्रिये वेलादम्भात् कलयति न दण्डव्रतशतम् ॥१२॥
भृशं शुभ्रैश्चैलैश्चलतरतरङ्गैश्च मिलितौ,
यदीयो हट्टाध्वा जलनिधिरुभौ चामरधरौ ।
वितन्वाते वादं सममणिधनावुद्धुररवौ,
जयं भङ्गं वोच्चैर्दिशत इह चिह्नाहतिहती ॥१३॥
विमानैर्बोहित्थैर्नभसि जलधौ क्लृप्तगतयो,
मनोभव्याहाराः समभिलषितार्थप्रणयिनः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अविम्लानैर्माल्यैः सुरभितदिगन्ता धनभृतो,
नृदेवा देवा वा दधति विभिदां यत्र न मिथः ॥१४॥
यदीयाश्मच्छिद्रोच्छलितजलसिक्तं किल नभो,
बभौ गङ्गामज्जत्सुरगजकरोत्क्षिप्तजलयुग् ।
अधस्तादुत्प्रेक्ष्य प्रतिगजसमुज्जृम्भितमिदं,
किमु क्रोधध्वानैर्बधिरयति नद्यां सुरगजः ॥१५॥
यदीयाश्मच्छिद्रोच्छलदतुलपाथोधिलहरी,
चरीकर्त्ति स्वान्ते स्मरणपथपान्थं प्रचलितम् ।
मरुत्पूरक्रूरक्षुभितशतपातालकलश-
प्रसर्पद्वेलौघं गगनतलभेदव्यवसितम् ॥१६॥
सुधाकुण्डादेतत् फणिगरलतीव्रानलयुजः,
किमुत्फेनं प्रोच्चैरुदितममृतं श्वभ्रविवरात् ।
यदीयाश्मद्वारोच्छलितजलमुद्वीक्ष्य कवयः,
सृजन्तीत्युत्प्रेक्षालहरिपरिरम्भं स्वहृदये ॥१७॥
न चापज्यारोपो न च परकृतेरादरभरो,
न संस्कारा वक्रा न च पलफलालम्बनमपि ।
भुजेनैव स्पष्टं य इह कुरुते मङ्गलमसौ,
गुरुः कोऽपि ज्योतिर्विदतिशयि(य?)वान् [illegible] ॥१८॥

न्यायसारतया यत्र, सतामस्ति नवं धनम् ।
प्रवर्त्तते परं यूनां, कामिनीभुजबन्धनम् ॥१९॥

कठिनाः केवलं यत्र, कामिनीनां पयोधराः ।
जडात्मानश्च वीक्ष्यन्ते, वर्षास्वेव पयोधराः ॥२०॥

यत्र लीलासु नारीणां, रसना मुखरायते ।
गुणग्रहे पुनः पुंसां, रसना मुखरायते ॥२१॥

कथं मारभयं यत्र, कामिनीनां प्रवर्त्तते ।
अहो ! मारव्यथाकारि, यत् कौमारहरं वयः ॥२२॥

अनीतिर्यत्र नाऽस्त्येव, नाऽपीतिर्विद्यते क्वचित् ।
अहो ! तदेतदुभयं, दुर्घटं घटतां कथम् ॥२३॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तत्र राजन्वति प्रौढ-स्वर्गश्रीपश्यतोहरे ।
श्रीपूज्यांह्रिरजःपूते, नगरे **पुरबन्दिरे** ॥२४॥

॥ इति श्रीपुरबन्दिरवर्णनम् ॥

॥ अथ राजनगरवर्णनम् ॥

अन्येषां नयनैककौतुककरी भूयः स्पृहाशालिनां,
या विभ्राजति राज**राजनगरी** राजैकभोगोचिता ।
चञ्चत्काञ्चनचारुभूषणझणत्कारावधानस्खलद्-
गच्छन्मत्तयुवक्रमक्लमनमच्चेतोभिरालिङ्गिता ॥१॥
यस्या मध्यमगस्तिपीतसलिलं रत्नाकरत्वं स्फुटं,
धत्ते काऽपि न वीक्ष्यते तदिह भूरत्र प्रवालोज्झिता ।
पाथोधेश्चुलकं चिकीर्षुरुदकं हस्तं हि तावन्मुनिः,
चिक्षेप प्रययौ न यावदमलाद्रत्नोच्चयादप्यधः ॥२॥
प्रातः पूजार्थरत्नोपकरणकिरणैः स्फारितैः स्वर्णपुञ्जै-
र्मध्याह्ने मूर्च्छितायां सदरुणघुसृणैर्व्यापितापैश्च सायम् ।
चञ्चच्चक्राङ्गपक्षाहतगगननदीशीकराश्लेषरुच्यो,
यस्यां सौधाग्रजाग्रद्ध्वजपटकपटस्तन्यते वातपक्षः ॥३॥
लङ्का सरस्वदङ्के-ऽत्यङ्के याऽवस्थिता सरस्वत्याः ।
धत्ते तत्सापत्न्यं, कलितालङ्कारसर्वस्वा ॥४॥
तस्या **राजनगर्या**, वर्याश्चर्यार्पणत्रिदशवल्ल्याः ।
मणिधनधान्यभृतायाः, पारमितायां वितरणे च ॥५॥
अलङ्कृतशरीरः स-न्नुद्भिन्नपुलकाङ्कुरैः ।
हर्षवर्षसमुद्भूतैः, कदम्बैरिव सर्वतः ॥६॥
आददानः श्रियं प्रौढ-स्नेहपूरितया दृशा ।
भृशमुन्निद्रपत्रस्य, शतपत्रस्य सर्वतः ॥७॥
विनयव्यवसायार्ह-वाग्विलासमनोहरम् ।
आतन्तनीति विज्ञप्तिं, **नयादिविजयः** शिशुः ॥८॥
यथाकृत्यं चाऽत्र भास्व-त्प्राचीवदनदर्पणे ।
आरोहत्युदयक्ष्माभृ-च्छिखरं भानुमालिनि ॥९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रापितायां सभायां च, सभ्यैः शोभां प्रथीयसीम् ।
अपि शक्रसभाशोभां, हसन्त्यामिव सर्वतः ॥१०॥
श्रीमत्क्रमयुतोपान्त्य-स्वाध्यायकृतिपूर्वकम् ।
**वैराग्यकल्पलतिका**-व्याख्यानं स्फारितादरम् ॥११॥
उद्योगो ब्रह्मतुल्यादेः, **कादम्बर्या**दिपाठनम् ।
सिद्धान्तपद्धतिं स्फार-विचारपरिचारणम् ॥१२॥
अपरं च यथायोगं, पाठनं पठनार्थिनाम् ।
इत्यादि धर्मकृत्कर्म, शर्मदायि व्यजृम्भत ॥१३॥
तदिदं निजसाम्राज्य-मुद्वीक्ष्याऽऽनन्दमेदुरम् ।
**श्रीमत्पर्युषणापर्व**, धर्मसर्वस्वमागतम् ॥१४॥
विदधे विधिना तस्या-ऽप्यातिथेयी किलोचिता ।
पूर्वमासनदानेन, महाडम्बरकौतुकैः ॥१५॥
ततः पाद्यप्रदानेन, वाग्विलाससुधाभरैः ।
अर्घपूजाप्रदानेन, युक्तिपुष्पैर्विकस्वरैः ॥१६॥
दिनानि पञ्च **श्रीकल्प-सूत्र**व्याख्यानमूर्त्तिभिः ।
कल्पद्रुमफलैर्भुक्ति-विधिप्रीणनपूर्वकम् ॥१७॥
प्रभावनाभरैश्चैत्य-परिपाटीप्रथीयसा ।
तथोत्सवेन महता-ऽभ्यागतागमसूचिना ॥१८॥
ब्रह्मणो भेजुषः प्रीतिं, प्रसादात् तस्य चाऽऽशिषाम् ।
सम्प्रत्यपि ददच्छर्म, धर्मकर्म प्रवर्त्तते ॥१९॥
कारणं भगवद्भक्ति-स्तत्र नूनमभङ्गुरा ।
तथा **श्रीपूज्यपादाना**-मभ्युपास्तिः प्रथीयसी ॥२०॥

॥ अथ श्रीगुरुवर्णनम् ॥

निरीक्ष्य चन्द्रादधिकं यदास्यं, विधाय चन्द्रं विधिरन्वशेत ।
एतज्जयादस्य यशोऽस्त्विति स्व-श्रमेऽपुनर्भावमसौ युयोज ॥१॥

यदाननं संवलितं कलाभि-र्द्वात्रिंशता दन्तनिभाभिरन्तः ।
क्व स्पर्द्धतां शीतकरो विमानी, समन्वितः षोडशभिः कलाभिः ॥२॥

चन्द्रेण सङ्कोचयता सरोजं, यदर्जितं रात्रिविलासभाजा ।
निःशङ्कसङ्कोचितचन्द्रमब्ज-मशोधयद् वैरमदो यदास्यम् ॥३॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पीत्वैव चन्द्रस्य रुचिं यदास्यं, दिने दिने कान्तिविवृद्धिमेति ।
सा नौचिती पीतपयोनिधीनां, क्रमागतानां न कुले मुनीनाम् ॥४॥
यदीयवक्त्रस्य गुणाकरस्य, दोषाकरेणोपमितेर्विचारः ।
वाचां क्व सञ्चारमुपैतु सार-सारस्वतश्रोतसि संप्लुतानाम् ॥५॥
यदाननौपम्यमवाप्तुमुच्चैः, सम्भावनारूढतदाप्तिलुब्धः ।
अङ्कच्छलाच्छन्नधृताक्षमालो, मन्त्रं जपत्येष विधुः किमभ्रे ॥६॥
पीयूषसन्तर्पणतो द्विजानां, महेश्वरोपासनया च नित्यम् ।
यदाननस्योपमितिं कथञ्चि-ल्लब्ध्वा विधुर्नृत्यति मोदमत्तः ॥७॥
बहिर्गतां यां त्रिदशा निपीय, रिक्तां विधुस्तां परिपक्वपुण्यः ।
मुखीभवन् यस्य विधुः सुधां स्वां, जिह्वामिषादन्तरसौ बिभर्त्ति ॥८॥
कथं यदीयं विजयेत वक्त्रं, बालो विधुर्येन पिता यदीयः ।
गृहीतगाम्भीर्यमहत्त्वमुद्रः, कृतो ह्यगस्तेः चुलुकः समुद्रः ॥९॥
विधोर्विधाता वदनं विधातुं, जग्राह स्वस्याऽनवशेषसारम् ।
भ्रमत्यतोऽसौ किल तूलतुल्यो, निस्सारभावादनिलः(ल?)प्रणुन्नः ॥१०॥
अभ्यर्थ्य तेजो लभते यदिन्दु-र्भानुं मिलित्वा किल मासि मासि ।
क्व तोल्यतां याचितकेन तेन, निसर्गतेजोऽभिमतं यदास्यम् ॥११॥
यदीयमास्यं च विधुं तुलाया-मधाद् विधाता कुतुकी किमुच्चैः ।
नत्युन्नती सर्वजनप्रसिद्धे, तत्तत्तुलापात्रगते यदेते ॥१२॥
स्पर्द्धां दधानः सह यन्मुखेन, मुधा सुधांशुर्यदभूत् कलङ्की ।
परःसहस्राः शरदो द्युनद्यां, स्नात्वाऽपि तन्नायमुपैति शुद्धिम् ॥१३॥
मुख्यः शशी यद्वदनं सुधाब्धि-रन्यः [श?]शी पङ्कजमङ्कभृङ्गम् ।
नभोनदीसङ्गतमन्यथाऽस्य, कुतस्तदीयोदयतो निमीला ॥१४॥
यदीयवक्त्रेण समं विवादे, विधीयमाने स्खलितः किमिन्दुः ।
जागर्ति तत्र स्खलितस्य चिह्न-मङ्को न पङ्को गलितांह्रिरेखः ॥१५॥
यदीयवक्त्रेण समं विवादे, कृते विधुर्भङ्गमवाप तूर्णम् ।
अमर्षणो नित्यमटन् जगत्यां, स वीक्षतेऽन्यं किमु तद्विजेत्रं ॥१६॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

विधाय यद्वक्त्रविधुं तदीय-ग्रहे वितन्वन् विधुलम्बनानि ।
ब्रह्मा भचक्रैः क्षपयन् घटीं किं, न ब्रह्मतुल्यं स्मरति स्वचित्ते ॥१७॥

पूर्णीभवन्निन्दुरवैति न स्वं, पूर्णं यदास्योपमितानवाप्तेः ।
अपूर्णमित्यस्य मनः क्रमेण, तनोः कृशत्वं कुरुतेऽनुतप्तम् ॥१८॥

कलाऽद्वयस्योपनिषत् स्वधीता, यथा यदास्ये च सुवृत्तभावात् ।
अभाणि नैवाऽस्थिरवृत्तभावात्, तथोद्यतेन द्विजनायकेन ॥१९॥

एवंविधश्री**तपगच्छ**सूरि-पट्टप्रतिष्ठास्पदतां दधानैः ।
मेधाविनामद्भुतधीधनानां, गुणावलोकाय कृतावधानैः ॥२०॥

अचिन्त्यचिन्तामणिकल्पचित्त-सद्मस्फुटीभूतकलानिधानैः ।
अत्यच्छगच्छप्रभुताप्रदीप-तैलप्रचारारम्भमतिप्रधानैः ॥२१॥

गलद्विषादैर्विहितप्रसादै-र्धर्म्यानुयोगप्रवणे स्ववर्गे ।
द्विषन्मुखाम्भोरुहशीतपादै-र्विधूतनिश्शेषमहाप्रमादैः ॥२२॥

स्याद्वादपाथोधितरङ्गभङ्गा-वर्तान्तरुद्भ्रामिततीर्थ्यवादैः ।
सदा विनेयस्य हृदाऽवधार्या, श्रीपूज्यपादैः प्रणतिस्त्रिसन्ध्यम् ॥२३॥

तथा तत्र-

**लक्ष्मीविजया** विबुधा, निजधीलक्ष्मीविलासगोविन्दाः ।
**रविवर्धना**ख्यविबुधाः, परिषत्परिपोषिवचनसुधाः ॥२४॥

**जसविजया**ख्या विबुधा-**स्तपगच्छ**स्वच्छराज्यकृतचिन्ताः ।
**धनविजया**ख्या विबुधाः, स्नेहसुधासिन्धुशीतरुचः ॥२५॥

**तत्त्वविजया**ख्यगणय-स्तत्त्वविदो **हेमविजय**गणयश्च ।
साध्वी च **प्रेमा**ख्या, **मटूः** पटूभूतमतिरन्या ॥२६॥

इत्यादिसाधुसाध्वी-वर्गः श्रीपूज्यभजननिरतो यः ।
नत्यनुनती प्रसाद्ये, क्रमेण तन्नामसमनुसृते ॥२७॥

अत्र- **सौभाग्यविजय**-विबुधाः, स्वाभिमतन्यायजनितसौभाग्याः ।
**कमलविजया**ख्यविबुधाः, विबुधा **जसविजय**सञ्ज्ञाश्च ॥२८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**कान्हर्षयः** समर्था, गणयः **श्रीसत्यविजय**सञ्ज्ञाश्च ।
**भीमविजया**ख्यगणयो, **नरविजय**तपस्विनश्चाऽपि ॥२९॥

**हर्षविजया**ख्यगणयो, **हेमविजय**सञ्ज्ञकास्तथा गणयः ।
**तत्त्वविजया**ख्यगणयो, **लक्ष्मीविजया**भिधा गणयः ॥३०॥

**वृद्धिविजया**ख्यगणय-**श्चन्द्रविजय**सञ्ज्ञकास्तथा गणयः ।
**कर्पूरविजय**मुनयः, **शुभविजया**ख्यास्तथा मुनयः ॥३१॥

शैक्षो **विवेकविजयः**, साध्व्यश्च स्थानवासधृतधृतयः ।
इत्याद्यः श्रीपूज्य-क्रमकमलं नमति वर्गोऽयम् ॥३२॥

अत्रत्यो निश्शेषः, सङ्घोऽपि च सकलसङ्घमुकुटमणिः ।
नमति श्रीपूज्यपदौ, नखमणिदशगुणितकान्तिधरौ ॥३३॥

निद्राशीलेषु जने-ष्वलसे परिचारके च रविरुद्यन् ।
स्फोरयति यथा तेज-स्तथा यतन्ते महोनिधयः ॥३४॥

तत्क्रमविदां न कस्या-ऽप्युपदेश्यं किमपि पूज्यपादानाम् ।
विज्ञप्यं नु प्रकटं, नतिसमये भाविभावभृताम् ॥३५॥

लेखोऽयं सद्वृत्तैः, सद्योलिखनोदितैर्विदितभावैः ।
सृजतु परं सौभाग्यं, विहितः सौभाग्यपञ्चम्याम् ॥३६॥

इति श्रेयः ॥

—x—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(१३)

# श्रीविजयप्रभसूरिं प्रति पं.श्रीदर्शनविजयस्य महासमुद्रदण्डकमयो लेख:

स्वस्तिश्रीमदमन्दनन्दकनमन्नाकीन्द्रचूडामणि-
श्रेणीस्त्रग्मक _ _ _ _ _ पदद्वन्द्वारविन्द: प्रभु: ।
चेतश्चिन्तितपूर्तये भवतु व: **श्रीपार्श्वचिन्तामणि-**
र्भव्याम्भोजनभोमणिर्गृहमणिस्फारस्फटान्तर्मणि: ॥१॥

स्वस्तिश्रीस्फुरदिन्द्रनीलधवलं वर्ष्म व्यभात् **श्यामल-**
**श्रीपार्श्वस्य** विशेषितं फणिफणारत्नप्रभारेखया ।
उन्मीलन्नवरत्नकाङ्कुरशिर: किं नीलवद्भूभृतो,
वार्य्यन्तर्गतर _ _ [त्नभा?]कपिशितं कालोदधीयं किमु ॥२॥

स्वस्तिश्रीअमृतद्रवार्द्रितवपुर्वल्ली प्र _ _ ल्लसत्-
कह्लारादतिशायिसौरभभरा यस्योज्जजृम्भे विभो: ।
शङ्के शान्तरसोऽन्तरालवसतिर्निर्यात्यमान्तो(मातो?) बहि-
स्तस्मै कश्मलघस्मरैकमहसे **पार्श्वाय** पुंसे नम: ॥३॥

स्वस्तिश्रीफलकन्दली सकुसुमा मूर्तित्रयी नेत्रयो:,
पीयूषाञ्जनवर्तिकाऽञ्जनरुचेर्यस्येव वर्गत्रयी ।
मूर्ता गारवशल्यदण्ड_[द]लिनी रत्नत्रयीवाऽद्भुता,
विघ्नव्यूहविहीनमाह्निकविधं देवो विधेयादयम् ॥४॥

स्वस्तिश्रीवृषभ: श्रियं सृजतु स श्रीराज _ _ [सिंहा?]वनी-
प्राणेश: किल राजपट्टधवलप्रासादशृङ्गध्वज: ।
वर्णं टङ्क _ _ [मितं?] _ _ _ चतुर्थांशेन तैलं च यत्,
पूजायै निजपूर्वजैरुपहृतं दत्ते _ _ _ _ _ ॥५॥

जयति **वृषभतीर्थनाथ:** सनाथीकृतानाथसार्थ: प्रथापूरपाथोधिनाथ: पृथु-प्रार्थितार्थार्पणव्यर्थितामर्त्यपृथ्वीरुह: प्रोल्लसन्मङ्गल: शस्यभामण्डलश्री: क्षमालक्षण:

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रस्फुरद्दक्षिणः साधुविश्वम्भरोऽभीक्ष्णसर्वंसहो मेदिनीमण्डलस्येव संलक्ष्यमाणोऽपि साक्षात् परंकुर्त(?) तादात्म्ययोगात् समग्रस्य चाऽऽधारभूतो जगज्जन्मिनां जीवनं पावनं पङ्किलानां पुनः सर्वदा नीरजोपायकारी महासाधनं चाऽपि पुण्यौषधीनां सुसीमामृतात्मेव यादोनिवासः परं नैव कीलालमुच्चैस्तदीयैकसारूप्यतः कृत्स्न-कृष्णापहारी प्रतापास्पदं दुस्तमःस्तोमहन्ता निवासो वसूनामविस्पन्दनं दुर्दशद्वीपिदृग्भिर्दुरालोकनीयो बृहद्भानुवन्नो परं कृष्णवर्त्मा कदापीषदन्विष्यमाणोऽपि किन्तु प्रकाशप्रभूष्णुर्भृशं दैत्यदेवाभिधेयो जगत्प्राणभूतो महावीर्यवर्यो प्रबद्धाभिचर्यात्मको मातरिश्वेव नैव द्विजिह्वप्रियो भञ्जनो नाऽपि नैवाश्रयाशस्य साहायिकं सन्दधत् स्पष्टमुट्टङ्क्यमानः सुखस्पर्शसम्पादनत्वाविनान्योपकाराय माकन्दरूपः स्फुरत्केशरोऽशोकरागः सुजात्यप्रियालातिभावोऽतिमुक्तः सदा श्रीफलस्फारपुन्नाग-पथ्यास्थितिर्भूमिरुड्जातिवन्नो पलाशी कुजातिर्जडो नाऽपि नाऽचेतनस्तत्सजातीय-भावेन नु च्छाययाऽऽह्लादयन् मेरुवद् भूमिमध्यस्थवर्ती सदापारिजातः प्रकृत्या सुवर्णाश्रयश्चूलयाऽलङ्कृता भद्रशालस्थितिस्सन्महानन्दनः श्रीर्विनीताधिवासीव विद्याविलासः सुपर्वास्पदं वंशवद् विस्तरद्धर्मकर्माधिकारी द्वितीयाश्रमस्थायि-वन्नाभिजातो विधातेव कल्याणनामार्जुनस्येव चाऽष्टापदावाप्तसिद्धिः क्रियासिद्ध-सत्पारदस्येव मृत्योर्विजेता वृषाङ्को गणेशार्च्यपादारविन्दः शिवो भूतभर्ता महातेजसो हेतुरीशानवत् कौशिकप्रीतिकृत्पुण्यपाथोधिनाथप्रवृद्धेरसाधारणं साधनं कौमुदी-कान्तवत् शान्तचेताः सतां दृक्चकोरीकिशोरीसमुल्लासलेलिह्यमानोल्लसच्चन्द्रम-श्चन्द्रिकाचारुनिर्यासरूपस्फुरद्रूपलावण्यधाराप्रसारैकभृङ्गारसारायितस्फीतमूर्ति-र्जगद्भाण्डकुक्षिम्भरिक्षीरनीराकरक्षीरपूरप्रतिस्पर्द्धिकीर्तिर्धुरीणो धराधीश्वराणां युगादौ पुरोगोऽपि योगीश्वराणां समग्रासुमन्मण्डलस्याऽभिगम्योऽन्तरङ्गारिघोरोपसर्गारिवर्गस्य भीमः स्वगोभिर्नभोरत्नवद् भासयन् भव्यराजीवखण्डं कृतक्रोधयोधावरोधो गलद्विक्रियः सत्क्रियोऽपि प्रजोपक्रियाव्याकृतालङ्क्रियातर्कसाहित्यशब्दानुशास्ति-प्रमाणागमौचित्यवादित्रनृत्यक्रियामन्त्रयन्त्रादिनिःशेषलोकव्यवस्थः पथि प्रस्थितः श्रेयसो मन्मथादित्यसून्माथसामर्थ्यपार्थो जनुर्विस्त्रसाकालधर्मव्यथादुःस्थितान् प्राणिसार्थान् सदा सुस्थितान् कर्तुकामः पयःपुष्करावर्तपाथोदवन्माथिमन्थाचलोन्मथ्य-मानाधिकक्षुभ्यदम्भोधिवद्धीरगम्भीरनिर्घोषया सर्वभाषाविशेषाहितोल्लेखयाऽनुष्ठितप्रष्ठ-पीयूषपेयारसोत्कर्षसंघर्षया भाषया भाषयामास नैर्ग्रन्थगार्हस्थ्यपन्थानमुत्थापिता-नेकदुस्तीर्थिकग्रन्थयूथं कृपामन्थरो यः प्रभुस्तं महाराणकं **राणपुर्याः** चतुर्वक्त्र-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

चैत्यैकचिन्तामणीकं मनःकोशदेशे निवेश्याऽऽदरात् ॥
इति श्री जिनवर्णनप्रथमचरणः(णम्) ॥

यदिह विपुलवीचिमालीयवेलामहेला विलोलोर्मिमाला प्रलम्बोल्ललद्बाहुनाला सहेलाऽङ्कपालीयितप्रौढशालाऽनुकूलप्रियं चण्डवातूलयो_यिता चण्डरोचिश्चलन्मण्डलभ्रान्तिदापाण्डुरोद्दण्डपिण्डीरपिण्डानुषङ्गप्रसङ्गादनायाससंजायमानस्फुरद्रौप्यभृङ्गारशृङ्गारवप्राचलोपत्यकाभित्तिभागं सलीलानुवेलागमद्वार्द्धिवेलाजलोल्लोलकल्लोलसंसिक्तसङ्कीर्णताकीर्णचूर्णिप्रवालाङ्कुरानेकमुक्तामणीसप्तपर्णीवराटीकणश्रेणिकाचूर्णपूर्णीभवद्वालुकापेशलोत्तालवप्रावनीप्राङ्गणं निम्ब-जम्बीर-जम्बू-कदम्बप्रियङ्गूच्चमालूर-हन्ताल-कक्कोल-ताली-तमाल-प्रियाला-ऽऽम्र-कालेय-पुन्नागनारिङ्ग-नागागुरु-श्रीफलैला-लविङ्गा-र्जुना-ऽशोक-कोशातकी-केतकी-सल्लकीधातुकी-यूथिका-मल्लिका-जाति-वासन्तिका-जातिकोशा-ऽभया-मातुलुङ्गेङ्गुदीगोस्तनी-सिन्दुवारा-ऽतिमुक्ता-ऽञ्जना-ऽम्लातका-ऽश्वत्थ-ताम्बूल-वल्ली-शिवाकेसरोसीर-पूगादिनानावनीजन्मवल्ल्यौषधीवीथिमत् पौरपौरीपरीहासवासोचितारामरम्योपकण्ठप्रदेशं झरन्निर्झराद्रिप्रतिच्छन्ददानाम्बुधाराप्रवाहोग्रदन्ताबलग्रैवघण्टाटणत्कारनिर्धाटितप्रत्यनीकावनीनायकानीकिनीकं स्रवन्तीपतिः स्वेन विष्टभ्य तिष्ठत्यपाच्यां यदन्यासु काष्टासु सर्वासु वेलाजलापूर्णखात्याऽभितोऽपारसंसारसारेन्दिरामन्दिरं मानसान्तर्विमृश्येव मन्ये तरङ्गिण्यधीशेन रङ्गत्तरङ्गैरनुष्ठीयमानोपकण्ठप्रतिष्ठाननाट्यप्रियप्रौढलिङ्गाम्बुधाराभिषेकक्रियाराधकाधीयमानातिसाधारिकाविश्रमं यस्य पौरन्दरीपूर्तसारूप्यमाप्नोति यद्दानवारिव्रजस्तत्र चाऽऽस्ते गुरुः केवलं गौरवार्हः सुराणामिहत्यस्तु लोको घनो दानशौण्डो गुरुर्दानवैर्मानवैर्दैवतैर्वन्दनीयः पुरी नाऽऽसुरी याऽपि यस्मात् सुपर्वीद्विषस्तत्र यत्राऽखिलः पर्वपुण्यप्रवीणो जनो नागराजस्य पूर्नाऽपि येन द्विजिह्वाधिवासा हि सा संनिवेशेऽत्र पैशुन्यलेशोऽपि नाऽऽस्ते न लङ्काऽपि लङ्काधिराजेन राजत्वती याऽपि तस्यां निवासी निशाटः पलादोऽखिलः कर्बुरः क्रूरकर्माऽत्र साधर्मिको धार्मिकः शुद्धबुद्धिर्विधेयो विधिज्ञो धनी धीरसन्धः कृती सत्यवक्ता परार्थप्रियः पात्रवप्ता कृपालुः सुशीलः सलीलः कृतज्ञः क्रियासुप्रतिज्ञो विगानानभिज्ञः समज्ञारसज्ञः शुचिः कोमलालापकेलिः कुलाचारशाली कुलीनः कलाधामकैलाशशैलाधिवासाऽलका यस्य लीलाप्रकाशाय नाऽलं ह्यमुष्यां समुद्रो न नेता परं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

किंनरो गुह्यकेशः कुबेरोऽत्र धात्रीधवः क्षत्रियः सच्चरित्रः पवित्रश्चरीकर्ति राज्यश्रियं विक्रमादित्यवद् विक्रमी **विक्रमादित्यराजा** यदभ्रंलिहादभ्रभ्राङ्गमाभ्रौघशुभ्रप्रभा-विभ्रमभ्राजमानाप्तभट्टारकौकःपताकालुलत्तालवृन्तानिलोद्वास्यमानोष्ममाध्याह्नि-कामर्त्यमार्गाध्वनीनं क्वचिन्मञ्जुमाणिक्यवैडूर्यरक्ताङ्कमुक्तामणीमालिकाग्रन्थन-व्यग्रमाणिक्यवित्पाणिचक्रं क्वचिद् गीतनृत्यौचितीचञ्चुचन्द्राननाचारुचेक्रीय्य-माणोच्चकैश्चर्चरीरीतिनृत्यप्रपञ्चं क्वचिच्चण्डपाण्डित्यभाण्डावितण्डोक्ति-वित्पण्डिताखण्डलैर्मण्डलीमण्डितोद्दण्डवाक्ताण्डवाडम्बरम् ।

विमलसलिलवापिकाकूपकासारकुल्यादिनीराशया गच्छदागच्छदिन्दी-वराक्षीमिथःसंकथामाल्यबन्धावनद्धार्यचर्याविदाचार्यहर्यक्षचातुर्यगाम्भीर्यधैर्य-क्रियाकाण्डसंवेगसौभाग्यभाग्यादिनानागुणालीप्रसूनं विहारोल्लसद्वैजयन्तीरण-त्किङ्किणीनिक्वणाकर्णनाच्चन्द्रशालाशरद्रात्रिविश्रान्तवैदेशिकाकस्मिकस्वर्विमानागम-भ्रान्तिमातन्वति श्रीमदाराध्यपादांह्रिपाथोजकिञ्जल्कपुञ्जातिपावित्र्यशोभाभृते तत्र राजन्वति श्रीमति श्रीत्रयोविंशतीर्थेशमूर्तित्रयेणेव लोकत्रयीत्राणकृच्छातकुम्भीय-कुम्भाङ्कितो यद्विहारो यदीये सदेशे त्रिकोशेन व(वि)न्ध्याचलोपत्यकाप्राग्वस-**द्राणपू**र्भूमिरम्भोरुभालस्थलस्थूलमुक्ताफलव्योमकूलङ्कषावीचिविक्षोभ-कर्मक्षमोदग्रदण्डस्फुरत्पट्टिकोपात्तविश्रान्तिनित्याटनश्रान्तनक्षत्रवृन्दद्युसद्मालया-रोहणारोहणश्रेणिकारूपसोपानराजीविराजच्चतुर्दिक्प्रतोलीचतुर्भद्रविंशन्महामण्डपाधि-त्यकोर्वीत्रयीतोरणस्तम्भभूमीगृहोद्यच्चतुष्कोणिकाचङ्गशृङ्गाङ्किताशीतिसङ्ख्या-निकार्हत्कुटीव्यूढवातायनप्रौढपाञ्चालिकाधातुपाषाणरूपाप्रमाणानणीयःकनीयः-स्वयम्भूप्रतिच्छन्दकानन्दि**नन्दीश्वरद्वीपशत्रुञ्जयाष्टापदार्हत्सहस्राढ्य-कूटोज्जयन्ताचलश्रीसमेताद्रिसत्सिद्धचक्रादिनानाप्रकारोरुपट्टः** सदाबाल-लम्बालवालान्तरालोरुराजादनः **पद्मिनीगुल्म**संज्ञाविमानप्रतिज्ञातकेलिस्त्रिकालज्ञ-धर्मावनीपालधामाऽधुनावर्तमानप्रधानार्हदावाससामन्तभूपावलीचक्रभृद्भिष्वगामोद-मेदस्विमाकन्दमालावलीढः स देवाधिदे**वादिदेवावतारो विहारो** विभाति प्रजापावनं **तातपादा**भिवादैकपारायणश्रावकश्राविकानेकलोकोद्धुरात् **सप्तपर्णीपुरात्** प्रेरितः प्रेममित्रेण सम्बोधितः शुद्धबोधप्रधानेन नीतिज्ञतां वै विनीतोऽन्तरङ्गानुरागेण सन्धीरितो धीरबुद्ध्यम्बपालीककोशीकृतोत्तानपाणिः शिशु**र्दर्शनो विप्रदीप्यज्जयेत्य-**ग्रवर्त्यक्षरो दक्षजानन्दनाक्षिप्रमावर्तवृद्धप्रणामात् प्रणंनम्य सम्यक् प्रणम्रोत्तमाङ्गः

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रविज्ञापयत्यत्रवर्तित्वजन्यं यथा कुम्भजित्कुम्भिकुम्भोद्भवेनेव सिन्दूरपूरेण ताम्य-त्तमस्तोममातङ्गनिस्तर्हणप्रोच्छलच्छोणितेनेव शोणान् सहस्रं करान् भास्करो यो बिभर्ति स्म तस्मिन्नवाप्तोदये पद्मिनीप्राणभूते प्रभाते भवत्स्वस्तिकादिप्रभायां भृशं तत्त्ववेत्रिभ्यसभ्यौघविभ्राजितायां सभायां भवत्यन्वहं **वाचना** सूत्रमात्रैव **षष्ठाङ्गसूत्रस्य** सूत्रार्थतश्चाऽऽ**दिमाङ्गस्य चम्पूकथारम्भसिद्धया**दिकाधीतिरित्यादिकं कर्म धर्म्यं क्रमोपेयुषि प्रोषिताशेषषट्कायदुःखे सुखे **वार्षिके पर्वणि** प्राणिसङ्कल्प-कल्पद्रुकल्पागमव्याकृतिर्नन्दलक्ष्यक्षणा सक्षणा चाऽष्टघस्रावधि प्राणिसंरक्षणा प्रार्थकप्रत्तसद्दक्षिणा पत्रिनेत्रैकविंशद्वयीषोडशोद्यद्दशाष्टाहिकापक्षषष्ठाष्टमादि-श्रप्रसर्पत्तपःक्लृप्तदुष्कर्मनिस्तर्हणा स्नात्रसप्तैकभेदप्रणीतार्हणा साधुसाधर्मिकाध्राण-कृत्पारणाऽऽडम्बरस्पष्टचैत्यप्रपाट्यादिपुण्यक्रियोत्सर्पणा निर्व्यवायं बभूव प्रभूणां प्रभावप्रथिम्ना परम् ।

भुवनगगनमण्डपो मण्डनीयोऽन्वहं खण्डनीयं तमस्काण्डमुद्दण्डपाखण्ड-जाड्यं चयैश्चण्डरोचिःप्रचण्डप्रतापैः प्रकाश्यं च राजीवखण्डं विधेयो जगज्जीव-लोके प्रबोधस्सदाऽऽशामुखानां प्रदेयः प्रसादः प्रणेयो घनो मेघसङ्घातसंजात-सादा(दो?) निवेश्यः समुल्लास उच्चैस्तरामार्यचक्रे निशाटेष्वटाट्यानिषेधो-ऽभिधेयोऽपदेश्योऽपि दोषोद्गमो विग्रहध्वंस आपादनीयो रसप्रौढिमापोषणीयः, पृथिव्यां यदीयं यशः कुन्दकैलाशकर्पूरपीयूषपारीन्द्रमुक्तालताकौमुदीदेवदन्तीन्द्रदुग्धो-दधिस्पर्द्धिसिद्धापगासीम्नि सिद्धाङ्गनोद्गीयमानं समाकर्णयन्नुच्चकर्णं तदास्वादना-सादितातीवसातत्यसौहित्यपूर्तिः परित्यक्तनानानलाद्यङ्कुरास्वादनस्तुन्दिलो नाऽभव-न्मामकीनोदरक्रोडवर्ती मृगः स्तोककश्यामिकाहेतुरित्याशया श्वेतरश्मिर्महोपक्रिया-प्रत्यनुष्ठानकामी मुखाम्भोजभूयं समुद्भाव्य भट्टारकानेष संसेवते नित्यमित्यूहति प्राज्ञवर्गो, नियोगोऽप्यहो पद्मसूनोर्वियोगोऽप्यहो दुर्निवार्यान्तरायस्य योगोऽप्यहो सन्मुहूर्तक्षणस्योपयोगः प्रयोगोऽप्यहो **देवसूरी**शितुस्तत्कराम्भोरुहस्याऽभियोगोऽप्यहो सङ्घभट्टारकस्याऽनुयोगोऽप्यहो सर्वसिद्धान्तदुग्धोदधेर्भाग्यभोगोऽप्यहो सम्यगेषां हि येषां क्रमाद्येषु गच्छाधिपत्यैकसाम्राज्यलक्ष्मीर्यतोऽनेन निर्धारिताऽपेयुषी नाऽपि रुद्धा त्वराऽऽह्वायिताधेयभावावबुद्धा प्रतिष्ठापिता पूर्णवित्तव्ययाडम्बरो निर्ममे संनिधानीबभूवे यकेषां करः प्रस्फुरद्दक्षिणो धीरधर्मोपदेशक्रमे कल्पवल्ल्याः किमु प्रोल्लसत्पल्लवः कल्पनादानशौण्डः शिरोनेमुषां **धर्मलाभाशिषं** व्यञ्जयन्

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पर्षदो दीर्घिकायाः प्रभुज्योतिरम्भोभृताया इवाऽम्भोरुहं दर्पणः किं नु दीक्षामृगाक्ष्याः त्रिलोकीजनक्षेमयोगक्षमस्येव धर्माधिपस्याऽऽतपत्रं जयश्रीपताकेव कन्दर्पवीर-प्रभुष्णुप्रभूणां प्रदीयेत केनोपमा यच्छशाङ्कः क्षयी भास्करस्तापकारी हरो मुण्डमालामिलन्नीलकण्ठः सुपर्वप्रभुर्गोत्रभित् कैटभारिः स्फुटं कूटतानाटकी विश्वरेताः कुलालक्रियाकर्मठः स्वर्मणिः प्रस्तरः स्वर्द्रुमोऽचेतनः कामधेनुः पशुर्भव्यभावा अमी भाव्यमानास्फुटादीनवा एवमेवं गुणश्रेणिकामल्लिकाननैः पूर्णचन्द्राननैः पूज्यपञ्चाननैः सौवशारीरिकस्वास्थ्यवृत्तान्तपत्री प्रसाद्या शिशोः प्रीतये यज्जने जीवितालम्बनं दूरदेशस्थितस्ये(स्यै)तदेव प्रणामोऽवधार्यस्त्रिसायं शिशोः सोऽपि चाऽनुप्रणामः प्रसाद्यः परेषामृषीणां समासेदुषां संनिकर्षं सपाण्डित्य-लक्ष्मीक**लक्ष्मी**यशोराशिभास्व**द्यशो**रम्य**राम**प्रथाव**द्धन**प्राज्ञचूडामणीनां सतत्त्वर्द्धि-**तत्त्व**स्फुर**त्सत्य**सु**प्रेमसौभाग्यहेमा**दिकानां गणीनां **विराजज्जये**त्यग्रवर्णद्वया-नामिहत्यास्सु**माणिक्यलक्ष्मीक्षमाकृष्णाशान्ति**स्थिरस्थायि**रासा**दयः साधवः स्वामिपादानमाऽत्रत्यसङ्घेन नित्यानघेनाऽभिवन्दन्त आद्यैर्मयि प्रेम कार्यं हितं चोचितं चेतितव्यं जिनेशप्रणामक्षणे स्मार्य ईशैः शिशुस्सह्यमस्मिन्नसभ्यं यदि स्यान्**महादण्डको**द्दामपर्णश्रियः पर्णमात्मीयकर्णावतंसीक्रियासुः स्वयं स्वामिनः प्राप्तमेतत्प्रपूर्तिं प्रदीपालिकायामिति स्वस्तयः ॥६॥

प्रतिचरणमक्षराणां, नवनवतियुतानि नवशतानि स्युः ।
स **महासमुद्र**नामा, **दण्डक** उदयश्रियं दद्यात् ॥ इति श्रेयः ॥

[बहारना भागे-]

॥ पूज्याराध्य ॥ सकलभुवनजनाभिनन्दनीयाभिरामनामधेयभागधेयाप्रतिरूप-रूपधेयभट्टारकश्री१०८श्रीविजयप्रभ---

पं. दर्शनविजयग. पं. सिंघसत्कलेखदण्डक १-९९

—x—

मुनिश्रीधुरन्धरविजयजी-सङ्ग्रहगत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(१४)

# जीर्णदुर्गस्थ-श्रीविजयप्रभसूरिं प्रति
# सादडीनगरतो श्रीमेरुचन्द्रमुनेः पत्रम्

स्वस्तिश्रीसदनं जिनेशवदनं स्तौम्यन्वहं सुन्दरं;
पापध्वान्तरविं सुखप्रदकविं सर्वैनसां ध्वंसनम् ।
वाञ्छादानसुपर्वरत्नसदृशं श्रीपार्श्वनाथार्हतः(त)
आदेयाह्वयमिन्दुतुल्यमहसं सूर्याङ्गसंमिश्रितम् ॥१॥
स्वस्तिश्रिया(यं) यच्छतु पार्श्वनाथो दशावतारोऽञ्जनतुल्यकायः ।
_ _ _ _ _ _ कृष्णः किमाछोटितमुक्तनागः (?) ॥२॥
स्वस्तिश्रियो भेजुरमुं जिनेन्द्रं, जिनाभिधं श्यामतनुं विचिन्त्य ।
आस्यादिपानीयरुहान्वितं च, वामेयमर्हत्प्रभुमागमेशम् ॥३॥
श्रेयोदगिरं प्रणमज्जनतं, कन्दर्पहुताशनशान्त्यमृतम् ।
देवेन्द्रनरेन्द्रमुनीन्द्रनुतं, वामातनुजं प्रणमामि मुदा ॥४॥
पञ्चतत्त्वमयं पञ्च-वर्णात्मकममुं जिनम् ।
पञ्चपरमेष्ठिरूपं, पञ्चभूतस्वरूपकम् ॥५॥
प्रोक्तमागमविद्यायां, स्वरूपं यस्य चाऽर्हतः ।
नागादिविषहर्तृत्वं, तं वन्दे पार्श्वतीर्थपम् ॥६॥
स्वस्ति श्रीनिकरार्चितांह्रिकमलं श्रीपार्श्वनामाधिपं,
सेवे सर्वत एव वाञ्छितलसद्दानैकचिन्तामणिम् ।
भव्याम्भोजविबोधनैकतरणिं कन्दर्पवृक्षद्विपं,
द्वीपाभं भवनीरधौ जनमहाकष्टच्छिदं नित्यशः ॥७॥

एनं श्रीमन्तं श्रीमन्तं श्रीवामेयममेयमहिमानं सहस्रधामानं प्रणतिउ(त्यु)दयाद्रि-शिखरारूढ(ढं) विधाय श्रीध्येयपादपाविते श्रीमति तत्र **सादडी**नगरतो धरणीतलमिलन्मौलिः संयोजितकरकमलकुड्मलो **मेरुचन्द्र**स्सविनयं सप्रणयं सोल्लासं सहल्लेखं त्रिगुणद्वित्वकरणप्रमितावर्त्तवन्दनेनाऽभिवन्द्य यथाविधि विज्ञप्तिपत्रमुपदीकुरुते ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यथाऽनन्यथासिद्धश्चात्र प्रातस्सभायां सराज**प्रश्नीय**स्वाध्याय**श्रीशत्रुञ्जय-कल्पवृत्ति**व्याख्यानप्रभृतिधर्मकर्मणि प्रवर्तमाने क्रमागतं **श्रीवार्षिकपर्वा**ऽपि महामहोत्सवपूर्वकं निरस्तप्रत्यूहव्यूहं समजनि श्रीमत्पूज्यपरमपूज्यनामधेयमहामन्त्र-स्मरणकरणानुभावतः । अपरम् –

सूरीशो बहुसूरिवृन्दमुकुटायेत प्रभो ! भाग्यवान्;
पुण्याढ्यप्रतिमस्तपागणपते(तिः?) बुद्ध्या समर्तुगुरो(समः स्वर्गुरोः?) ।
गां भ्रान्त्वा सकलां स्वशासनवतीं राज्यं स्थिरं स्थापयेः;
गीतार्थान् बहुश्रावकान् दृढमतीन् धर्मे भवेदुन्नतिः ॥१॥
बुद्ध्या जितदेव-गुरुर्मुनिपः(प!), दूरीकुरु संशयमत्र जने ।
वीरेण यथा प्रतिबोधितकाः, विप्राः शतवेदसुवेदमिताः ॥२॥
भव्यलोको गुणग्राम-रञ्जितो सूरिईशितुः ।
इन्द्रस्य कुण्डलद्वैतं, सूर्येन्दुमिषतो ददौ ॥३॥
सूरीश्वरः **श्रीविजयप्रभः** स्याद्, भव्याङ्गिनां वाञ्छितभूरिलक्ष्म्यै ।
मुखप्रभानिर्जितपद्मकान्तिः, सुवर्णवर्णो गजराजवीङ्खः ॥४॥
शीलोपमानीकृतयक्षिकानुजः, बुद्ध्या समानीकृतवज्रनाथः ।
क्रियानुमानीकृतसज्जगद्विधु[:], सूरिश्च पूर्वार्यसमस्त्वकं प्रभो ! ॥५॥
इष्टं नभोब्जगुणितं द्विजपेन युक्त-मष्टाहतं शरहतं शरबाहुभुक्तम् ।
शेषं वसुघ्नमथ जीव समेतवर्षैः, श्रीसूरिराज ! परिपालय साधुवर्गम् ॥६॥
यथा स्यादुद्गते सूर्ये, नभसि भ्रमति ध्रुवम् ।
तमोध्वंसः श्राद्धवर्गे, तथा त्वयि **तपागणे** ॥७॥
सूरीश्वरः **श्रीविजयप्रभ**श्च, यथार्थनामो विजयप्रभः स्यात् ।
श्रिये जनानां विदितागमार्थः, समः क्रियायां तपसि प्रभूणाम् ॥८॥
व्याख्यारञ्जितभव्यलोकनिकरस्तन्नन्दिषेणोपमः;
भव्यानां भवनीरधिप्रतरणे पोतायमानोऽनिशम् ।
त्वं जीया मुनिनायकस्त्वदभिधाजप्तुर्नरस्य ध्रुवं,
विघ्नध्वंस इवाऽभवद् भुवि सदा साक्षाच्च कल्पद्रुमः ॥९॥
तं वन्दे मुनिनाथं, प्राक्सूरिव्यूहतुल्यगुणनिकरम् ।
बहुशास्त्रविदिततत्त्वं, पञ्चाचारक्रियाप्रवणम् ॥१०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आवारकं वारितवानशेषं, सयत्नरत्नत्रयीशीलनेन ।
मिथ्यात्वमुख्यांश्चतुरोऽपि हेतूम(न्), समूलमुन्मील्य मुनिप्रभो ! भो ! ॥११॥
त्वद्दर्शनं वाञ्छति भव्यलोको, यथा मयूरोऽत्र पयोमुचः किम् ? ।
यथा चकोरो ग्रहनायकस्य, रेवाङ्गजो वाऽथ फलात् रसालम् ॥१२॥
इत्थं स्तुतः श्री**विजयप्रभ**प्रभुः, प्रभुर्मुनीनां जगति प्रतीतः ।
चतुर्विधे धर्मगणे यथोदयः, **तपा**गणे नाम तथा विधेयम् ॥१३॥

एवमौदार्यधैर्यगाम्भीर्याद्यनेकगुणगणनिकरैः रञ्जितानेकनगरनागरप्रकरैः अनेकलब्धिदत्तवाञ्छितशङ्करैः शिवकरैः क्षेमङ्करैः स्वकीया(य)मनीषासमानीकृतद्वादशपादैः सकलभव्यलोकाज्ञानध्वान्तनाशनसहस्रपादैः वदनमरीचिसमानीकृतहिमपादैः सदासुप्रसादैः कृतमहाप्रसादैः श्रीवन्द्यपादैः सौववपुःपरिकरनिरामयतादिसमाचारसूचिकपत्रीमरालबालिका सद्यः प्रसद्य प्रसाद्या । तथा सांवत्सरिकक्षामणापूर्वं मदीया नतिरवधार्योपवैणवम् ।

तथा तत्रत्य **महोपाध्याय श्रीविनीतविजय ग.**, **पं. आनंदसागर ग.**, **पं. धनविजय ग.**, **पं. जसविजय ग.**, **पं. रविवर्द्धन ग.**, **ग. तत्त्वविजय**प्रभृतीनां नत्यनुनती प्रसाद्ये । तथाऽत्र **ग. लावण्यचन्द्र, मु. सुखचन्द्र, मु. रतिचन्द्र,** ऋ. **रासा**प्रमुखाणां नतिरवधार्या । तथाऽत्र सकलसङ्घस्य नतिरवधार्या । तथा मदुचितं कृत्यं प्रसाद्यम् । तथा कृपावल्लीवितानवृद्धि घनाघनायितव्यं चेति भद्रम् ॥ कार्त्तिक व. ११ शुक्रे ।

॥ पूज्याराध्य- ध्येयत(म)-सकलसकलभट्टारकभट्टारकवृन्दवृन्दारकविभुभट्टारक-श्री १७ श्री **विजयप्रभसूरीश्वर**चरणसरसीरुहाणाम् जीर्णदुर्गे इयं विज्ञप्तिः ॥

—x—

ला. द. विद्यामन्दिर,
अमदावाद
सू. ४३४१३

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## (१५-१६)

# महोपाध्याय-श्रीयशोविजयगणिलिखितं लेखद्वयम्

## (१)

### वर्गवटीनगरे श्रीविजयप्रभसूरिं प्रति प्रेषितं पत्रम्

स्वस्तिश्रीमान् गुरुरपि कविप्रेमपात्रं प्रकामं
भर्त्ता भासामपि कुवलयानन्दतत्त्वैकनिष्ठः ।
वर्णातीतस्थितिरपि च यः सर्ववर्णाश्रमेभ्य-
स्तं त्रैलोक्यप्रथितयशसं स्तौमि **तीर्थेशमाद्यम्** ॥१॥

स्वस्तिश्रीमान् सुचिर**मचिरानन्दनः** सोऽत्र नन्द्यात्(द्)
यत्पादाब्जं प्रणतदिविषन्मौलिमाणिक्यकान्तिः ।
उत्सर्पन्ती दिवि दिनकरोत्सङ्गरङ्गप्रसङ्गा
कालिन्दीव स्फुरति रतिदाऽऽलोककानां जनानाम् ॥२॥

स्वस्तिश्रीमान् जयति जगति क्षुब्धदुग्धाब्धिवेला-
हेलाघातस्फुटितविततव्यक्तशुक्तिप्रसूतैः ।
मुक्ताजालैर्निजरथपतत्तृप्तिहेतोर्विधात्रा
सोढः प्रौढः किमपि गहनः शङ्खनादः स **नेमेः** ॥३॥

स्वस्ति श्रीमान् नतफणिफणस्फारकान्तिप्रतानै-
र्यो दिक्कुक्षिम्भरिभिरभितो ध्वान्तमुच्चैर्भिनत्ति ।
तं श्रीमन्तं कमठशठताव्यापशैलैकवज्रं
तेजस्तीव्र(व्रं) दधतमतनूत्साहभाजो भजामः ॥४॥

स्वस्तिश्रीभिर्विशाले चरमजिनपतौ विश्वपाले कृपाले
धाम्ना बालेऽप्यबाले जयति सुरकृता पुष्पवृष्टिः सुभाले ।
वेताले सप्तताले भू(धू?)तवपुषि मुहुर्दत्तताले कराले
दर्पोत्तालेऽत्यराले ददति पविसमां मुष्टिमत्राऽन्तराले ॥५॥

अथ प्रत्यादेशा विलसदुपदेशा विदलित-
स्मरावेशा देशान् निजपदपवित्रान् विदधतः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

शुभोद्देशादेशात् कुनयगहने शातनकृतो
जिनेशाः क्लेशान् वः सपदि दलयन्तूज्ज्वलगुणाः ॥६॥
सहस्रांशोर्जैत्रं यदुरुगुणबोधेन तमसः
पुरस्तादस्ताघं किमपि लसति ज्योतिरमलम् ।
तदार्हन्त्यं सत्यस्थितिपदमदंजं(म्भं?) भवभय-
प्रणाशि प्रोन्मादोन्मथनमथ चित्ते प्रणिदधे ॥७॥
सहजमलदिदृक्षावासनाजन्मबीज-प्रकृतिविकृतिमायादृष्टमुख्यैः पदौघैः ।
यदभिहितमतन्त्रं नाशने तस्य तन्त्रं, जयति जिनपतन्त्रं सर्वतन्त्रप्रतिष्ठम् ॥८॥
सद्यः सारस्वतोद्गार-सुधासारोपबृंहितान् ।
विनिर्माय नमस्कारान्, भूयस्कारान् वृषश्रियः ॥९॥
॥ इति श्रीदेववर्णनम् ॥

अथ नगरवर्णनम् । तत्र प्रथमं वर्गवटीनगरी वर्ण्यते—

या स्वर्गवाटी किल सत्फलर्द्धिर्विश्वोपकाराय कृता विधात्रा ।
वात्सल्यतस्त्वेष जनोऽभिधत्ते यां वर्णमात्राच्युतकेन मन्ये ॥१०॥
या वेधसा नूनमकारि लङ्काऽलङ्कारसारं सकलं गृहीत्वा ।
इतोऽपमानात् किमु सा न झम्पासम्पातमब्धौ सहसा ततान ॥११॥
पुनाति यां वै श्रमणाधिराजो न्यासैः पदाब्जस्य जनौघवन्द्यैः ।
कुतोऽधिका वैश्रवणाश्रिता स्यात्, तस्याः सकाशादलकाऽधिकारैः ? ॥१२॥
यदर्हदुच्चस्फटिकालयानां, कैलाशशैलाधिकवैभवानाम् ।
तुल्योपभोगाय समायकाय-व्यूहश्रियं वाञ्छति वामदेवः ॥१३॥
यदीयचैत्यालयतुङ्गशृङ्ग-वेल्ल[द्]ध्वजप्रान्तकशाभिघातैः ।
अनूरुविश्रामसुखं दिनेश-तुरङ्गमालस्यनिवारणात् स्यात् ॥१४॥
तस्यां **श्रीवर्गवट्यां** पुरि दुरितशतध्वंसकृत्पूज्यपाद-
प्रत्यासत्तिप्रसङ्गोपनततत्तमहोल्लासशोभाभृतायाम् ।
तारुण्याम्भोधिवीचिप्रचयपरिचितैः पक्ष्मलाक्षीविलासै
रम्भासौभाग्यभङ्गीसरससुरपुरीगर्वसर्वङ्कषायाम् ॥१५॥

॥ इति श्रीवर्गवटीनगरवर्णनम् ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथ श्रीराजनगरवर्णनम् –
न्यासभाजनमभङ्गमहो यद्विष्टपत्रितयसारभरस्य ।
नो सुरासुरकृतं परचक्रौपाधिकं च भयमस्ति हि यत्र ॥१६॥
रत्नभाग इव तज्जलराशेर्योगिपीतपयसोऽस्त्यवशिष्टः ।
यत् प्रकृत्युपनतादतिदेशन्यायतो हि विभवोऽस्ति परत्र ॥१७॥
भोगिनां भोगसर्वस्वहेतुर्यत्सम्पदां पदम् ।
योगिनां योगहेतुश्च द्रव्यतो लूक्षचर्यया ॥१८॥
तस्माच्छ्रीराजनगरान्नगराजिविराजितैः ।
अभ्रंलिहैर्गृहैश्चित्तचमत्कारसुरद्रुमात् ॥१९॥
संयोजितकरद्वन्द्वो विनयोल्लासभासुरः ।
उदञ्चत्पुलकः प्रेमप्राग्भारापूर्णमानसः ॥२०॥
द्विघ्नतर्कमितैः सम्य-गावर्तैरभिवन्द्य च ।
विज्ञप्तिं तनुते **शिष्यो यशोविजय**सञ्ज्ञकः ॥२१॥
यथाकृत्यमिह प्राचीं, विभूषयति भास्करे ।
सभायां परिपूर्णायां, जायते धर्मदेशना ॥२२॥
व्याख्यातो **धर्मबिन्दुः** प्राक्, सुधानिस्यन्दसुन्दरः ।
**उपदेशपद**व्याख्या, जायतेऽथ श्रवःसुधा ॥२३॥
स्वाध्यायो नियतः कण्ठात्(द्), **द्वितीयाङ्गा**दिगोचरः ।
न्यायादिपाठनप्रौढि-र्विचारस्य प्रचारणा ॥२४॥
उपस्थिता अपि ध्वस्ताः, प्रत्यूहास्तु परःशताः ।
उपायैः प्रबलैर्वातै-र्घनाघनघटा इव ॥२५॥
अस्तो विपरिणामश्च, प्रतारणकृतो नृणाम् ।
महापर्वाऽपि नीतं च, प्रौढिमेवं क्रमागतम् ॥२६॥
छन्नप्रकटभावेन सर्वः सत्यः(त्या)पितो विधिः ।
सर(म)यान्न मया किञ्चि-दविरुद्धमपह्नुतम् ॥२७॥
देवे गुरौ च कल्याणीभक्तेर्व्यक्ते श्रुतोद्यमे ।
न मे क्रमेलकखलारुच्याऽभूत् काचन क्षतिः ॥२८॥
भक्तिर्भागवती हेतुः, श्रेयःकर्मण्यमूदृशि ।
श्रीमतां पूज्यपादानां, प्रसादश्च शुभोदयः ॥२९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अपरमथ श्री**विजयप्रभसूरि**वर्णनम् । तत्र हस्त एवाऽष्टकेन वर्ण्यते –

यावतां समुपगृह्य गुणांशान्, यत्तनुं शतधृतिः प्रणिनाय ।
शङ्खवज्रमकरादिकलक्ष्मा यत्करः स्फुरति तावदुपेतः ॥३०॥

यत्करः स्फुरति रोहणशैलो रत्नभूरिति न चोद्यमिदं नः ।
नामतोऽपि किल येन सुरत्नं, स्थापितो **विजयरत्नगणेन्द्रः** ॥३१॥

अङ्गुलीभिरुदितोज्ज्वलशाखो यत्करः सुरतरोरवतारः ।
इष्टदानजनितं सुकृतं यत् _ _ _ _ _ _ तत्परिणामः ॥३२॥

_ _ _ _ _ _ _ _ _ सुरशाखी यत्करो निखिलभाग्यसहायः ।
किन्तु तत्र फलदाननियन्ता रक्षिलक्षसम एकनियोगी ॥३३॥

योगिनो भवति वैभवभाजा, यत्करेण विबुधत्वमिहैव ।
अन्यजन्मनि तथा फलदातुर्योगतोऽपि तदयं बहु मेने ॥३४॥

यत्करेण विबुधत्वमुदीतं यच्चतुर्दशगुणार्द्धगुणस्य ।
अप्यपूर्वकरणादधिकर्द्धर्या, तेन चित्रतरलं हृदयं नः ॥३५॥

भालमालय उदारगुणानां, यत्करश्च सुकृतोदयसूची ।
तुल्यभाग्यविधिसूचकमेतत्, सूत्रभाष्ययुगवद् द्वयमिष्टम् ॥३६॥

यत्करौ जनुरवाप यदब्जं, तेन तत्र वसति स्थिरलक्ष्मीः ।
इत्यदःकलितपृष्ठतलानां, प्राणिनां तदुदयः स्फुट एव ॥३७॥

तैरच्छश्री**तपागच्छ**-सन्ततिव्रततिद्रुमैः ।
प्रणतिः शैशवी धार्या, श्रीपूज्यैरुपवैणवम् ॥३८॥

तत्र पं. **गंगकुशल**गणि, पं. **हेमविजय**गणि, पं. **प्रीतिविजय**गणि, पं. **शुभविजय**गणि पं. **विमलविजय**गणि, पं. **उदयविजय**ग., ग. **सौभाग्यविजय**प्रभृतीनां श्रीपूज्यचरणकमलपरिचरणपरायणानामनुपूर्वा नतिः प्रसाद्या। अत्र पं. **ज्ञानविजयग.**, पं. **वीरविजय**ग., पं. **सत्यविजय**ग., पं. **भक्तिविजय**ग., पं. **हितविजयग.**, पं. **पुण्यविजय**गणि, गणि **कान्तिविजय**, ग.**गुणविजय**प्रभृतिः साधुवर्गः पटूभूतमतिवैभव**मटू**प्रभृतिसाध्वीवर्गः सङ्घश्चाऽनघः श्रीपूज्यपादान् भक्तिभरनिर्भरः प्रणमति ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

विज्ञप्तिः प्राक्कृता सैव, सम्प्रत्यनुवर्त्तते ।
स्मार्यो विनेयः श्रीपूज्यैः, श्रेयःकार्यविधौ धुरि ॥३९॥

यत् किञ्चिल्लिखितं लेखे, भवेत् क्षूणं प्रमादतः ।
तत् क्षन्तव्यं क्षमाधार-क्षमाश्रमणपुङ्गवैः ॥४०॥

मार्गशीर्षेऽसिते पक्षे, दक्षेतरदुरासदः ।
सद्यः पद्यैस्त्रयोदश्यां लेखोऽलेखीति मङ्गलम् ॥४१॥

पूज्याराध्य ॥ सकलभट्टारकसभाभामिनीभालस्थलतिलकायमान-भट्टारक श्री १९ श्री **विजयप्रभसूरी**श्वरचरणाब्जानामयं विज्ञप्तिलेखः श्री**वर्गवटीनगरे** ॥

* * *

यस्मात्परत्र न शिखी न च मेघवृन्दं
नैवाकरा न निधयो न ही न मर्त्यो(र्त्यः)(?)
नो चन्द्र-सूर्यगतिरस्ति न चोपरागः
तन्मानुषोत्तरनगं प्रवदन्ति तज्ज्ञाः ॥१॥
महाप्राणे हि निष्पन्ने, कार्ये [च] कश्चिदागते ।
सर्वपूर्वाणि गुण्यन्ते, सूत्रार्थाभ्यां मुहूर्त्ततः ॥२॥
समणी[1]मवगयवेयं[2], परिहार[3]-पुलाय[4]-मप्पमत्तं[5] च ।
चउदसपुव्वी[6]-माहारगं[7] च न कयाइ संहरइं(इ) ॥३॥
बावी[स]सहस्री आवश्यकमध्ये ॥ पूर्वगणनं **परिशिष्टपर्वणि**

एकेन पण्डितेनोक्तम् –
न तृणानि न तोयानि देवे दिग्विजयाद्यने (दिग्विजयोद्यते ?) ।
अपरपण्डितेन –
विना त्वदरिवक्त्राणां, तन्नारीनयनानि च ॥१॥

एकं चक्षुर्वरीवर्ति, **सूरदासा**भिधः कथम् ? ।
विवेकाख्यं द्वितीयं न, यथोक्तस्य तथैव हि ॥१॥
त्वयि सत्यपि शून्यमेव रे, जडराजन् ! पदमस्ति हि नभः ।
इति केतुकशाग्रताडनां, ददते यन्निलयाः सितत्विषः ॥१॥

—x—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ( २ )

## शुद्धदन्तनगरे श्रीविजयरत्नसूरिं प्रति प्रेषितं पत्रम्

स्वस्तिश्रियाऽऽश्रितमनिन्दितमंह्रिपद्मं, वीरस्य धीरचरितस्य सदा भजामः ।
मन्ये त्रिपृष्टभववैरनिवारणाय, सिंहो यदङ्कमिषतः प्रणयी सिषेवे ॥१॥
स्वस्तिश्रियाऽऽश्रितमुपैमि जिनं वितन्द्रं, सिद्धार्थपार्थिवकुलाम्बरपूर्णचन्द्रम् ।
उद्धर्वदमः किमु तपस्यति नाऽमराद्रि-र्यत्कान्तिसाम्यमिह लिप्सुरुपात्तमौनः ॥२॥
स्वस्तिश्रिये भवतु वीरजिनः स यस्या-ऽङ्गुष्ठाग्रघट्टनवशेन चले सुमेरौ ।
अन्येऽपि हन्त चलितैः शिखरैर्विवव्रुः, शैलाः सगोत्रसमदुःख-सुखव्यवस्थाम् ॥३॥
स्वस्तिश्रियः किशलयन्तु वनानि विष्वग्, वीरस्य धीरिमभृतः करुणाकटाक्षाः ।
यस्याः फलानि विपुलानि पुलोमपुत्री-नेत्रालिलेह्यसुखमाअनुषङ्गजानि ॥४॥
स्वस्तिश्रियां निधिरितावधिशर्मदाता, त्राता जगत्त्रयजनस्य भवान्धकूपात् ।
ख्याताऽद्भुतोज्ज्वलगुणः सुकृतस्य धाता, ज्ञातात्मजो भवतु **वीर**जिनः शिवाय ॥५॥
आस्वाद्य यद्वाक्यरसं बुधानां, पीयूषपानेऽपि भवेद् घृणैव ।
नमामि तं विश्वजनीनवाचं, वाचंयमेन्द्रं जिन**वर्द्धमानम्** ॥६॥
स्वर्गे **श्रीराजनगरं**, जन्माऽऽसादयति स्फुटम् ।
यन्मूर्त्तिः कल्पवल्लीव, जाता सर्वार्थसाधनम् ॥७॥
अनङ्गसङ्गसङ्गरप्रसङ्गभङ्गमङ्गलं, श्रयन्तमन्तरङ्गरङ्गसौख्यमत्यनर्गलम् ।
कलङ्कपङ्कवारिदं हृदन्तरे स्थितं सतां,★ ... ॥८॥
तमेनमेनसः परं-महो महोर्मिवर्मितम् ।
प्रणम्य वीरबोधिदं, त्रिलोकचित्तशुद्धिदम् ॥९॥

॥ इति श्रीवीरजिनवर्णनम् ॥

अथ नगरवर्णनम् । तत्र श्रीशुद्धदन्तनगरवर्णनम् –
**सोज्झितं** न खलु सम्पदां पदं, स्वोज्झितं यदि कुतः पुनर्ग्रहः ।
सत्यवाक्यविधयोपचारतः, **शुद्धदन्त**मिति यन्मयोह्यते ॥१०॥
यत्र सत्रपनितम्बिनीजनो नेति दानविषये न भाषते ।
भाषते निधुवने प्रियं प्रति, प्रान्तकर्मणि च धर्मकर्मठः ॥११॥

---

★ श्लोके चतुर्थः पादो नास्ति – सं. ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यद्गृहोन्नतगवाक्षलक्षतः, कामिनीशुचिमुखैर्विनिर्गतैः ।
लक्षचन्द्रमिव वीक्ष्यतेऽम्बरं, वासरेऽपि विततस्मितच्छविम्(वि) ॥१२॥
ग्रीष्मरात्रिषु यदुच्चवेश्मनां, सुभ्रुवामुपरि कान्तकेलिषु ।
हारवित्रुटितमौक्तिकव्रजं, स्वीकरोत्युडुधियाऽऽगतो विधुः ॥१३॥
मेरुमेकमधिगत्य सत्यतां, स्वश्रियामधिगताऽमरावती ।
यत्र तैर्बहुतरैर्जिनालयैः, किं ततोऽपि किल नाऽधिको गुणः ॥१४॥
एकमेरुकरणादतिश्रमं, प्राप्तवान् न किमु यत्र मन्यते ।
भूरिचैत्यगृहमेरुकारिणां, शिल्पिनामधिकसिद्धतां विधिः ॥१५॥
विभ्रमोद्धुरगतिप्रतिष्ठया, यत्र सम्भ्रमकरान्मदादपि ।
राजमानवशतो निरङ्कुशा, वारणेन तरुणी न जीयते ॥१६॥
तत्र **श्रीशुद्धदन्ताख्ये**, नगरे नगरेणुताम् ।
रथप्रथाभिः कुर्वाणे, गीर्वाणेनाऽपि वर्णिते ॥१७॥
॥ इति श्रीशुद्धदन्तनगरवर्णनम् ॥

अथ श्रीराजनगरवर्णनम् –
रजःस्थानि यच्चत्वरे स्वीक्रियन्ते, ह्यपां सम्प्लवैः **साभ्रमत्या**ऽनुवर्षम् ।
सुरत्नानि साऽभ्येति कान्तं च रङ्गाद्, भवत्येष रत्नाकरस्तेन सिन्धुः ॥१८॥
कविः कोऽपि यत्र स्थितः पाण्डुपत्र-प्रवालोपमां खेलतः किं न दत्ते ।
द्वयोस्तेन चेद् भूयते सावधानै-स्तदा वक्तृबोद्धव्यसुव्यक्तियुक्तिः ॥१९॥
आद्यमर्थशक्तिसमुत्थमुपायविषयं व्यङ्ग्यव्यङ्ग्यम्, द्वितीयं शब्दशक्ति-समुत्थमुद्देश्यविषयं साक्षाद् व्यङ्ग्यम् ।
भोगिनां भोगसर्वस्व-हेतुर्यत्सम्पदां पदम् ।
योगिनां योगहेतुश्च, द्रव्यतो लूक्षचर्यया ॥२०॥
तस्मा**च्छ्रीराजनगरान्**-नगराजिविराजितैः ।
अभ्रंलिहैर्गृहैश्चित्त-चमत्कारसुरद्रुमात् ॥२१॥
संयोजितकरद्वन्द्वो विनयोल्लासभासुरः ।
उदञ्चत्पुलकः प्रेम-प्राग्भारव्याप्तमानसः ॥२२॥
आवर्तैरभिवन्द्य, प्रद्योतनसम्मितैरमितभक्तिः ।
तनुते विनीतविनयो विज्ञप्तिमसौ **यशोविजयः** ॥२३॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यथाकृत्यमिह प्राचीं, विभूषयति भास्करे ।
सभायां परिपूर्णायां, जायते धर्मदेशना ॥२४॥
व्याख्यातो **धर्मबिन्दुः** प्राक्, सुधानिस्यन्दसुन्दरः ।
**उपदेशपदव्याख्या**, जायतेऽथ श्रवःसुधा ॥२५॥
स्वाध्यायो नियतः कण्ठा[द्], **द्वितीयाङ्गा**दिगोचरः ।
न्यायादिपाठनप्रौढि-र्विचारस्य प्रचारणा ॥२६॥
उपस्थिता अपि ध्वस्ताः, प्रत्यूहास्तु परःशताः ।
उपायैः प्रबलैर्वातै-र्घनाघनघटा इव ॥२७॥
अस्तो विपरिणामश्च, प्रतारणकृतो नृणाम् ।
महापर्वाऽपि नीतं च, प्रौढिमेव क्रमागतम् ॥२८॥
छन्नप्रकटभावेन, सर्वः सत्यापितो विधिः ।
समयान्न मया किञ्चि-दविरुद्धमपह्नुतम् ॥२९॥
देवे गुरौ च कल्याणी-भक्तेर्व्यक्ते श्रुतोद्यमे ।
न मे क्रमेलकखलारुच्याऽभूत् का च न क्षतिः ॥३०॥
भक्तिर्भागवती हेतुः, श्रेयःकर्मण्यमूदृशि ।
श्रीमतां तत्रभवतां, प्रसादश्च शुभोदयः ॥३१॥
अथ श्री**विजयरत्नसूरि**वर्णनम् –
रूपं विद्यानुरूपं तनुरपि सुभगा चारुतारुण्यपूर्णा
भ्रातुर्योगोऽपि भूयः सुखनिधिरवधिर्वाचि कश्चित् सुधायाः ।
प्रौढायः सम्प्रदायस्तदिह सुरुचिते स्फीतगीतार्थसार्थे
येषां पक्षो विपक्षोद्दलन[स]दुचितो दुर्लभाः किङ्कराः के ॥३२॥
कुर्वाणानामजस्रं प्रणयरसजुषां तन्त्रगोष्ठीं गरिष्ठां
येषां गीतार्थपक्षो जयति यतिजनश्रेणिचूडामणीनाम् ।
यस्याऽग्रे हन्त वाचस्पतिरपि करयुक् तिष्ठति प्रेमबद्धः,
को वा दौवारिकत्वं व्रजति न विबुधो विस्मयोत्तालचेताः ॥३३॥
पुण्योदर्केऽसि तर्के पटुरुत सुतरां रागवानागमार्थे
स्वच्छन्दं छन्दसा वा मदयति पतितो मङ्क्षु शब्दार्णवे वा ।
साहित्ये संहिता ते मतिरिति विततस्फूर्जदुक्तिप्रबन्धा
यत्पक्षस्याऽपि बाला विदधति कुदृशां तुण्डकण्डूविनोदम् ॥३४॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

एकावच्छेदकत्वाद् विघटयति भृशं बाधमात्मानुकूलं;
येष्टापत्तिस्तयैव प्रतिहतविषयाः सर्व एवाऽन्यतर्काः ।
तेनाऽर्थापत्तिपत्तिव्रजनिहतपरानीकतर्कप्रमाणः
पक्षं स्याद्वादराजो(ऽ)नुगुणयति गुणी यस्य तस्मै शुभानि ॥३५॥
जाह्नव्यां शैवलन्ति स्मितकुमुदवने व्यक्तमिन्दीवरन्ति
स्फूर्जत्कैलासशैलप्रविततशिखरे साम्बुपाथोधरन्ति ।
दुःपक्षाकीर्त्तयस्ता रजनिवदसिताः श्वेतयत्कीर्त्तिराशौ
ब्रह्मण्यध्यस्तखन्ति प्रसृमरधवलध्यानभृद्धारणीये ॥३६॥
यत्तेजोनिर्जितः सन् रविरथनवरं (रनवरतं?) मन्त्रजापं वितेने
धृत्वाऽब्जे पद्मयोनित(स्त)दनु स विदितः सर्वदा पद्महस्तः ।
तेनाऽभूत् स ग्रहाणां पतिरतिशयितः किन्तु सम्भ्रान्तजापान्-
मुख्यं लेभे फलं नेत्यतनुतनुमनस्तापरूपं तदर्चिः ॥३७॥
तैरच्छ**श्रीतपागच्छ**-सन्ततिव्रततिद्रुमैः ।
श्रीमदाचार्यहर्यक्षै-रवधार्या नतिर्मम ॥३८॥

प्रसाद्या चाऽनुनतिः पं.**पुण्यसुन्दर**गणि, पं.**महिमसुन्दर**गणि, पं.**ज्ञानविजय**ग., पं.**प्रेमविजय**ग., ग.**लक्ष्मीविजय**प्रभृतीनाम् । अत्रत्य पं.**ज्ञानविजय**ग., पं.**वीरविजय**ग., पं.**सत्यविजय**ग., पं.**भक्तिविजय**ग., पं.**कल्याणचन्द्र**ग., पं.**वृद्धिविजय**ग., पं.**हितविजय**ग., पं.**पुण्यविजय**ग., ग.**कान्तिविजय**ग., ग.**गुणविजय** साध्वी**मटू**-प्रभृतिवर्गः समस्तसङ्घश्च प्रणमति श्रीमदाचार्यचरणान् ॥

मार्गशीर्षाऽसिते पक्षे, दक्षेतरदुरासदः ।
सद्यः पद्यैस्त्रयोदश्यां, लेखोऽलेखीति मङ्गलम् ॥३९॥

पूज्याराध्य ॥ सकलभट्टारकसभाभामिनीभालस्थलतिलकायमान-भट्टारकश्री १९ श्री**विजयरत्नसूरीश्वर**चरणाब्जानामयं विज्ञप्तिलेखः श्री**शुद्धदन्तनगरे** ॥

* * *

स्फुटतरलिखनोद्यमे पटिष्ठाः, प्रणयगरिष्ठगृहीतशिष्टलीलाः ।
**बुधगजविजया** नमन्ति पूज्यक्रमयुगमाशु दशाटकादुपेताः ॥१॥
कस्त्वं ? पापं, कृशाङ्गः कथमजनि भवान् ? मे जनन्या वियोगः,
का माता ते ? वियोगः कथमजनि तया ? मारिनाम्नी मदम्बा ।
नीता सा सौरिगेहं पटुतरवचसा साहिना **हीरसूरेः**,
क्व स्थाता ? **हीरसूरे**र्वचनमवितथं यो न मन्येत तस्मिन् ॥१॥

लावण्यविजय जैन ज्ञानभण्डार, राधनपुर प्रत नं. ९६३

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(१७-१८)

# पं. श्रीतत्त्वविजयस्य पत्रद्वयम्

(१)

## वर्गवटीपुरस्थं श्रीविजयप्रभसूरिं प्रति प्रेषितं पत्रम्

स्वस्तिश्रियं(यां) चन्दिरमन्दिरं स-देवाधिदेवं क्षपितान्तरारिम् ।
अमानसद्भूतगुणाभिरामं, **युगादिदेवं** प्रगुणीकरोमि ॥१॥
स्वस्तिश्रियां(या) संश्रितमद्वितीयं, सम्यक्त्वचारित्रगुणावलीढम् ।
विपक्षपक्षक्षयकारिवीर्यं, श्रीआदिदेवं परिशीलयामि ॥२॥
स्वस्तिश्रिया संश्रितमंह्रिपद्मं, यस्य प्रभो[:] श्रीवृषभध्वजस्य ।
नो चेत् कथं कामितमातनोति, तनूमतां कल्पलतेव साक्षात् ॥३॥
स्वस्तिश्रियं तनुमतां स तनोतु **शान्तिः**, सन्तापतापितजनस्य कृतप्रशान्तिः ।
नित्यं कुरङ्गसहितोऽपि न यः कुरङ्ग-श्चित्रं विलोकयत भो विबुधाः समस्ताः ॥४॥
सच्चक्रचित्तप्रणयं विधत्ते, न जातु दोषाकरतां विधत्ते ।
श्रीशान्तिनाथो जयतात् पृथिव्या-माश्चर्यकृत् कोऽपि नवो मृगाङ्कः ॥५॥
स्वस्तिश्रिये स भगवान् हरिणो यदंह्रिं, भेजे सदैव हरिणाऽऽश्रितमित्यवेत्य ।
मन्ये न तस्य पशुता सहजाविवेका-दासीत् पृथक् पदसमासविवेकनिष्ठा ॥६॥
स्वस्तिश्रियां(या) रमणमुत्तमबोधवन्तं, श्रीशान्तिनाथभगवन्तमुपास्महे तम् ।
चन्द्राश्रयादबलयाऽपि हृताक्षिशोभः, प्राप्तुं महत्त्वमुचितं हरिणोऽभजद् यम् ॥७॥
श्रीआचिरेयजिनराजकिरीटमेनः(न)-मेनःसमूहपरिमर्दनसावधानम् ।
मौलौ निधाय विधिसङ्घटितप्रणाम-प्रोद्दामभक्तिपरिणामनितान्ततुङ्गे ॥८॥
स्वस्तिश्रीः समशिश्रियद् यदुकुलक्षीराब्धिशीतद्युतेः,
**श्रीनेमे**श्शरणं भवान्तकरणं विश्वत्रयीवत्सलम् ।
सञ्चिन्त्येति निराकरिष्यति दमी नूनं कलङ्कं मम,
ख्यातोऽयं चपलेति विश्वजनतासङ्कल्पकल्पद्रुमः ॥९॥
गोपीगणैर्यो नवयौवनाभि-र्विहस्यमानोऽपि सरागवाग्भिः ।
विकारिभावं न गतः स्वचित्ते, सोऽरिष्टनेमिः शरणाय भूयात् ॥१०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्वस्तिश्री रमते यदीयचरणाम्भोजे समुत्कण्ठिता,
भास्वद्भक्तिभरावनम्रसुमनःश्रेणीसमासेविते ।
सप्तस्फारफणामणीगृहमणिश्रेणीसमुद्योतिते(तं),
त्रैलोक्यं तमहं नये स्तुतिपथं **श्रीपार्श्वचिन्तामणिः( णिम् )** ॥१२॥
सोऽस्तु श्रिये नम्रसुरासुरेन्द्र-व्रजः सतां पार्श्वजिनेन्द्रचन्द्रः ।
प्रासादमासाद्य बभूव यस्य, द्विजिह्वमात्रो धरणेन्द्रनामा ॥१३॥
पार्श्वोऽस्तु पार्श्वाधिप(भिध)यक्षसेव्यः, सिद्ध्यै सुपर्वा(र्व)प्रभुभिर्निषेव्यः ।
यदंह्रिपद्मं भुजगाधिनाथः, संसेवते स्वर्गमिवाऽऽप्तुकामः ॥१३॥
स्वस्तिश्रीरभजद् यदीयचरणं चक्रादिचिह्नाङ्कितं,
दुष्टारिष्टविनाशनं निजपतिं ज्ञात्वेति मन्यामहे ।
स श्री**वीर**जिनेश्वरो विजयतामानम्रसंक्रन्दन-
श्रेणीशेखररत्नरश्मिसलिलस्नातांह्रिपङ्केरुहः ॥१४॥
त्वया महामोहमहीधवस्य, सेनान्यवीरैरजिता जिताऽसौ ।
अतो यथार्थं तव नाम देवैः, कृतं महावीर इतीव देव! ॥१५॥
यो गच्छतो मोक्षपथेऽन्तराय-करो भवत्यार्यजनस्य विश्वे ।
त्यक्तः स रागो भवता ततस्त्वां, श्रीवीतरागं प्रवदन्ति विज्ञाः ॥१६॥
॥ इति श्रीपञ्चतीर्थजिनवर्णनम् ॥

अथ वगडीनगरवर्णनम् –

यत्राऽर्हतां मन्दिरमौलिदेशे, ध्वजव्रजो राजति राजमानः ।
सम्पूर्णशीतद्युतिमण्डलश्री-गङ्गातरङ्गव्रज एष मन्ये ॥१७॥
यस्मिन् जिनानां सदने चकासा-म्बभूव कुम्भः शुभशातकौम्भः ।
पुरीगरीयःसुखमेक्षणाय, कूटं सुधापायिगिरेरिवाऽऽगात् ॥१८॥
निवर्ण्य (निर्वर्ण्य) यस्मिन् वसनाभिरामाः, पाञ्चालिका आर्हतमन्दिरान्तः ।
वितर्कयन्तीति बुधाः सतर्कं, नृत्याय किं देववशाः समीयुः ॥१९॥
चैत्योच्चयो यत्र विजित्य पापं, मुक्ताच्छलायासभवोत्थितोष्मा ।
स्वमस्तकस्थां विततां पताकां, जयश्रियं वक्तुमिवोच्चचाल ॥२०॥
यस्मिन् लसत्श(च्छ)शधराश्ममणीपिनद्धा, श्रीवीतरागसदनालिरलञ्चकार ।
जम्भासुहृत्पुरमदं प्रविजित्य साल-माला जयस्य किमु पौरगणैः प्रकृ(क्लृ)प्ता ॥२१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यस्मिन् जिनालयशिरःस्थितिमादधानः, पुष्णाति हेमकलशः सुदृशां प्रमोदम् ।
किं सैंहिकेयभयतो नभसोऽवतीर्य, पाथोजिनीपतिरमन्दमुपाजगाम ॥२२॥
यस्मिन् जिनौकःशिखरेषु दण्डः, वने कुरङ्गः कुसुमेषु बन्धः ।
सारीषु मारिर्जडता सरस्सु, रजः पयोजे द्रुदले प्रकम्पः ॥२३॥
निस्त्रिंशताऽसाविभजं मदत्वं, कुशीलता लाङ्गलिनां हलेषु ।
चन्द्रे कलङ्कः स्फटभृत्कुलेषु, द्विजिह्वतोच्चैर्न तु सज्जनेषु ॥२४॥
उत्तालतालतलसालरसालमुख्या, यस्मिन्नियाय गरिमां विपिने द्रुमाली ।
छत्रावली किमु मनोजमहीभुजं तन्-मूर्द्धाग्रभागवसतीं रचयाञ्चकार ॥२५॥
जिनालये यत्र विभाति केतु-श्चलन्(त्)समीरत्वरयाऽतिक्रान्तः ।
नरा-ऽसुरा-ऽमर्त्यगणां(णान्) प्रणन्तुं, जना[न्] समाकारयतीति जाने ॥२६॥
यस्मिन् जिनावसथधूपितधूपधूमं, सङ्गं दिवः प्रविदधन्तमुदीक्ष्य साक्षात् ।
अभ्यर्णकाननिवासिकलापिवृन्दं, सन्तुष्टिपुष्टिमगमद् घनसम्भ्रमेण ॥२७॥
यस्मिन्ननेकविजिगीषुपरक्षितीश-मातङ्गसङ्गमलिनं(न)त्वमिवाऽपकर्तुम् ।
स्नानार्थमेव सुरसिन्धुगलज्जलौघै-रुच्चैर्विवृद्धिमनुगच्छति यत्र वप्रः ॥२८॥
आक्रीडनाय सुरकिन्नरकामिनीनां, यत्कानने प्रतिकलं समुपेयुषीना(णा)म् ।
नानाद्रुमप्रपतयालुपरागभङ्गी, मूर्द्धस्य(स्थ?)कल्पतरुपुष्परजस्तृणाति ॥२९॥
चैत्योच्चयं यत्र निरीक्ष्य साक्षा-दतुच्छमुक्ताफलगुच्छपुच्छम् ।
प्रेक्षावतां मेरुगिरेर्दिदृक्षा, सौहित्यसाहित्यमुपेयुषी द्राग् ॥३०॥
यत्र स्फुटस्फटिकसङ्घटितार्हदौकः-शृङ्गे ललास निशि सत्प्रतिबिम्बमिन्दोः ।
साक्षात् किमिन्दुरिह मार्गयितुं निरङ्कां, भास्वत्प्रभां जिनपरिश्रयमन्वतिष्ठत् ॥३१॥
यत्राऽऽपणेषु विललास रसोद्भवाली, श्रीमन्महेश्वरमहर्द्धितटाकपाली ।
नैकद्विषन्मृगदृगश्रुजलप्लुतायाः,
पुष्पस्य पङ्क्तिरुदये(रुदयेन च?) वीरुधः किम् ॥३२॥
यस्मिन्नप्रतिमप्रतापतपनः स्वीयप्रजापालको,
राज्यं प्राज्यतरं भुनक्ति सततं क्षोणीभुजङ्गाग्रणीः ।
गत्वा यो मरुभूमिकास्वसुहृतः संहृत्य यावद् युधि,
प्रत्यागच्छति तद्वशाश्रुहृदिनी तावत् पुरः प्रे(प्रै)क्षत ॥३३॥
यत्राऽस्तोकसमृद्धलोकवनिता वातायने संस्थिताः
स्मृत्वा श्री**विजयप्रभ**स्स(भस्य) सुगुरो रङ्गद्गुणानां गणम् ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गानं पानमिवाऽमृतस्य वचसां पूरैर्दधत्योऽधिकं,
चक्रुर्देवमृ(मृ)गीदृशामनुकृतिं रागातिरेक:(क)स्थिते: ॥३४॥
स्वच्छातुच्छदुकूलवारणघटारङ्गत्तुरङ्गावली-
लाभाद् यत्र समागता धनदवत् प्राप्ता: प्रभूता(तां) श्रियम् ।
सार्थेशा: स्वपुरं गता: प्रतिकलं प्राणप्रियाणां गणै-
रन्ये इत्युपलक्षिता न शपथादानेन विश्वासिता: ॥३५॥
तपोग्नियोगान्न लभेत याव-दात्मार्जुनं शुद्धिमतीव तावत् ।
न युज्यते निर्वृतिमुद्रिकाया-मितीव केचित् तपसा परीता: ॥३६॥
इत्थं लसन्नैकजिनेन्द्रसद्म-प्रणाशितोद्दामतम:प्रचारे ।
राजन्वति श्रीमति तत्र सत्रे, श्रीपूज्यपादौ नगरे रमाना(णा?)म् ॥३७॥
॥ इति श्रीवगडीनगरवर्णनम् ॥

अथ श्री वीजापुरस्याहपुरवर्णनम् -

स्व:पुरीप्रहितसारमार्गणे, व्योम्नि दर्शयति दन्तसन्ततिम् ।
तिष्ठति प्रतिभुवं निरुध्य यद्, यत्र **विज्जपुरदुर्ग**संस्थित: ॥३८॥
तस्याऽस्ति पार्श्वेऽप्यतिशोभमान:, समृद्धिस**त्स्याहपुरा**भिधान: ।
ज्ञातं हि वादं कुरुतेऽत्यहर्निशं, अन्योन्यसम्पद्ग्रहणाय उद्यता ॥३९॥
दण्डो जिनेन्द्रायतने(तने) न लोके, सुमेषु बन्धो न तु सज्जनेषु ।
धर्मादिकार्ये व्यसनी मनुष्यो, न स्त्रीषु यस्मिन् नगरे समस्त: ॥४०॥
दरिद्रतादुर्भगताभिभूतो, यस्मिन् पुरे नाऽस्त्यखिलोऽपि लोक: ।
न रोग-शोकौ परवञ्चना नो, वने कुरङ्गो न गृहे नरस्य ॥४१॥
न स्वप्नमार्गेऽपि कदाचिदेव, शरीरकम्पोऽस्ति शरीरभाजाम् ।
समीरयोगे द्रुमपत्रजातं, विनैव यस्मिन् नगरे प्रशस्ते ॥४२॥
नितम्बिनीनां निकर: प्रकृष्ट:, प्रासादमध्ये जिनराजराजाम् ।
पूजां विधत्ते प्रतिघस्रमेत्य, यत्र प्रसून:(न)प्रकरै: प्रभाते ॥४३॥
यस्मिन् समागत्य पुरे निवासं, कुर्वन्त्यनेके व्यवहारिवर्गा: ।
सदासदाचारदृढप्रतिज्ञा:(ज्ञा), निर्वाहको(का) वाग्गुणवान्(वत्)कृतज्ञा: ॥४४॥
श्रीपूज्यपादाम्बुजसेवनायो-द्यता रता धर्मकथासु नित्यम् ।
वसन्त्यनेके श्रमणानुकूला:, सुश्रावका यत्र पुरेऽतिदक्षा: ॥४५॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत्र राजपथसङ्गतैर्गजै-रङ्गजैरिव महापयोमुचाम् ।
गर्जिताङ्कुशतडिद्भिराजितैः, सिच्यते मदजलेन भूतलम् ॥४६॥
यज्जवोद्धतहयालिदर्शन-त्रासभृद्रथहयानुवृत्तये ।
अम्बरे किमु रविर्भ्रमत्ययं, व्यत्ययं व्रजति नैव शासि[तः?] ॥४७॥
रम्भासौभाग्यदर्पप्रमथनपटुतारूपशृङ्गारसार-
प्रागल्भे(ल्भ्ये)न प्रियाणां युवहृदयभिदाऽव्यर्थशस्त्रश्रमेण ।
क्रीडामात्रप्रियेण स्मरनरपतिना सर्वसामन्तनीत्या,
प्रायः सौराज्यभाजः सकलसुखनिधेः सर्वदा सेव्यमानात् ॥४८॥
यस्मिन् पुरे पौरजनोपकर्ता, दुर्जेयवैरिव्रजमानहर्ता ।
विराजते भानुरिव प्रतापी, महद्ब(हाब)ली राजति **स्याह-सक्कन्दरः** ॥४९॥
औदार्यधैर्याद्यनणुप्रधान-गुणौघधारी रिपुमानहारी ।
यथार्थनामा **यवनाधिनाथ**-भूपालचूडामणिरस्ति यत्र ॥५०॥
श्रीजैनसिद्धान्तविचारचारु-हृद्वासनश्राद्धविराजमानात् ।
भूभामिनीभाललामभूताद् **विद्यापुरः(र)स्याहपुर**प्रधानात् ॥५१॥
महाप्रमोदामृतरत्नराशि-कल्लोललीलावहनेत्रमीनः ।
पीनप्रसर्पद्विनयेन भक्ति-चान्द्रीयप्रोल्लासितसच्चकोरः ॥५२॥
धूर्जटिसुतनयनमिता-वर्तैः किल पुलकपक्ष्मलोरस्कः ।
अभिवन्द्य तनोतितरां, विज्ञप्तिं **तत्त्वविजयशिशुः** ॥५३॥ [त्रिभिः कुलकम्]
कृत्यं चाऽत्र यथा प्राची-मुखताम्बूलसन्निभे ।
अम्भोजिनीमुखोल्लास-प्रावीण्यपटुरोचिषि ॥५४॥
प्रीत्या रथाङ्गदम्पत्यो, रहःक्रीडैककारणे ।
लोकाक्षिमुद्रणोदग्र-तमोराशिनिवारणे ॥५५॥
सभायां भासमानायां, सभासारैर्महाजनैः ।
**श्रीशत्रुञ्जयमाहात्म्यं**(त्म्य)-वाचनं कर्म(र्ण)पावनम् ॥५६॥
**तृतीयाङ्ग**स्य स्वाध्यायं(यः), तमस्तोमनिषूदनम् ।
पठनं-पाठनं चाऽपि, साधूनां योगवाहनम् ॥५७॥
इत्यादिधार्मिककृत्यो-पधानादौ च कर्मणि ।
श्रीमत्**पर्युषणा**ह्वाने क्रमप्राप्ते सुपर्वणि ॥५८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कल्पितानल्पसङ्कल्पा-ऽवाप्तिकल्पद्रुमोपमम् ।
साडम्बरभरं श्रीमत्-**कल्पसूत्रस्य** वाचनम् ॥५९॥
साधर्मिकाणां वात्सल्यं, दानं चाऽऽनन्दमेदुरम् ।
षष्ठाष्टमादिकं मास-क्षपणान्तं तपो व्यधात् ॥६०॥
चतुर्थारकतुल्यत्वं, येन स्यात् पञ्चमेऽप्यरे ।
वीतरागसमापत्ति-रिव ध्यातरि निश्चले ॥६१॥
इत्यादि शुभकृत्यानि, समभूवन् भवन्ति च ।
श्रीतातपादपाथोज-प्रसादोदयतोऽपरम् ॥६२॥

॥ इति श्रीबीजापुर-स्याहपुरवर्णनम् ॥

॥ अथ श्री**विजयप्रभसूरि**वर्णनम् ॥ —

तपागणेन्द्राऽनुपमान् गुणांस्ते, सहस्रजिह्वोऽपि न वक्तुमीशः ।
तदा समग्रान् लिखितुं समर्थो, ह्यहं कथं मन्दमतिर्भवामि ॥६३॥
**सूरीश्वरश्रीविजयप्रभा**ख्य-स्त्वन्नाममन्त्रं हृदयाब्जकोशे ।
धरन्ति ये धीरतया नरास्ते, सम्प्राप्नुवन्तीप्सितमाशु सौख्यम् ॥६४॥
धैर्यं मन्दरतः क्षमां भगवतो बुद्धिं सुराचार्यतः,
सौभाग्यं स्मरतः श्रियं धनदतो गम्भीरतामब्धितः ।
दानं दैवतवृक्षतः प्रसृमरां कान्तिं निशानाथतः,
धात्राऽऽदाय विनिर्मिता मुनिपते! मूर्तिस्त्वदीयाऽद्भुता ॥६५॥
यद्रूपं मकरध्वजस्य सदृशं मन्दाकिनीनिर्मलं,
चेतश्चिन्तितवस्तुपूरणपरं पादारविन्दद्वयम् ।
पीयूषोज्ज्वलितामृतद्युतिसमं वक्त्रं वपुश्चाऽमलं,
दृष्ट्वा मे हृदि जायते मुनिपते! मोदो महाश्चर्यकृत् ॥६६॥
यः स्वीकरोति मुनिनायक! तावकीनं, सङ्कल्पकल्पतरुकल्पपदारविन्दम् ।
तं संश्रयन्ति सतताखिलमङ्गलानि, सूरीशमुख्य**विजयप्रभ**सद्गरिष्ठः(ष्ठ)! ॥६७॥
भूभामिनीभालललाटवृत्ता-कारं मुखं ते गुरुराज! भाति ।
धात्रेव लावण्यरसस्य रक्षा-कृते कृतं स्थालमिदं विशालम् ॥६८॥
तपागणेशा बहवो बभूवु-स्तपागणे निर्जितवादिवृन्दाः ।
परं तपोमुख्यगुणैरशेषै-रत्यद्भुतस्त्वत्सदृशो न कोऽपि ॥६९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कूर्मोन्नते त्वच्चरणारविन्दे-ऽरुणा विभो! भाति नखावलीयम् ।
सेवां विधातुं शशिनेव साक्षात्-सम्प्रेखि(षि)ता तारकसन्तति[:] किम् ॥७०॥
स संस्तवार्हः कलिकाल एषः(ष), यत्र प्रभो! त्वं मम नायकोऽभूत् ।
शुभेन किं तेन युगत्रयेण, यत्रांऽह्रिसेवा तव नोपलब्धा ॥७१॥
तव क्षमागार! महानगार!, बुद्ध्या जितो देवगुरुश्चकार ।
स्वयं निवासं गगनान्तराले, स्वकीयचित्ते किमु लज्जमानः ॥७२॥
कलाकेलिगेहं कलाकेलिदेहं, कलालापमस्तोकलावण्यपुण्यम् ।
महालाभवन्तं भवन्तं भवन्ति स्तुवन्ति ज्ञवृन्दानि धीवस्तुवन्ति ॥७३॥
हताघप्रपञ्चोरुचञ्चद्विचार-प्रचारप्रियाचारुसञ्चारु(र)चारु ।
तव ज्ञान-विज्ञान-वैदुष्य-लक्ष्मी-विलासः किलाऽसह्य एवाऽन्यतीर्थैः(र्थ्यैः) ॥७४॥
तपागणाधार! तवाऽनुरूपः, क्षमाधरः कोऽपि मया न दृष्टः ।
यतः कृतघ्नेषु नरेषु जातो, भवान् कृतज्ञः करुणार्द्रचित्तः ॥७४॥
अगण्यपुण्यो जयति प्रसिद्धः, सूरीश्वरः **श्रीविजयप्रभो**ऽसौ ।
तारामिषात् तस्य गुणव्रजस्य, स्फुटा विधेः खे गणनादिगेषाम् ॥७५॥
तेषां श्रीपूज्यपादानां, लेखो नैकोऽप्युपागतः ।
अद्ययावदिहाऽब्दे तत्, स प्रसाद्यः कृपापरैः ॥७६॥
तैर्निर्जितानेककुतीर्थवादैः, सदा वदान्यत्वकृतप्रसादैः ।
आचारनिष्ठानिहतप्रमादैः, परम्पराप्राप्तपरप्रवादैः ॥७७॥
क्षमाश्रयत्वाद् विगलद्विषादै-र्विश्वत्रयीसेवितपुण्यपादैः ।
शिशोर्बुधोत्तंसयुजोऽवधायी(र्या), श्रीपूज्यपादैः प्रणतिस्त्रिसायम् ॥७८॥

तथा तत्र –

गणहितचिन्तननिरता, विबुधाः श्री**हेमविजय**गणिमुख्याः ।
**प्रीतिविजया**ख्यविबुधाः(धा), दक्षाः शिक्षाविधानपराः ॥७९॥
विबुधाश्च **उदयविजयाः**(या), वैयावृत्यादिकृत्ययेन(?) पराः ।
**रूपविजया**ख्यविबुधा-स्तथा बुधा **लब्धिविजया**ख्याः ॥८०॥
**सौभाग्यविजय**गणयो गणयः **प्रतापविजय**सञ्ज्ञाश्च ।
तपनिष्ठ**खिमाविजयो दयाविजया**ख्यास्तथा मुनयः ॥८१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इत्यादौ मुनय(नि)वर्गे, श्रीपूज्यचरणकमलभक्तेऽस्मिन् ।
नत्यनुनती प्रसाद्ये, यथाक्रमं सत्क्रमोत्तुङ्गैः ॥८२॥
**धीरविजयाख्य**विबुधाः(धा), गणयः **प्रेमविजयस**ञ्ज्ञाश्च ।
एकत्रस्थानसंस्थित-वृद्धस्तु **सहजविजयगणिः** ॥८३॥
इत्यादिसाधुवर्गः, सङ्घोऽत्रत्यश्च विनयनम्राङ्गः ।
श्रीपूज्यचरणकमलं, प्रणमति भक्त्योल्लसच्चित्तः ॥८४॥
मुनिचन्द्रत्रिशर(१७३५)मिते वर्षे हर्षेण **श्याहपुरनगरे** ।
कृष्णस्तु माघपञ्चमि(मी), इति मङ्गललेख(खो) लिपीचक्रे ॥८५॥

॥ इति श्रीविजयप्रभसूरिविज्ञप्तिरियम् ॥

—x—

(२)

## उदयपुरस्थं श्रीविजयरत्नसूरिं प्रति प्रेषितं पत्रम्

स्वस्तिश्रीरमणः करोतु कुशलं श्री**मारुदेवा**भिध-
स्तीर्थाधीश्वरसत्तमस्तनुमतामानम्रसङ्क्रन्दनः ।
यस्यांऽशे रुचिरालिसन्ततिरिव श्यामा जटा कोविदै-
र्दृष्ट्वाऽतर्कि किमित्यसौ स्थितवती कादम्बिनी भूधरे ॥१॥
स्वस्तिश्रियं दिशतु भूपति**विश्वसेन**-वंशाम्बरद्युमणिरस्ततमा जिनेन्द्रः ।
उच्चैरचिन्त्यगरिमा किल यस्त्रिलोकी-मित्रप्रसिद्धिमभजन्मृगलाञ्छनोऽपि ॥२॥
स्वस्तिश्रियां मम परं परिरम्भशर्म, सम्पादयत्वनघधर्मनिधिः स **शान्तिः** ।
मा भूद् वनेऽपि गगनेऽपि च सैंहिकेयाद्, भीतिर्ममेति हरिणो भजते यदंह्रिम् ॥३॥
स्वस्तिश्रिये स भवताद् भवतान्तिभेदी, नेदीयसीमुपदिशत् शिवमार्गनिष्ठा[म्] ।
निर्लक्ष्म यन्मुखमभून् मृगसेवयेन्दू, रङ्कुर्यदंह्रिमभजत् तमिवाऽनुगन्तुम् ॥४॥
यस्याऽग्रतः सुमनसः सुमनोभिमुक्ता, युक्तं बिभीत्य(विभान्त्य)लमधःकृतबन्धनौघाः ।
एतासु यत् त्रिजगतीजनचित्तमोह-सम्पादकत्वमिदमद्भुतमाततं न (?) ॥५॥
स्वस्तिश्रीः शुभदं यदीयचरणं प्राशिश्रियत् पूजितं,
पौलोमीपतिना सुमेरुशिखरे निर्माय जन्मोत्सवम् ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

श्री**चिन्तामणिपार्श्व**देवमतुलज्ञानैकरत्नाकरं,
दृप्यद्दर्पकदर्पमर्दनमहादेवं प्रणम्याऽऽदरात् ॥६॥
स्वस्तिश्रीः फलदायकः स भवतां भूयाद् भवापायहृत्,
पार्श्वः श्रीभगवान् कठोरकमठोदग्रस्मयध्वंसकृत् ।
यस्याऽम्बा शयनीयगा निशि तमस्यप्याशु पार्श्वे स्फुटं,
सर्पन्तं भुजगं निरीक्षितवती पार्श्वेति संज्ञा ततः ॥७॥
शिरःस्थनागेन्द्रफणामणीनां, मिषेण दीपानिव सप्त दध्रे ।
यो नित्यमुद्योतयितुं जगन्ति, स पार्श्वविश्वप्रभुरस्तु सिद्ध्यै ॥८॥
दत्त्वा च दानानि तपांसि तप्त्वा, लोकोत्तरं मोहरिपूंश्च हत्वा ।
येनाऽर्जितं वीरयशस्त्रिधाऽपि, स **वीरदेवः** शरणं ममाऽस्तु ॥९॥

इति श्रीवीजापुर-स्याहपुरमण्डनश्रीतीर्थवर्णनम् ॥

अथ उदयपुरनगरवर्णनम्-

यस्मिन् जिनेश्वरगृहेषु सुवर्णकुम्भोः(म्भो), भास्वत्प्रभाभिरभितः प्रसरीसरीति ।
अश्नन् रुषो(षा?) निजकमूर्द्धगभानुभानू-नाहारतुल्यतरमुद्गिरतीव मन्ये ॥१०॥
जिनस्य चैत्योपरि निष्ककुम्भो, यस्मिन् पुरेऽतीव विभाति रम्यः ।
किं सिंहिकापुत्रभयादिवाऽभ्रा-दागत्य भानुः शरणं प्रपन्नः ॥११॥
सन्दृश्यते पाण्डुपलाशकल्पो, दिवा निशेशो गगनाङ्गणस्थः ।
जगत्त्रयव्याप्तजिनप्रताप-सूर्योदयेनेव हतप्रभावः ॥१२॥
स्वच्छातुच्छदुकूलवारणघटारङ्गत्तुरङ्गावली-
लाभाद् यत्र समागता धनदवत् प्राप्ताः प्रभूतां श्रियम् ।
सार्थेशा स्वपुरं गताः प्रतिकलं प्राणप्रियाणां गणै-
रन्ये इत्युपलक्षिता न शपथादानेन विश्वासिताः ॥१३॥
तपोग्नियोगान्न लभेत याव-दात्मार्जुनं शुद्धिमतीव तावत् ।
न युज्यते निर्वृतिमुक्ति(द्रि)काया-मितीव केचित् तपसा परीताः ॥१४॥
आदेयहेयो(ये) सदसत्प्रवृत्ति(त्ती), सम्यक् श्रुतेरेव विदन्ति दक्षाः ।
इतीव केचित् पुरतो नराणां, समुद्यता धर्मकथाप्रथासु ॥१५॥
सर्वेषु दानेषु रमानिदानं, ज्ञानस्य दानं भगवद्भिरुक्तम् ।
अतः श्रुतज्ञानरहस्यसङ्ख्या-सङ्ख्यानतानाः कतिचिद् विविक्ताः ॥१६॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

योगादृते नो फलमुच्चिनोति, महागमाद्यध्ययनप्रवृत्तिः ।
पर्णीव मूलेन विनेति केचित्, योगाभियोगोपचितप्रयोगाः ॥१७॥
दानादिभिर्युक्तमपि प्रकामं, लयोज्झितं कामयते न मुक्तिः ।
ततोऽर्हतां नाम पिधाय चित्ते, ध्यानप्रधाना इतरे च केचित् ॥१८॥
श्रियाऽनुकूलं विनयः प्रकृष्टं, मूलं मतं श्रीजिनशासनस्य ।
तस्माद् गुरूणां प्रतिभा गुरूणा-मातन्वते सद्‌विनयं च केचित् ॥१९॥
वैराग्यशाणप्रतिघर्षणेन, यावन्न तीक्ष्णं शमशस्त्रमुद्यत् ।
मोहाद्यरीणां प्रशमः क्व तावद्, वैराग्यभाजः कतिचित् ततोऽन्ये ॥२०॥
यद्‌गृहोज्ज्वलगवाक्षविस्फुरत्-कामिनीमुखसहस्रवीक्षणात् ।
वैरिवर्गपतितः पलायते, भीतभीत इव शीतदीधितिः ॥२१॥
यत्र नक्तमनुबिम्बचुम्बिता, किन्तु शीतमहसोज्झितामृतैः ।
निर्मितं मधुरताधुरन्धरं, वापिकासु सलिलं विराजते ॥२२॥
यत्र नीलमणिसौधमूर्च्छितं, शङ्क्यते विधुमयूखमण्डलम् ।
राहुबाहुकृतवल्गनश्रमो-दीतधर्मकणतारकाङ्कितम् ॥२३॥
यत्र हारनिकरे विसूत्रिते, कामकेलिरभसान् मृगीदृशाम् ।
प्राततराततरविद्युतिभ्रमाद्, भाति बालकरलालनोद्यमः ॥२४॥
न्यञ्चदञ्चितमनोभवोद्धतो-द्‌भ्रान्तघोटकघटानुकारिभिः ।
यत्र सत्रपवधूविलोकितै-र्जायते तरुणचित्तविक्रिया ॥२५॥
यत्र बालवनिताधरामृत-स्यन्दि गानमधिगम्य विस्मिताः ।
नाऽधुनाऽपि सुरलोकयोषित-स्तद्भवां जहति निर्निमेषताम् ॥२६॥
वायुरेव किल यत्र तस्करः, पौरसौरभसमग्रसम्पदाम् ।
केवलं प्रियतमेषु बन्धनं, सुभ्रुवां ललितबाहुवल्लिभिः ॥२७॥
केवलं कठिनता पयोधरे, श्यामता च महती कचोच्चये ।
वक्रता च सुदृशासु वीक्ष्यते, भ्रूतटे कृतककोपशालिनि ॥२८॥
म्लानता सुमनसां निशाव्यये, नो कदापि विपुले धनव्ययम्(ये?) ।
कामकेलिषु नकारघोषणा, पोषणा सुसुदृशां न चाऽर्थिनाम् ॥२९॥
इत्थं निजाचारविचारभार-प्रतानिनीसारविसारिमृक्षैः ।
प्रतिश्रयो यत्र बभौ यतीन्द्रैः, सपर्ववृन्दैरिव नाकिलोकः ॥३०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत्रोद्योतपुरः सुरः पुरसमो(?) गर्वसर्वंकषश्री-
सौभाग्योद्भूतभव्योत्सवभवभजनश्रेणिविभ्राजितायाम् ।
पूज्यश्रीपूज्यपादाम्बुजयुगलरजोराजिभिः पावितायां,
सम्यक्त्व-ज्ञानगोष्ठी-चरणचतुरताभावभृद्भावितायाम् ॥३१॥

॥ इति श्रीउदयपुरनगरवर्णनम् ॥

अथ **वीजापुर-स्याहपुर**वर्णनम्-

स्वां सुतां चिरयदेकवासिनीं, यत्र सञ्जिगमिषुः पयोनिधिः ।
आययौ नृपसरोमिषान् मुने-र्भीतितः कृतकभिन्ननामभृत् ॥३२॥
यत्र बन्धुवियुजो वणिग्जना, भान्त्ययोगिगुणवेश्मगा इव ।
तेषु तेन सततं प्रवर्त्तते, शुक्लतुर्यचरणोचितः(ता) स्थितिः ॥३३॥
कुम्भयोनिमुनिकोपभाजनं, या विहाय जलधिं रमा किमु ।
यत्र **स्याहपुर**रत्नसञ्चया, क्वापि दुर्गभुवि वासमासदत् ॥३४॥
यद्वनेन कुसुमौघसौरभ-स्फारचैत्ररथजैत्रसम्पदा ।
जीयते स्म ननु नन्दनं वनं, लज्जया क्वचिदगोचरं गतम् ॥३५॥
तस्माद् भूपालसेनाद्विरदहयरथोल्लोलभूगोलभार-
भ्रश्यन्नागेन्द्रचूडामणिकिरणतडिद्भग्नपातालमूलात् ।
भूपो वप्राग्रजाग्रन्मणिमिलितदिवानाथकान्तिप्रचारो-
दञ्चच्छर्वेक्षणाग्निद्रुतविधुदलितस्वर्नदीदिव्यकूलात् ॥३६॥
यत्र सागर इवाऽभिवीक्ष्यते, कुम्भयोनिमुनिपीतपान्थसि ।
केवलं धनवदापणव्रजे, प्रत्नरत्ननिकरः परिस्फुटः ॥३७॥
यद्गृहाद्रिशिखरं मृगीदृशा-माननेन्दुकलनेन जायते ।
स्वर्नदीचकितचक्रवाकिका-वक्त्रनिर्गतमृणालमांसलम् ॥३८॥
भानुकान्तिभरतप्तवप्रभू-भा(र्भा)नुकान्तघनतापविह्वला ।
या पिबत्यमृतरश्मिममण्डलं, प्रोच्चसौधशिखरानना निशि ॥३९॥
देवतृप्ति-मृगसेवनादिना, यद्वधूमुखतुलामनाप्नुवन् ।
बिम्बचुम्बिपरिखोन्दुके बभौ, दत्तकम्प इव दुःखितो विधुः ॥४०॥
लाञ्छनोद्दलनवाञ्छया विधु-स्तुङ्गयद्धरणशैलसानुषु ।
सौचमुल्लिखति शीतगुर्वपु-र्वेदना नहि कलङ्कतोऽधिका ॥४१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

[स्वः]प्रभूः(भुः) सपदि यामतोलयत्, स्वःपुरेण सह दिव्यसम्पदा ।
भूव्यवस्थितिनभोभिसर्पणे, तद्विशेषगुरुताविवेचके ॥४२॥
नानादेशीयगुण-व्रजसङ्करसम्भवनवरसाद्यात् ।
धर्मार्थकामयोने-वी(**वीं**)ज्जापुर-**स्याहपुरनगरात्** ॥४३॥
विनयावनतस्कन्धः, प्रेमसम्बन्धबन्धुरः ।
श्रीमदनूचानगुण-स्मृतिजातप्रकृष्टमुत् ॥४४॥
अकुण्ठोत्कण्ठया पूर्णो, भक्तिप्राग्भारभासुरः ।
त्वरमाणमनोराज्य-प्राज्यस्नेहविलासवान् ॥४५॥
तरणिप्रमितावर्त्ते-र्वन्दित्वा श्रीबुधान्वितः ।
विज्ञप्तिं तनुते शिष्य-**स्तत्त्वविजय**सञ्ज्ञितः ॥४६॥
यथाकृत्यमिह प्राची-मुखादर्शित्वमीयुषि ।
भास्करो(रे) तस्करध्वान्त-ध्वंसनाय कृतोद्यमे ॥४७॥
शीतगौ भानुकान्त्यग्नौ, स्वं वपुर्लघु जुह्वति ।
तत्रैव जायमानेव, तारादारानुधावते ॥४८॥
भानोर्भयेन निर्गत्य, जगज्जनविलोचनात् ।
निद्रायां च निलीनाया-मुलूकानां कुटुम्बकैः(के) ॥४९॥
जाते प्रभाते घुसृण-च्छटासिक्तजगत्त्रये ।
सभायां परिपूर्णायां, सद्भिः सद्भावबोद्ध(द्धृ)भिः ॥५०॥
व्याख्यायमाने **श्रीशत्रुञ्जय-माहात्म्य(त्म्ये)** प्रतिवासरम् ।
विधीयमाने स्वाध्याये, **चतुर्थाङ्गागमस्य** च ॥५१॥
प्रवर्त्तमाने सद्योगो-पधानादौ च कर्मणि ।
पर्वणि क्रमतः प्राप्ते, श्रीमत्**पर्युषणा**भिधे ॥५२॥
क्षणेषु नवसु श्रीमत्-**कल्पसूत्रस्य** वाचनम् ।
अजायत महोत्साह-चमत्कृतजगज्जनम् ॥५३॥
अष्टाहिकादिदुस्तप्य-तपसस्तपनं तथा ।
वपनं वित्तबीजस्य, धर्मभूरुहसिद्धये ॥५४॥
वनीपकजनानां च, दानेन परिपोषणम् ।
शोषणं भवबीजस्य, कन्दर्पशरमोषणम् ॥५५॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

धर्मकर्माण्युदप्युच्चै-र्जातं सञ्जायतेऽपि च ।
उपधानव्रतोच्चार-सन्मालारोपणादिकम् ॥५६॥
सर्वस्यामपि धर्मस्यो-न्नतावस्यां निबन्धनम् ।
कृपाऽनूचानपादानां, प्रत्यूहपटलच्छिदाम् ॥५७॥
अपरम् - ॥ इति **श्रीवीजापुरस्याहपुर**वर्णनम् ॥

अथ श्रीविजयरत्नसूरिवर्णनम् —

यदीयकेशैः कृतबर्हगर्हो, बर्ही धृतह्रीक इव प्रणष्टः ।
जिगीषया स्कन्दमपि प्रपन्नो, लेभेऽर्द्धचन्द्रं महतोऽपमानात् ॥५८॥
गुणा(णां)स्त्वदीया(यान्) तपगच्छनाथ!, वक्तुं समर्था न भवन्ति देवाः ।
अतः कथं मन्दमतिः प्रभोऽहं, भवामि तान् वर्णयितुं समर्थः ॥५९॥
**विजयरत्न! तपागण**नायक!, श्रितमनिन्दितमंह्रियुगं यकैः ।
तव नरप्रवरैर्जगतीह तं, न हि विमुञ्चति रागवशाद् रमा ॥६०॥
क्षमानदीनायक! नायक! श्री-**तपागणेशा**ऽद्भुतभारती ते ।
यैः कर्णजाहं विहिता प्रधानै-र्नरैर्न तस्य प्रभवन्ति दोषाः ॥६१॥
स श्रीमान् विजयी जयी विजयतां सूरीशचूडामणिः,
श्रीमत्श्री(च्छ्री)**विजयरत्नसूरि**सुगुरुर्गाम्भीर्यवारांनिधिः ।
यस्य श्रीगणनायकस्य नयनानन्दप्रदं दर्शनं,
दृष्ट्वा मद्हृदये भवत्यविरतं हर्षप्रकर्षो महान् ॥६२॥
आराधितं त्वच्चरणारविन्द-मेकाग्रचित्तेन यकैर्नरैस्तान् ।
नरान् नमन्ति प्रकटप्रभावान्, सदेवविश्वत्रितयीमनुष्याः ॥६३॥
यः संस्तुतो यच्छति मोक्षलक्ष्मीं, तपागणेशो जगतीजनस्य ।
वदान्यमुख्यं सुगुरुं विमुच्य, तं कं श्रयेत् प्राज्ञजनोऽन्यमत्र ॥६४॥
हतारिष्टदिष्टप्रकृष्टप्रहृष्ट-स्वधीमृष्टसंक्लिष्टता शिष्टता ते ।
कनिष्ठा न दृष्टा गरिष्ठा नु दृष्टा, वरिष्ठाशयैरिष्टदृष्ट्याऽविरोधात् ॥६५॥
विपक्षप्रतिक्षेपदक्ष! त्वदंह्रि,(?) प्रभोऽध्यक्षलाक्षारसक्षालितेव ।
परि(री)क्षाकरी दक्षतालक्षणाना-मरुक्षाक्षरक्षारतासक्षणानाम् ॥६६॥
हरशिलोच्चय-हार-मरुन्नदी-हसिततारक-शीतकरश्रियम् ।
अनुहरन्ति परिस्फुरितव्रता-युधवला धवला तव कीर्त्तयः ॥६७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गुरुसमागममात्रसमुद्भवद्-भवविरक्तमतिस्त्वमहो! यथा ।
इह विमुक्तगृहा नवयो(यौ)वने, स्फुरतिके रतिकेलिवने तथा ॥६८॥

यां विधाय विधिना कृतार्थता, स्वश्रमस्य निरवापि चेतसि ।
प्रत्यतिष्ठ(ष्ठि)पदिति प्रगल्भधी-श्चारुमूर्त्तिगुरुरेव निर्मिता ॥६९॥

अगण्यपुण्यो जयति प्रसिद्धः, गुरुर्गरीयान् **विजयरत्नसूरिः** ।
तारामिषात् तस्य गुणव्रजस्य, स्फुटा विधेः खे गणनादिगेषाम् ॥७०॥

क्षमाश्रयत्वाद् विगलद्विषादै-र्जगत्त्रयीसेवितयुग्म(पुण्य)पादैः ।
शिशोर्बुधोत्तंसयुजोऽवधार्या, श्रीतातपादैः प्रणतिस्त्रिसायम् ॥७१॥

तथा तत्र –

कलितस्वपरविशेषा, **सम्मतिशास्त्रा( स्त्रम् )** इवाऽस्मदिष्टतमाः ।
पण्डितपर्षद्मुख्याः, **श्रीपुण्यसुन्दरो( रा )** विबुधाः ॥७२॥

**श्रीविमलविजय**विबुधाः(धा), विबुधाः **श्रीज्ञानविजय**नामानः ।
**महिमासुन्दर**विबुधाः(धा), गणयः **श्रीलक्ष्मीविजया**ख्यः(ख्याः) ॥७३॥

**लाभसागराख्यगणयो**, वर्गे श्रीतातचरणभक्तेऽस्मिन् ।
नत्यनुनति(ती) प्रसाद्ये, यथाक्रमं सत्क्रमोत्तुङ्गैः ॥७४॥

अत्र– **धीरविजया**ख्यविबुधाः(धा), गणयः **[श्री]प्रेमविजय**नामानः ।
अत्रालयाधिष्ठाता, वृद्धश्च **सहजविजयगणिः** ॥७५॥

इत्यादिमुनय(मुनि)वर्गः, श्राद्ध-श्राद्धीश्च विनयनम्राङ्गः(?) ।
श्रीगुरुचरणकमलं, प्रणमति भक्त्योल्लसच्चित्तः ॥७६॥

७ १ ३ ५
विज्ञप्तिरियं लेखः, ऋषि-विधु-त्रि-बाणमानमितवर्षे ।
फाल्गुनसितसप्तम्याम्, इति मङ्गलं **स्याहपुरनगरे** ॥७८॥

॥ इति श्रीविजयरत्नसूरीश्वरविज्ञप्तिरियं लेखः ॥

—x—

शेठ आणंदजी कल्याणजी जैन पुस्तकभण्डार
लींबडी

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(१९)

# श्रीपद्मानन्दमुनिलिखितो विज्ञप्तिलेखः

श्रीगुरुभ्यो नमः ॥

स्वस्तिश्रीरभवद् मरालदयिता नव्या पदाम्भोरुहे
नित्यं वासमुपेयुषी स्वयमतः शृङ्गारिताभाजनम् ।
ज्ञात्वैवोत्सुकमानसाऽऽश्रयवती लोलेक्षणा लोचनः(न-)
भ्राम्यद्भृङ्गविनोदनोदनमिदं तज्जीवनाद् दूरगम् ॥१॥

रम्यारिष्टवरिष्ठलष्टविलसत्प्रोद्दामधामास्पदं
चञ्चल्लोलशिखाप्रथाः प्रथयते यस्यांऽसयोर्वंशयोः ।
शोभां हाटकभूधरोद्गतलसत्सच्चित्रवल्याः स्फुटं
सर्वानन्दपदप्ररोहधरणीं विश्वर्द्धिविख्यातिनीम् ॥२॥

यस्यांऽसयोर्हाटकहारिवर्णयोः, शिरोरुहाणां लतिका विरेजे ।
स्वर्णाद्रिकूटस्थघनावलीव, सार्वाग्र _ कृष्णपतिस्वरूपाः ॥३॥

श्रीनाभिनन्दन ! महोदयदीप्तदेह !, श्रीनाभिनन्दनमहोदयदीप्तदेह !
श्रीनाभिनन्दनमहोदयदीप्तदेह !, श्रीनाभिनन्दनमहोदयदीप्तदेह ! ॥४॥

सुरावलः शोभननन्दनाढ्यः, प्ररूढकल्पद्रुमशालमानः ।
सुपर्वपर्षत्परितोषहेतूः(तुः), श्रीमारुदेवः सुरभूधरोऽभूत् ॥५॥

वृषाङ्को धूर्जटी देवः, शङ्करो घनवाहनः ।
महाव्रत्यभवो योऽस्ती-शानो रुद्रो महाव्रती ॥६॥

वृषाङ्कोऽपि वृषैर्हीनो, वृषलाञ्छनकोऽपि यः ।
मृत्युञ्जयो मृत्युकोऽपि मृत्युञ्जयनरेरितः ॥७॥

स्वस्तिश्रीभृदुरीकृतो यदि कृतो भीतः कुरङ्गोऽप्ययं
सौवाङ्के विनिवेश्य लाञ्छनमिषादित्याप्तभावादिव ।
सिंहाद्यैरभिभूत एष गहने कान्ताकटाक्षैः पुरे
लीनोऽप्यब्जमभूत् कलङ्ककृदहो त्रायस्व मामप्यतः ॥८॥

पारापतोऽपि यदि देहसमर्पणेन, प्राग् नाथ! मेघनरराजभवेऽप्यरक्षि ।
सम्प्रत्यवाप्तभुवनोत्तमवैभवोऽपि, स्वान्तार्पणेन किमु नाऽवसि मां भवाब्धेः ॥९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

शशिनि तावदितोऽस्मि कलङ्कतां, जिनप! राजिमतीषु कुरङ्गता[म्] ।
विमलगानरसे स्पृहयालुता-मिव मृगो ह्यचिरातनयं श्रित: ॥१०॥
स्वस्तिश्रिया समधिगम्य पदारविन्दं, यस्य प्रभोस्सुरनरा अपि पूजयन्ति ।
गोपालवामनयनाश्रिततोयजातं, यद्वद् विहङ्गमपतिप्रमुखा रमन्ते ॥११॥
स्वस्तिश्रिये पार्श्वजिनाधिराज(जः), पटिष्ण(ष्ठ?)चिच्चङ्गिमचारुवाजः ।
क्षमाक्षमानि:कृति(निष्कृति?)मैकगञ्जः, प्रोद्यत्तपःकर्मविशालपिञ्जः ॥१२॥
स्वस्तिश्रिये कस्य न यस्य पाद-पङ्केरुहं जातमशेषसत्त्वे ।
अभक्तितो भक्तिवशाद् व(?)जापि-दृष्टान्तभूतावुरगासुरेन्द्रौ ॥१३॥
यो वर्णोऽन्तस्थताद्यैः कलुषितहृदयः सोऽपि नीतो महत्त्वं
जन्याख्याभ्यां स्वकाभ्यां 'यल' इति यमलं वर्णयोः किं विश्रृ(सृ)ष्टम् ।
इत्थं जानन्निवादेस्त्वमसि जिनपते ! वीरदेवाऽत्र लोके
नूनं छेद्यं जडत्वं तदिह न ध्रियते सर्ववेत्रिश्वकेन ॥१४॥
नैकद्यं प्राप विप्रस्तव वरभुजयोः सेवनाभिः कियद्भि-
लोंभार्थेऽन्त्यौ महाख्यौ श्रमणगुणनिधे! नाममध्यं तदा तौ ।
त्वत्पादाम्भोजसेवाश्रयणनिपुणधीश्चञ्चरीकायमाणो
निर्लोभार्थी कृतार्थी किमिह निजपदाम्भोजसेवाविहीनः ॥१५॥
तान् जिनेन्द्रचन्द्रान् विगततन्द्रान् नमितसुरेन्द्रान् प्रणामपदवीमानीय-
प्रोच्चैर्यत्र जिनेन्द्रसद्मशिखरश्रेणीषु दण्डावली
स्फूर्जद्रत्नमरीचिवीचिनिचयैः प्रक्षालयन्ती नभः ।
लीलालिङ्गनकौतुकं विदधते यत्राऽमरीणां गणाः
कामस्थामवशंवदाः प्रियतमैर्युक्ता वियुक्ता अपि ॥१६॥
यत्रोत्तुङ्गविहारशृङ्गविलसद्दण्डावलीस्तम्भता-
मन्योन्यं किल कामकेलिकलहे सिद्धाङ्गनानां प्री(प्रि)यैः ।
यात्युद्बन्धनहेतवे ध्वजपटोऽप्युद्दण्डवाताहतो
निर्जन्न(?) व्यजनायते मृगदृशां कामश्रमापास्तये ॥१७॥
प्रासादोत्तुङ्गशृङ्गध्वजपटविलसद्दण्डपाण्डित्यदम्भा-
दुद्बाहुर्वावदीति त्रिभुवननगरीयां पुरीति प्रकर्षात् ।
हंहो! आयातपूर्वो यदि किल कमलाकेलिकन्दर्पसर्पः(र्प)-
आस्ते वो जागरूकस्तर्हि(?) गरुड इवाऽस्त्येष मे चण्डदण्डः ॥१८॥

Jain Educationa International	For Personal and Private Use Only	www.jainelibrary.org

प्रासादोद्यत्पताकाऽञ्चलचपलरणत्किङ्किणीकोटिरावै-
रात्रौ सङ्गीतरि(री)तिप्रवणमतिमतां जागरं या करोति ।
प्रातः प्रासादघण्टारवमुखरहरीकुञ्जगुञ्जन्मृदङ्ग-
ध्वानान्नाट्यं नटद्भि(ः) शिखिभिरुपहितं कोकिलामञ्जुगी[तम्] ॥१९॥
वित्तोपायनजीविनः सुरगणा मत्तोऽभवन् दिग्गजा
वाताद्यै रजसो विशुद्धकरणाच्चन्द्रादयो द्योतनात् ।
पातालाद् भुजगाधिपोऽपि चरणव्याजाच्च मां सेवते
विश्वस्येयमितीव बोधनकृते याऽऽधत्त चण्डध्वजम् ॥२०॥
उच्चैर्दण्डपताकिकाकपटतो याऽपूर्वसल्लेखिनी
मन्ये स्वं भुजमुद्विधाय लिखतीत्युच्चैर्नभोमण्डले ।
नाऽर्हद्भ्यः परमेश्वरा न च रवेस्तेजो परन्नापरन्(म्)
व्यु(व्यू)ढं व्योमतलात् तथैव न पुरी मत्तोऽधिका विष्टपे ॥२१॥
लोकोद्धारधुरन्धरा वयमितो गर्जन्तु भां दिग्गजाः
क्षोणीपीठसमुद्धृतेर्भुजगराड् गर्वं दधातू(तु) क्षणम् ।
मेघाद्याः क्षितिजीवनोपकृतितो पुर्वै(पूर्वे) स्थितं तन्वतां
चिन्तातीतफलप्रदा वयमतो हृष्यन्तु मण्यादयः ॥२२॥
विश्वोद्योतकरा वयं वयमितिच्छायाभृदर्कादयो
देवानां पदवी तले प्रमुदिता नित्योदयं कुर्वताम् ।
यः कश्चिन् न हि मन्यते जिनपतिं तस्यैष दण्डः पटु-
मूर्द्धर्व(र्द्ध)स्फोटनकृत् करे भ्रमति मे वक्तीव या पूरिति ॥२३॥
माद्यन्मत्तमधुव्रता रणजणज्झंकारबद्धादराः(रा),
गर्जद्दिग्गजगल्लभित्तिपटलीस्त्यक्त्वा पुरा स्संस्तुताः(?) ।
उद्यन्नूतनगन्धबन्धविवशा मेघभ्रमं तन्वते
यत्रोत्तुङ्गविहारशृङ्गकलशेषूच्चैः पतन्तोऽनिशम् ॥२४॥
यत्र श्रीजिनमन्दिरेषु सततं कल्याणकुम्भा बभु-
र्भूयः सौरभलालसेः(सैः) सुमनसां मालाप्रसूनव्रतैः ।
श्यामीभूतमुषा इतीव भगवद्भक्त्यैकबद्धादराः(रा)
एतेऽद्यापि किमङ्ग नैव मनुजा मोक्षश्रीयां(या) भाजनम् ॥२५॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

उत्फुल्लामलकोमलोत्पलदलव्यालोलभृङ्गावली-
झङ्काररवगीतगाननिपुणाः सौवर्णकुम्भा बभुः ।
यत्राऽर्हत्सदनेषु सौवविभवस्वर्गत्रपासम्भवां(वा)
गायन्तीव जयश्रियं जिनपतिप्रसादवृन्दस्य किम् ? ॥२६॥

उद्यत्पीनपयोधरप्रतिभटाश्चञ्चत्कुटा रेजिरे
यत्र श्रीजिनचन्द्रचन्द्रशिखरश्रेणीषु लब्धास्पदाः ।
भूपीठात् कलिकश्मलादिकलुषान्निर्गत्य रम्भास्तनै-
र्वैराद् देवगृहेऽप्यगन्तू(न्तु)मनसो तिष्ठन्निहैव ह्यमी ॥२७॥

भोगान्ते परिणाममन्थरदृशो व्यामूढसिद्धाङ्गनाः,
कामव्याकुलभर्तृदत्तनखरश्रेणीविदीर्णस्तनाः ।
यत्र श्रीजिनसद्महेमकलशान् प्रालेयसच्छीतला-
नौत्सुक्यात् परिरभ्य गाढमुरसा शश्वल्लभन्ते सुखम् ॥२८॥

यत्र स्फाटिकजैनसद्मशिखरश्रेणीस्थकुम्भावली-
मुद्यत्तप्तसुवर्णचूर्णघटितामालोक्य जातत्रपाः ।
मन्ये पीनपयोधराः स्मितदृशां नंष्ट्वाऽविशन् कञ्चुके
काठिन्योपचिताश्च चूचुकमिषात् श्यामं मुखं चक्रिरे ॥२९॥

कुर्वन्तः शतचन्द्रितं शुचिनभः शृङ्गारयन्तो दिशः
पुष्णन्तो नगरश्री(श्रि)यं रुचिभरैः स्यन्तस्तमोमण्डलम् ।
मुष्णन्तो दिवि तारकान् रुचिभरैः सौवर्णकुम्भा बभु-
र्यत्र श्रीजिनराजसद्मशिखरश्रेणीप्रवेणीगताः ॥३०॥

कुम्भोऽयं किल चक्रवर्त्तितनयो वप्ता च पीताम्बुधे-
राजन्मान्गिविशुद्धि(द्ध)शीलविमलस्सर्वाङ्गसौन्दर्यभाक् ।
कल्याणेषु वसुप्रमेषु जगतामाद्यं तथा मङ्गलं
मन्येऽधारि कुटैरितीव मुकुटीभूतः शिरस्यर्हताम् ॥३१॥

शीतांशुर्विहरन् विहङ्गनिगमे व्यामूढगत्याऽन्यदा
यत्रोत्तू(त्तु)ङ्गजिनेन्द्रसद्मशिखरप्रान्तादवाप्तक्षतः ।
मन्येऽतः समभूत् कलङ्ककलुषो नो चेत् कुतोऽतः परं
भूयो भ्रंशभिया विलम्बितगतिर्नित्यं शशाङ्को भवेत् ? ॥३२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत्रोत्तुङ्गजिनेन्द्रसद्मशिखरप्रान्ते सू(सु)तीक्ष्णेऽक्षलत् ।
* ---------------

तत्रैकस्तुरगः पयोधिरसनापीठेऽपतच्चाऽष्टमः
प्राषृ(प)त्तत्प्रभृति प्रभु(भू)तविभवः सप्ताश्वसञ्ज्ञां रवि(विः) ॥३३॥
रात्रौ यत्र जिनेन्द्रसद्मशिखराण्याभान्ति वृक्षा ई(इ)व,
येषां बिभ्रति तारका विकसिता व्योम्नि प्रसूनव्रतम् ।
नेत्रानन्दविधायकं फलमयं तत्राऽलगच्चन्द्रमाः(मा)
नो चेद् देवतया कथं कथमयं व्यावर्ण(र्ण्य)ते सज्जनैः ? ॥३४॥

यत्र जननीरागाः पुत्राः क्रीडावन-पर्वताश्च, न नृपाः(३), सारङ्गाल्युपचितानि वनानि नगराणि च(२), यत्र नीरङ्गाः मत्स्याः (२) न तु जनाः, घनाघनाः(ना) मेघाः(घा) न तू(तु) यन्निवासिनः, कादम्बरीकथा इवाऽप्रापितान्ताः स्त्रियो बुद्धयश्च(२), ध्रियते दानसौरभमिभैरिभ्यैश्च (२), मात्रागणना छन्दःशास्त्रेषु (२), मित्रोदयद्वेषिनो(ण) उलूको(काः)(२) न तु विषयजनाः । चित्रं च-परद्रव्यापहारिणो यत्र व्यवहारिजनाः (२), न तु चौराः ।

किं वर्ण्यतेऽधिकं देशो, लेशो नास्ति कुकर्मणाम् ।
हिंस्य-हिंसकभावोऽपि, कर्माऽधर्मेष्व योज्यते(?) ॥३५॥

तत्र देशे यत्र पुरे प्रमाणशास्त्रतोऽप्यधिकप्रमाणता (२) यत्र न द्रव्य-प्रमाणं(२) न गुणानां मानं (२) बुद्धकि(द्धिक?)रणमानान्यपि कर्माण्यनेककर्माणि (२) सत्यपि सामान्ये सामान्यजनभावः (२), परं विशेषघटनायां सास्त्रघट्टनम् (२), अनेकशो यत्र समवायाः (२), प्रागभावपरिपालनमपरिपालनं च सदाऽसत्सद्व-स्तुनिष्पत्तौ । प्रद्ध्वंसाभावाभावोऽपि धर्मा(र्म)कर्मणि । कुकर्मण्यत्यन्ताभावः । सर्वज्ञातिष्वन्योन्याभावः । यत्र सुसूत्राणि- द्विजवक्षांसि, विपुलशास्त्राणि, धनिगृहाणि परिधानाम्बराणि च (४) । सदा विकसितानि- जनचित्तानि, अरिमण्डलानि, कमलाकरेषु कमलानि, करावयवाश्लिष्टभूषणानि च (४) । सदा सुरभिसम्पन्नानि भोगिगृहाणि सन्त्यसुरगृहाणि च, न सन्त्यधमर्णगृहाणि । सुरगृहाणीवा-(णि चा)ऽन्तर्मन्दिराणि(?) बहिश्च गोकुलानि कमलाकरेषु कमलानि(नी)व (२) । यत्राऽरिष्टवासिनो रिष्टं भजति (२) । यत्र सरोगाणि हंसयमलानि, न त्वजन(?)-श्राद्धकुलानि । यत्र श्राद्धकुलानि न जातानि सदूषणानि विधाधरकुलानि(नी)व

* श्लोके द्वितीयपादः प्राप्तो नाऽस्ति ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

निःपुण्यकुलानि(नी) व । यत्राऽसत्प्रतिपक्षः केवलान्वयी वंशः । दण्डप्राप्तानि कुग्रामणीव यत्र पुरे जिनभवनानि । सदा गुरुवासितानि श्रद्धालुचित्तानि, जिनभवनानि, भोग्यम्बराणि, सदौषधानि च (४) यत्र राजा पूर्वो दिक्पतिरप्य-सङ्क्रन्दनः, अकृतान्तो धर्मराजा(२) प्रवेता(त्ता)ऽप्यजडमतिः(२) अनुत्तरोवनः ।

य _ _ वैरिणं दृष्ट्वा, शमं कारयति स्फुटम् ।
वैरिणोऽपि च तं वीक्ष्य, सन्तापं यान्ति तत्कथम् ? ॥३६॥

समुद्रालङ्कारोऽङ्गुलिदेश इव यो देशः मेरुरिव सुवर्णाकरः । विप्राकार-निरूपकाणि यज्ञसूत्राणीव यत्र नगराणि । यत्र पुराणि सरांसि(सी)व कमलाकराणि । यत्र रामारमालि(यत्राऽऽरामरमालि) शोभिता वनभूमयो नगरभूमयश्च । प्राकारशोभितं स्त्रीवदनमिव यन्नगरम् । अनेकगोरसान्वितं गोपगोपितं च गोकुलमिव यन्नगरम् । कथं न नाकादवशिष्यते ? यत्र सुराधिपसेवन(नं) गृहे गृहे रम्भाविलासः नाकवासिनः क्षमायुताः विगतवसनाः सर्वे सतीपतयः सर्वे पद्मेशाः न विनायकाः स्थाने स्थाने धनदाः सू(सु)धां(धा)न्यभोजिनः (२) अपाका मुनयः नाधिगतविमानाः यत्र निर्ग्रन्थाः मुनयः मार्गणा बाणाः परेच्छाकारकाः समर्थाः नाऽपरे । यत्राऽऽस्फालनं तालयोः, कुट्टनं पटहस्य, ताडनं मर्दलस्य, बन्धनं तोरणानां, प्रेरणं भेर्याः, नाऽन्येषाम् । बहुलायाः शिशवो शिशवस्व(श्च) । यत्राऽलङ्कारोपचितानी(नि) शरीराणी(णि), न तु वदनानी(नि) । यत्र लोकैर्विस्मारितानि गृहाङ्गणानि, न तु शास्त्राणि । चित्रं यत्र राजा दण्डकृद्राम इव दोषाकरोऽपि राजा । प्रतापवान् सूर्य इव कुवलयविबोधकश्चन्द्र इव ।

वसुस्थितनयो न्याई(यी), योऽभवद् वसुधाधिपः ।
सोऽस्तु सुस्थितलोकानां, शोकापनयनोत्सुकः ॥३७॥
दण्डो दण्डिकरे दत्तः, छत्रे वा सम्यगाप्यते ।
तेन लोके त्यक्तशोके, दण्डवार्त्तेति नोच्यते ॥३८॥
श्रीमत्(न्) ! तत्र भवत्पाद-विन्यासाधिकपाविते ।
तत्र च(?)श्रीमति श्रीके, **श्रीराजनगरे पुरे** ॥३९॥
अनेकपालिसंशोभि, तडागं राजमन्दिरम् ।
यत्राऽऽस्ते सर्वदोत्कृष्टं, दानवारिविराजितम् ॥४०॥
अनेकमार्गणाकीर्णं, गृहिद्वारं सरास्पदम् ।
सम्यगाप्तफलं रम्यं, वाहनास्थितिमञ्जुलम् ॥४१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ह्रस्व-दीर्घगुणोपेतं, नानावर्णविभूषितम् ।
नगरं राजते यत्र, सज्जनाश्रितचित्तवत् ॥४२॥

अनेकवादितनादविडम्बितानि जिनसदनानि वादिकूलानीव । घनघनसाराभिषिक्तानि भूतलानीव जिनभवनानि । यत्राऽशोका:(का) लोका:(का) वृक्षाश्च। गीतार्थविदका: भट्टा:, श्राद्धा:, गान्धर्वाश्च । मनोर्थसिद्धिकृत: सुरा इव नरा: । जिनभवने श्वर्गा:(स्वर्गा:) अमृतभुज इव अप्सर(र:)सम्भोक्तारोऽमरा इव नरा:(रा) दानकरा अप्यगजा: ।

तस्माद् **विद्यापुरत:, पद्माण( न )न्दो** विनेयपरमाणु: ।
संयोजितकरकमलो विधिवद्विज्ञप्तिकां तनुते ॥४२॥

श्रीमत् **शान्ति**(श्रीमच्छान्ति)जिनेन्द्रस्य, **चरित्रं** सुधियां पुर: ।
व्याख्यायतेऽत्र समहं, रचनाकलिताश्रये ॥४३॥

प्रस्तुतं पठनं पाठन-मुपधानं सुयोगवाहनं चाऽपि ।
इत्यादि धर्मकृत्ये, प्रजायमानेऽथ निर्विघ्नम् ॥४४॥

**वार्षिकपर्व** समागा-दखिलसुपर्वातिसर्वगर्वहरम् ।
तत्राऽभूत् सानन्दं, व्याख्यानं **कल्पसूत्रस्य** ॥४५॥

अपि [च] द्वादशदिवसान्, मारिनिवारणपटु: पटहघोष: ।
श्रीतातपादकीर्त्तिं(र्त्ति)-कीर्त्तनपाठ इवाऽपाठीत् ॥४६॥

तथा चतू(तु)र्मास-[क]वत्सरादि-सत्पारणे पोषणमार्हतानाम् ।
स्नात्रादिनाऽर्हत्प्रतिमार्चनं च, सञ्जातमद्याऽपि च जायतेऽत्र ॥४७॥

अनेकषष्टाष्टमदुस्तपानां, विधापनं याचकदानदानम् ।
श्रीतातपादातुलनाममन्त्र-स्मृतिप्रभावप्रकटोदयेन ॥४८॥

अपि च-

तव संस्मरणमन:प्रसरे ये कृतहर्षरङ्गा
दर्शनतो विकसितनयनास्ते शिवसौख्यभराङ्गा: ।
जीवन्तोऽपि मृतास्ते ये भवदविनयकृतरङ्गा:(ङ्गा)
देवगणैरपि ते महिता ये तव सेवनसङ्गा: ॥४९॥
वन्द्य: किं न हि रेणुकणो यस्तव चरणे लग्न:(ग्नो)
निस्तीर्णोऽपि स एव जना(नो) यस्तव वचसि विलग्न: ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कोटीशोऽपि भवद्विरहे नग्नेभ्योऽप्यतिनने: (नग्न: ?)
हीनधनोऽपि सर्वधनो यस्तव शिक्षामग्न: ॥५०॥
धन्यास्तेऽप्यणवो नियतं ये तव चरणासक्ता:
ता कलिता अपि नो मनुजा ये तव चरणविरक्ता: ।
सिद्धिसुखाभिमुखा अपि ते ये तव सेवनभक्ता:
स्तुत्यास्ते नु भवन्तू(न्तु) सदा त्वद्वचनामृत्यु(मृत)युक्ता: ॥५१॥
ते धन्यास्तव चरणयुगोपासनबद्धमनस्का:(स्का)
धन्यास्तेऽपि कथं न स्युस्तव संस्तवनवचस्का: ।
दृष्टिपथं तव ये भगवन् ! वन्द्यगतिं लभतां ते
देवाधीश ! विनम्य ! विभो ! त्यक्तभवोदधितां ते (?) ॥५२॥
म(मा)न्यस्सोऽपि नखो मुनिराट् ! यस्तव चरणे रक्त: (क्तो)
हीननरोऽपि न मत्सदृशो यस्तव भक्तिभक्त: ।
कृत्यकृतो(त्यो)ऽपि कथं नो ते येषां हृदि तव वास:
भवदास(श)यविनिहितसदनास्तेषामस्मि सुदास: ॥५३॥
किमभ्रमातङ्गमिषाद् यशस्ते, चकार पूतं परनाकलोकम् ।
नो चेत् कुतोऽसौ किल शुभ्रताया: पदं कवीनामिह संस्तवाय ? ॥५४॥
डिण्डीरपिण्डपटुताश्रयणप्रयोगी सन्मानसाश्रयि(य)शमामृतपूरभोगी ।
किं केवलाभिनवबोधरसैकयोगी,
य: शङ्क्यते कविजनै: स यश: श्री (श्रि)ये स्तात् ॥५५॥
कलिकालकालकाल-व्यालव्यापादने निपुणबुद्धि: ।
निधि(ध)नीकृतविकृतिकर: करोतू(तु) भद्रं भुवनपीठे ॥५६॥

इत्याद्यनेककविगणकृतकीर्त्तिकीर्त्तनै: प्रसादलहरीतरङ्गितै: कृपारसागरै:(रै) नमिताखिलनागरै: शिष्यकल्पितकल्पद्रुमै: सौवाङ्गारोग्यपरिकरनिरामयताद्युदन्त-प्रापकप्रसादपत्रप्रापणेन प्रमोदनीय: शिशुलेष:(श:) । किञ्चोपवैणवं शिशु: प्रणमति श्रीपूज्यपादपादपङ्केरुहाणि प्रसाद्ये व: तत्र ॥

॥ इति गच्छाधीशकङ्कललिखवाविधि सम्पूर्ण: ॥

मु. गौतमविजयलिपीकृतम् । थिरपद्र: ।

—x—

कैलाससागरसूरि ज्ञानमन्दिर, कोबा ३१०९१

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( २० )

## समीनगरस्थ-तपगच्छपतिं प्रति

# सिद्धपुर-लालपुरतो श्रीविद्याविजयस्य पत्रम्

स्वस्तिश्रीः **शान्तितीर्थेशं**, द्वितीयेन्दुमिवोदितम् ।
अम्भोधेरिव भक्तस्य, प्राप्य वेलेव वर्धते ॥१॥

स्वस्तिश्रीश्चन्द्रलेखेव, श्रीशान्ति _ _ _ _ _ ।
वर्धते नु दिनं प्राप्य, कलया कलयाऽधिकम् ॥२॥

तं श्रीमन्तमनन्तश्री-दायकं जिननायकम् ।
श्रीआचिरेयमानीय, पन्थानं प्रणतेर्मुदा ॥३॥

सुधावलिप्तप्रासाद-मञ्जुमण्डलमण्डिते ।
विशुद्धसारसम्यक्त्व-धारकश्रावकोत्तमे ॥४॥

देवगुर्वादिशिष्टानां, गुणगानपरायणे ।
श्राविकानां समुदाये, दानकल्पद्रुमोपमे ॥५॥

श्रीमति श्रीमति तत्र, वन्द्यपादपवित्रिते ।
यथार्थनाम्नि [श्री]प्रौढे, **श्रीसमीनगरे** वरे ॥६॥

प्रकृष्टपञ्चप्रासाद-सार**सिद्धपुर**स्य तु ।
शाखापुराल्ला**लपुरात्**, **श्रीशान्तिजिनमन्दि[रा]त्** ॥७॥

विनयो विनयानम्र-भालस्थलकृताञ्जलिः ।
**विद्यादिविजय**स्साधुः, विज्ञप्तिं तनुतेतराम् ॥८॥

प्रयोजनं यथा चाऽत्रां-ऽशुमालिन्युदये सति ।
सभायां श्री**परिशिष्ट-पर्व**स्या_रावाचनम् ॥९॥

श्रीमदाराध्यपादानां, श्रीमतां ध्यानमुत्तमम् ।
इत्यादिसुकृतश्रेणी-सिद्धिसौधं समेधते ॥१०॥

श्रीमत्पितृसमानानां, ध्येयानां धीमतां सदा ।
श्रीमतां श्रीमतां मम, सं_स्मृत्यनुभावतः ॥११॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अपरं- अनन्याजन्यसौजन्य-लतावनपयोधरैः ।
स्वकीयप्रस्फुरद्धैर्य-तर्जितामरभूधरैः ॥१२॥
समग्रगुणरत्नौघ-प्रस्फुरन्मकराकरैः ।
संसारकक्षपञ्चाक्ष-वृक्षोन्मूलनसिन्धुरैः ॥१३॥
मन्मनोऽम्भोजविस्मेर-सहस्रकिरणोपमैः ।
भव्यचित्तचकोरैक-शरच्छीतरुचिप्रभैः ॥१४॥
गताखिलविषादैश्च, सुप्रसादैः सदा भृशम् ।
वन्द्यैः प्रसादमाधाय, लेखः प्रेष्यो मुदे परम् ॥१५॥
लेखागमने भूयांसो, संजाता वासरा विभो! ।
न तत्र वेद्मि के(को) हेतु(:), प्रसाद्यो मे यथातथम् ॥१६॥
अथ प्रसादमाधाय, प्रसाद्यस्त्वरितं मम ।
प्रसादलेखः श्रीवन्द्यै-र्विज्ञेया प्रणतिस्तथा ॥१७॥

तथाऽत्र -

श्रीमद्भग[व]त्पादानां, पण्डितानां तथैव च ।
गणिनां **विमलाद्धीरा-द्धीराद्विजया**नामपि ॥१८॥
**क्षेमाच्च वर्धमानाद्वि-जय**योरनगारयोः ।
ज्ञेये [प्र]न(ण)त्यनुनती, ज्ञाप्ये तत्रत्यानां यथा ॥१९॥

* * *

यद्वचोऽमृतमाधुर्य-जिता नंष्ट्वा सितोपला ।
शलाकां स्वमुखे क्षिप्त्वा, काचघटीं विवेश किम् ॥१॥
कलाकलापकाम्यश्री-कुमुदोद्बोधकारकः ।
छायासम्भारसंयुक्तो, यः शशीव विराजते ॥२॥
अगण्यपुण्यनैपुण्य-लावण्यादिमसद्गुणैः ।
यः सुधीः शोभते बन्धु-रत्नोच्चैरिव वारिधिः ॥३॥

—x—

मनिश्रीधुरन्धरविजयजी-सङ्ग्रहगत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ( २१ )

### श्रीविजयचन्द्रसूरिं प्रति

# वाचक–श्रीविजयचारित्रस्य लेखः

नमः श्रीविघ्नच्छिदे नमः ॥

यस्याः समीपे **हरिसिद्धि**संज्ञका बभौ **भवानी** जनपूर्णकामदा ।
श्रीपार्श्वनाथांह्रियुगं प्रणन्तुं मेरोः सुशृङ्गादिह चे(चै)व **भारती** ॥१॥
पुण्ये सुमासेऽत्र गृहे गृहे च गेयं च श्रोतुं पुरवर्णिनीनाम् ।
नानानुरूपं प्रविधाय **गौरी** कैलाशशृङ्गाच्च समागतेव ॥२॥

* * *

स्वस्तिश्रीसदनं प्रकामदलनं संसारविध्वंसनं
सद्धर्मप्रतिरूपणं गुणगणं वन्दामि तावत् जिनम् ।
कर्मोद्भ्रान्तितदुःखिजन्तुशरणं मोक्षस्य सन्दर्शनं
संसारार्णवतारणं प्रतिदिनं मोहाग्निकंवर्षणम् ॥१॥
यत्र श्राद्धविचारसारचतुराः कुर्वन्ति धर्मार्हतम्,
यत्र ज्ञानविरामरागनिपुणाः तन्वन्ति तत्त्वात्मकम् ।
यत्र प्राज्ञप्रतिष्टबुद्धिषु पराः पाठन्ति विद्यावलीः
च्छात्राणां प्रतिवासरं प्रियगिरा गायन्ति गीतं शुभम् ॥२॥
यत्राऽनेकमृदङ्गदुन्दुभिमहातौर्य्यत्रिकेणापि ते
सत्पूजागुणपुष्पचन्दनद्रवैः अर्चन्ति तीर्थादिमम् ।
श्राद्धाः **कान्हजिकेन** सङ्घपतिना कारापिते चैत्यके
यो देवो वृषभः सदा सुखकरो भूयात् स वो मङ्गलम् ॥३॥
श्रीमद्**रामपुरे** मनोरमपुरे सन्नीतिवृद्ध्यात्मके
राज्ये चारुणि ब्रह्मरूपकथनं संसारविच्छेदकम् ।
धर्मं वक्ति जिनोक्तिपद्धतिमयं श्रीसूरिसार्दूलकः
श्रीश्रीश्री**विजयेन्दु** श्राद्धपुरतो **भट्टारकः** प्रत्यहम् ॥४॥
यत्र श्रीपार्श्वनाथं नमति प्रतिदिनं सिन्धुसिप्रामिषाच्च
त्रिश्रोता क्षीरकूपारनु स्वयमगमत् यत्तडागस्थलात्तु ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कृष्णेनाऽप्युद्गृहीत्वान्युरगगुणयुतं मेरुमन्थानदण्डं
कृत्वा द्रष्टुं सुरत्नानि युगविधुमितं तानि दृष्ट्वा जहर्ष ॥५॥
यस्योपकण्ठे शुभसस्यरक्षणे क्षेत्रेषु गोपा बहुधा ब्रुवन्ति ।
शिरो विधूनच्छुशुभे सुधान्यकं गुरूपदेशादिव सत्यमार्हतम् ॥६॥

विविधधैर्यगुणादिकधारणं जरठदुर्जयमन्मथवारणम् ।
सकलशास्त्रविनोदसुकारणं प्रतिदिनं प्रणमामि मुदा गुरुम् ॥७॥

स्वयशसा धवलीकृतविश्वकं चतुरतातनुसद्मनि दीपकम् ।
स्वकीयरूपमनोदयजीपकं प्रतिदिनं प्रणमामि मुदा गुरुम् ॥८॥

**विजयचन्द्रसूरीन्द्र**मुनीश्वरं वदनचन्द्रसहर्षविकस्वरम् ।
निजललाटसुभास्करभास्वरं प्रतिदिनं प्रणमामि मुदा गुरुम् ॥९॥

भविककामुकभावुककारणं मदनदारुणवारणवारणम् ।
मरणजन्मजराभयहारिणं विमलपञ्चमहाव्रतधारिणम् ॥१०॥

सकलमङ्गलसञ्चयपूरणं हरिसमानतमोभरचूरणम् ।
गजपतेरिव मन्थरचारिणं नमत सद्गुरुमाभवतारणम् ॥११॥

क्षोभनं मोहनं दोहनं पावनं कर्मणां देहिनां मेधिनां धर्मिणाम् ।
लावनं रक्षणं वर्द्धनं पालनं स्तौमि नत्वा गुरुं भक्तियुक्त्याऽनिशम् ॥१२॥

को लक्ष्मीपतिभूषणं वपुषि किं कुं पाति कां बादरैः (?)
को गौरीपतिमौलिमण्डनयुगेऽस्मिन् मानिता कस्य वा ?।
के सम्यक् निजभावभावनपराः के सन्मुखास्सङ्गरे
एषामाद्यशुभाक्षरेषु गदितो जीयाच्चिरं सो गुरुः ॥१३॥
बहिर्ल्लापिकेयम् ॥

तस्मात् पवित्रं परमं सनातनं सौहार्दहार्दं शुभसौख्यकारकम् ।
लेलिख्यते पत्रमिदं मया मुदा कनीयसा पत्कजसेवकेन ॥१४॥

**विजयचारित्रवाचक**साधुना **सुमुनिलालजीकेन** सहाऽणुना ।
सुत्रऋषि **वृद्धि-खुमान**युतेन च सुगुरुसंस्तवनेन सदा मुदा ॥१५॥

युगमिता मिता(?) विततिर्नतिपूर्विका प्रतिदिनं क्रियते क्रमवन्दना ।
भविकशाखिसुधा(धो)दकसारिणी मदनदुर्द्धरसिन्धुरवारिणी ॥१६॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अमरसुन्दररूपप्रदायिनी विशदता कवशास्तुविशायिनी (?) ।
भुवनकीर्तिसुधीसुखकारिणी सुगुणदीपकस्नेहसुधारिणी ॥१७॥

त्रिभिर्विशेषकम् ॥

**विजयचन्द्रसूरीन्द्र**मुनीश्वरान् सकलशास्त्रविनोदसुधीश्वरान् ।
पुरवरेषु विराजतिरातिथौ(?) रुचिर**रामपुरे** सुपरिस्थितान् ॥१८॥

सार्दूल इव सार्दूलः दुर्वारमारवारणे ।
पयोदो गुणवर्णाभ्यां सेवते गुरुपत्कजम् ॥१९॥

**जीवराजो** दयायुक्तो कन्दर्पदर्पदर्पकः ।
तारुण्ये ललनालक्ष्म्यौ त्यक्त्वा यो व्रतमाददे ॥२०॥

रूपेण रुचिरं नाम **रूपचन्द्रा**भिधानकः ।
नित्यं सुपठते शास्त्रं गुरूपदेशकारकः ॥२१॥

एभिः सुशिष्यैर्गुणपण्यपूर्णैः सदा प्रसन्नैर्न मनोनुगामिभिः ।
साराजमानान् गुरुभक्तियुक्तिभिः हितोपदेशेन सुधर्मकारकैः ॥२२॥

रुचिरचम्पकपत्रवनावली विहगकूजितषट्पदकाकली ।
मदनलालनमानसमानिनी रमति यत्र सदा गजगामिनी ॥२३॥

सकलपर्वसुपर्वसुपर्वणि सुकृतदानदयावृषचारुणि ।
अभिगते समकारि सुसङ्घकैः गुरुमहोछव-देवसुपूजनम् ॥२४॥

परमपावन**कल्पसुसूत्रकं** सुकृतसञ्चयसन्ततिपूरकम् ।
रसविधुप्रमितैः शुभवाचनैः अघहरन्तमवाचि मया तदा ॥२५॥

शुभप्रतिष्ठसुसङ्घसुमुख्यकैः प्रवरश्रोत्रपुटेन मुदा श्रुतम् ।
विशदधर्मगुणैर्गुरुपर्वकं विमलभावनया परिभाषितम् ॥२६॥

शतमिता भु(ऽभ)वन् श्राद्धा पौषधव्रतधारिणः ।
सांवत्सरिकपर्वस्य परत्र हितकाम्यया ॥२७॥

कल्पस्य शुभभोज्यं च **पञ्चानन**स्य सद्मनि ।
जातं सन्मानसंयुक्तं ताम्बूलादिकपूर्वकम् ॥२८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सुधन्यो **धनराजाह्वो**-ऽकार्षीत् पारणपावनम् ।
लघुकल्पस्य लौल्येन लाभस्य वृष-श्रेयसाम् ॥२९॥

श्रीगुरुपर्वसत्कस्य **रायचन्द्रेण** धीमता ।
कारितं भोजनं मिष्टं मोदकैस्तु विशेषतः ॥३०॥

एवं सद्गुरुदेवपूजनक्रियानुष्ठानध्यानादिभिः,
जातं श्रीगुरुवासरं बहुमहैराराधितं भक्तिभिः ।
श्रीमद्भिः शुभक्षामणं प्रतिदिनं ज्ञेयं त्रिसन्ध्यं सदा
श्रीसांवत्सरिपर्वकस्य भवतां वाच्यं मुनीनां च नः ॥३१॥

तूर्णं प्रदेया भवतां च पत्री हर्त्री भवानां शुभसौख्यकर्त्री ।
यथा प्रमोदो लघुसेवकानां सञ्जायते तत्प्रतिवाचनेन ॥३२॥

लेखेऽत्र यत्किञ्चन न्यूनवृद्धि प्रमादतो नः परिशोधनीयम् ।
दक्षैः सुधीभिश्च कृपा विधेया यथा शिशूनां वचनं जनेता ॥३३॥

—x—

अभय जैन भण्डार, बीकानेर
नं. २०६७६

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(२२)

## जालौरनगरस्थ-भ. श्रीजिनसुखसूरिं प्रति

# उपाध्याय-श्रीविद्याविलासगणिनो लेखः

पत्रं उ. श्रीविद्याविलासगणिर्लिखति पूज्यान् प्रति –

स्वस्तिश्रीसदनं वृषौघवदनं श्रीनाभिभूपाङ्गजं,
सत्सौभाग्यविशालभोगकमलालीलाप्रदं प्राणिनाम् ।
तं देवं प्रण(णि)पत्य यस्य विमलायोध्यानकीर्तिभृशं (?),
चान्द्रया पार्वण एष एव मयका लेखोऽधुना लिख्यते ॥१॥

तत्राऽऽदौ नगरवर्णनम् –

अस्ति प्रशस्तसुधाधवलितकोमलामलविहितचित्रैरपि विचित्रैः सरभसकेसर-केसरिसहस्रखरकरनि(न?)खरधाराविदारितमत्तमातङ्गकुम्भस्थलविगलितमुक्ता-फलशबलितभूषणभूषितरामाजनवदनचन्द्रचन्द्रिकाप्रकाशितगवाक्षजालैर्मद-मुखरराजहंसकुलप्रतिबिम्बितकोलाहलमुखरितपद्मरागहीरकाश्मजटितकुट्टिमतलै-र्वेश्मभिरुपशोभितं; दिशि दिशि तारानिकरमिव कुसुमगण(णं) समुद्वहद्भिररुणाभि-घातपरवशरविरथतुरङ्गग्रासविषमित० पल्लवैश्चन्द्रमृगनिगरणाऽमृतरसनिकरजातसेकैः मत्तकुम्भिकुम्भस्थलदारणोद्यतसिंहैरिवोत्फुल्लकेसरैर्गगनंलिहसारविहारैः पुनः सारिष्टैरपि चिरस्थितिभिरुपवनपादपैश्च, तिथिपरेणाऽप्यतिथिसत्कारपरेण, असंख्येनाऽपि संख्यावता, अमर्मभेदिनाऽपि वीरतरेण, अचक्रेणाऽपि सुदर्शनेन, अविदितस्नेहक्षयिणाऽपि कुलप्रदीपेन, पौरजनेनाऽनुगतं; शश्वद्वैयाकरण-नैयायिका-दियुक्तिजालाकुलीकृताशेषकविचक्रवालैः प्रतिदिनसंसेव्यसंसेव्यमानगुरुचरण-विशुद्धान्तःकरणवृत्तिश्राद्धजनगणैः शुद्धधर्माचरणैर्मण्डितं; भट्टभट्टारकैश्चाऽनव-रतदह्यमानकालागुरुधूपपरिमलोद्गारैर्वासागारैः पक्वेष्टिकचितोटजनिविष्टश्रेष्ठविदग्ध-जनप्रस्तूयमानकाव्यधर्मकथाश्रवणोत्सुकितवृद्धैः शिशुजनकलकलारवनिवारण-कृतक्रुद्धैः सन्ध्यावन्दनप्रतिक्रमणोपविष्टविहितव्यवस्थैर्बहुगृहस्थैश्चाऽनेकनरनारी-जनगणस्वस्वकार्यागमनत्वरैश्चत्वरैश्चाऽपि विराजितम् ।

पुनर्यत्र योगेषु शूल-व्याघातचिन्ता, विपल्लवता वृक्षेषु न तु लोकेषु,

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

दानविच्छेदः कदाचित् करिकपोले, दाक्षिण्यं दिङ्निश्चये न तु कुमार्गगोपने, शृङ्खलाबन्धः काव्यग्रन्थने (ग्रन्थे/ग्रथने)षु, उत्प्रेक्षाक्षेपः काव्यालङ्कारेषु, मारयोगोदयो यौवनोदये शारिक्रीडासु च, अधररागता तरुणीगणेषु न विदग्धजनेषु, वृद्धमपि यत् सुन्दरीपरिवृतोपकण्ठे भर्भरीभासुरं **श्रीजालौरनगरम्** ।

तत्र स्थितेषु अनवरताभ्यस्तसाहित्यविद्याप्रबोधोद्भूतप्रभूतनव्यभव्य-काव्यकलाप्रावीण्यसम्यग्विज्ञातच्छन्दोऽलङ्कारनाटकशाटकादिविविधप्रबन्ध-स्वकपोलानल्पकल्पनातर्जितत्रिदशाचार्यवर्यचातुर्येषु गाम्भीर्यादिगुणग्राममण्डिताऽ-खण्डपाण्डित्यव्यपगतसन्देहससन्दोहनिरवद्यगद्यगोदावरीप्रवाहवावदूकखर्वगर्वगरिमा-स्तम्भेषु उदयाचलकूटकोटिप्ररूढागूढजपाकुसुमकान्तिदिनकरकरनिकरप्रतिमाभ्युदय-प्रतापप्रसाधितप्रचण्डानेकसामन्तभूपालभूपपतिसततप्रणतपादारविन्देषु व्यक्तमुक्ता-फलस्तोमनिर्मलकीर्तिप्रसरपूरितदिगन्तरेषु अगण्यधन्यपुण्योद्भूतलावण्य-चातुर्यकलितसुधामधुरवचनसम्बुद्धप्रबुद्धमुनिमण्डलीसम्पादितनिस्सीममहिमप्रभूत-प्रभावालब्धमाहात्म्येषु सुहृदयहृदयैकवेद्यनिरवद्यविद्वज्जनमण्डलीमण्डनायित-विकटवाक्छटाटोपपाटनोत्पन्नयुक्ति(क्त)युक्तिमुक्ताशुक्तिजालाकुलीकृताशेष-प्रकटप्रघटकार्थसांख्यमीमांसकौलूक्यशाक्यसौगततैत्तरीयादिसिद्धान्तसत्सद-सद्विवेचनैकातिशायिदक्षेषु युगप्रधानलब्धपदप्रधानेषु भट्टारकश्रीमच्छ्री श्री १०४ **श्रीजिनसुखसूरि**प्रणतपादारविन्दयमलेषु सत्यार्थाभिधानप्रधानो**पाध्याय श्रीधर्मवर्द्धनगणि उ० श्रीराजसागरगणि** विविधवाचकवाचंयममधुकर-संसेव्यमानमल्लिकाकुसुमप्रतिमकोमलपत्कमलेषु ।

विविधविटपिगणराजितसुरभिकुसुमविमलकेतकीकुड्मलविवरविनिर्गतमधुर-मधुधारासारसीकरकणनिकरास्वादमधुकरझङ्काररवकरम्बितारामात्, अनेकाभिरामा-रामाराजितविदग्धजनगणप्रगुणगौरवगौरीकृतसकलदिग्वलयात्, रुचिरालयात् **श्रीसोझितनगरात्** सद्विनयात्

**उ० विद्याविलासगणिभिः पं. विद्यामूर्ति-लब्धशील-अभयमूर्त्ति-ज्ञानप्रभु-विद्यारङ्ग**प्रमुखगुरुविनयाभिमुखसाधयन्तयुतैः(?) स्पष्टाष्टोत्तर-शतनमत्कन्धरैर्द्वादशावर्त्तवन्दनतत्परैः विहितभवत्क्रमकुशेशयसम्मुखमुख-विनयकलाकलापचतुरैर्निगद्यते ।

तथा च - प्रतिदिनं भवत्कृपाकटाक्षवितरणादेव देवसुरसरि ङ्ग इव

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

रङ्गसङ्गो विलसतीह । सर्वदानन्दकन्दसन्ततिरस्तु तत्र तत्रभवत्सु, यतिततिषु च तथैव । तथा – तत्र सुखेन तस्थुषां श्रीसङ्घस्य धर्ममार्गेऽनघे प्रवर्तयतां चानन्तरं परिहासप्रकास(श)विविधकथाकलापालापपरिशीलनचतुरशृङ्गारिजनमनोऽनिन्द्य-प्रमोददानैकपटुः कामकलाकुशलसधवकामिनीयामिनीसुरतभरपरिश्रमोद्दामिनीसौत्सुक्य विहितशीलालङ्कारविभूषणसुश्लोकबिब्बोकः आस्तिकजनकृति(त)जिनपतिपूजास्नात्र-श्रुतिशकुलीसिद्धान्तस्तोमश्रवणपवित्रितजन्मसौख्यास्पदः सर्वलौकिकदौर्वादिकपर्व-गर्वपर्वतेषु कुलिशपात इव धर्मिणां सुखव्रात इवाऽऽजगाम षण्मतोपनिषण(ण्ण?)-निर्दूषणधिषणाभूषण**पर्युषणा**सर्वपर्वाधिराजः । तत्रोत्पन्नविवेकच्छेकसाधर्मिक-जनकृतप्रयत्न**बलाहीनेता**भिधानः कृतपारणाकारणोद्यमादुद्भूतप्रभूतधर्मवर्मपरिवृतो भृशं हृष्टः सांवत्सरिकपौषधव्रतिनां खगखाक्षि(२०५)प्रमितानां चतुर्मोदकेन सघृतखण्डरसनाप्रमोदकेन पारणकमकारि । यत् पुनरन्येऽपि स्वकीया बन्धुजनाः स्वजनाश्च चक्रुर्जक्षणं तत्क्षणम् । सर्वा प्रमितिः पञ्चसत्याः(?) समजनि । भवत्पत्कमलयमलं नमो मे शिष्यवर्गस्याऽनिशमवगाहतां गाढम् । सर्वोऽपि सङ्घो नंनमीति चतुरं भवन्तमत्रत्यस्तत्रभवन्तम् ।

लघुसम्पादिताऽपि सुवर्णमालाखचिता शब्दालङ्कारमण्डिता मत्पत्रीपुत्री, तस्याः पाणिग्रहणं कार्यमार्यैः । तथा कृपावद्भिः भवद्भिरपि तत्रत्यपर्वाराधनस्वरूपं विज्ञाप्याशयैरिति भद्रम् ॥

ये पाथोधितटं विलम्ब्य सहसा भ्रश्यन्ति लोलोर्मयः,
किं स्तव्याः श्रुतिसन्निधिं प्रतिगताः संख्यावतां सद्गुणाः ।
श्रीमच्छ्री**जिनसौख्यसूरि**सुगुरोर्भिन्दन्ति नोनावलाः
त्रैलोक्ये विदितावदातयशसः श्लाघ्यास्तके सादरम् ॥

युगप्रधानभट्टारकश्रीजिनसुखसूरीन् प्रति.........

—x—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( २३ )

## जहन्नाबादस्थ-श्रीजिनसुखसूरिं प्रति राजनगरतो श्रीलब्धिविजयानां विज्ञप्तिः

स्वस्ति श्रीमन्तमर्हन्तमनन्तातिशयनिलय-त्रिभुवनवलयप्राज्यसाम्राज्यलक्ष्मी-पतिमधरीकृतप्रणतशतक्रतुशिरःकोटिकोटीरतटजटितलोहितमणिमयूखनखवृन्दम-मन्दानन्दकन्दोद्भेदननवाम्बुद**मभिनन्दन**मभिनम्य रम्यमनसा श्रीम**ज्जहन्नाबादे** वादि-वदमदसर्पसर्पारि-दुष्कर्ममर्माविद्-धर्माधर्मादिषट्पदार्थीनिरूपणविदुर-प्रतिपक्षवक्ष-स्थलभिदुर-लोकोत्तरचारुचमत्कारकरतारयशोराशिरश्मिधवलीकृतदिगन्त-सप्तभङ्गीतरङ्गिणीतरङ्गिततनु-मनुजराजराजिहृदयराजीवमधुकर-स्मरविकारहरण-जितकरण-शरणैकस्थान-गुणनिधानेषु सकलजनमण्डलीश्रवणकुण्डलीकृतनामधेयेषु युगप्रधानेषु श्रीश्रीश्रीश्रीमच्छ्री**जिनसुखसूरि**भट्टारकेषु सत्साधुमण्डलीमण्डितेषु श्रीम**द्राजनगर**तो विनयनयललाटतटघटिताञ्जलिसम्पुटानां **लब्धिविजया**नां पं. **महिमोदयजयविशालकीर्तिविशालचिरंगांगजी**प्रमुखपरिवृतानां नमस्कारपुरस्सरा विज्ञप्तिः । श्रेयोव्रततिरिह तत्रभवद्भवन्नामधेयालवाललालितकृपादृष्टिसुधावृष्टि-संसिक्ता चोत्सर्पति । तत्रत्या च प्रतिप्रत्यूषमेधमानाऽऽशास्यते । तथा चतुर्मासत्वा-वच्छेदकावच्छिन्नानि दिनानि जातानि, परं प्राभवप्रवृत्त्यव्युत्पत्तिविच्छित्तिकारकं प्रेमपीयूषपात्रं विचित्रप्रवृत्तिसूचकं पत्रं नोपस्थितम् । तत्र को हेतुः ? तथाऽत्र चैत्रसुदिद्वितीयायां विशेषाशेषोदन्तमुक्ताफलमयूखा पत्री [स]मेता, गतास्सन्तापतापा हृद्गोचरतां गताश्च सर्वे समाचाराः । अपि मया _ _ _ षा छन्दा उपढौकिताः, परं प्राभवं प्रत्युत[र]छन्द(छंदं) नो समेतं, तस्मादद्यापिपर्यन्तं सं[दे]हदोलायामेव स्थितोऽस्म्यस्मि ॥

—x—

ला. द. विद्यामन्दिर,
अमदावाद
(मुनिश्रीधुरन्धरविजयजी द्वारा)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( २४ )

## मेडतानगरस्थ-श्रीजिनलाभसूरिं प्रति
## जयतारणतो वाचक-श्रीजीवनदासस्य लेखः

स्वस्तिश्रीवरशङ्करादिविधियुक् श्रेयस्करं भास्करं,
सद्विद्याविशदांशुभिर्दिविस(ष)दां पूज्या(जा)स्पदं श्रीपदम् ।
श्रीवामेयममेयगेयसुगुणग्रामाभिरामं सदा,
नत्वा **श्रीगवडीपुर**स्थममलं सौख्यश्रियोर्दायकम् ॥१॥

अपि च- स्वस्तिश्रीनन्दसानन्द-सुधास्यन्दिचिदम्बुदम् ।
कल्याणकदलीकन्दं, वन्द्यं संवन्द्य पार्श्वपम् ॥२॥
**मरुदेशो**ऽखिले देशे, रम्यो रम्याणि तत्र नगराणि ।
नगरेषु **मेडता**ख्यो, रम्यो यत्र स्थिताः पूज्याः ॥३॥
वञ्जुला सुव्रता गाव, उर्वी तत्रोर्वरा मता ।
भव्या नरो यत्र पूज्यै-श्चातुर्मासी कृता शुभा ॥४॥
औदार्यगाम्भीर्यगुणैरलङ्कृता-नलङ्कृता(न्) वाक्सुधयाऽतिरम्यान् ।
सूरीश्वराणां मुकुटायमानान्, **युगप्रधानान् जिनलाभसूरीन्** ॥५॥
श्रीसूरिभूरिगुणगुम्फिततारहार-विभ्राजमानहृदयान् हृदयाभिरामान् ।
सद्धर्ममार्गबहुभावितचित्तवृत्तीन्, भट्टारकोत्तम**जिनादिमलाभ**सूरीन् ॥६॥
विमलसद्गुणरत्नमहोदधीन्, वचनमिष्टसुसारसुधानिधीन् ।
जययुतान् **जिनलाभ**यतीश्वरान्, सुकृतिनां कृतिनां बहु सम्मतान् ॥७॥
अगण्यपुण्यान् नयनाभिरामान्, प्रावीण्यभाजः सदसद्विवेकिनः ।
म(स)न्नामसञ्ज्ञान् जनताभिवन्द्यान्, सूरीश्वरान् **श्रीजिनलाभसूरीन्** ॥८॥
पाठकादिबहुसाधुसान्वित-चि(च)ञ्चरीकप्रतिमैश्च सेवितान् ।
प्रोल्लसत्क्रमकुशेशयान् सदा, **जैनलाभ**गुरुसूरिसिन्धुरान् ॥९॥
**जयतारण**कृतसौख्यनिवासो, **गणिवरवाचकजीवनदासः** ।
सहितः **पण्डितसूरिजमुनि**ना, प्रणति च वक्ति वचः सुविचारम् ॥१०॥
सर्वदा सुखमत्राऽस्ति, कृपेक्षणनिरीक्षणात् ।
तत्राऽपि तत्समीहेऽहं, श्रीजितां श्च(च) दिवानिशम् ॥११॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथ स्तुतिः -

यूयं पूज्या गुणैर्योज्याः, न्याय्याः(य्या) न्यायविदां वराः ।
कृपादृष्टिसुधावृष्टि-रभिषेच्या ममोपरि ॥१२॥
गुणरत्ननदीना ये, न दीना ये परर्द्धिषु ।
मिथ्यात्वाहिप्रवीना(णा) ये, प्रवीणा ये समश्रुतौ ॥१३॥
ते यूयं कस्य नुर्वन्द्या, नो वन्द्या नो विधानतः ।
अनवद्यानिन्द्यसौन्दर्य-वर्यगाम्भीर्यभाजनाः ॥१४॥
युष्मज्जलजशब्देन, भक्त्युत्कण्ठाधरा नरः ।
प्रत्यहं पूज्यवक्त्राब्ज-दर्शनेन च किं पुनः ? ॥१५॥
युष्मत्स्पर्द्धकरा ये, युष्मत्सभ्याश्च येऽत्र सम्मान्याः ।
सज्जनजलजविकाशे, विबुधैरिह यूयमुच्यन्ते ॥१६॥
युष्मद्द्विषां च शीर्षे, पुनरपि यूयं सदोज्ज्वला यशसा ।
ते ते भवन्तु सकला, अकरपपूर्वं(?) वयः पूज्याः ॥१७॥
आर्याद्वयं प्रेषितमद्य मोदाद्, युष्मत्समीपे सततं सुखाय ।
सभ्यान् समाहूय विचार्य ह्यर्थं, प्रतिच्छदे लेख्यमनुग्रहेण ॥१८॥
मदादेशस्थले पूज्यै-श्चतुर्मासी यदाऽकृत ।
मह्यं पूज्यचतुर्मासी-स्थानं देयं नयः स च ॥१९॥
अथवाऽलं विचारेण, राज्ञा यः क्रियते नयः ।
महोपरोक्षादारभ्य(?), मय्यैवाऽत्राऽवसर्पिणी ॥२०॥
अमिताक्षरसंयुक्तं, पत्रमागामि श्रीजिताम् ।
अमितानन्दमच्चित्ते, तेन भावि सुखाकरम् ॥२१॥
युष्मत्कृपादृष्टिप्रसादतो वयं, कुर्मो वचोयुक्तिविचारचातुरीम् ।
यत् कोकिलः कूजति माधुरं वच, इष्या(?)म्रमञ्जर्यनुभावतस्तत् ॥२२॥
प्रीत्यमत्रं कृपाछत्रं, विचित्रं विशदाक्षरैः ।
सत्रादपि पवित्रं च, प्रतिपत्रं प्रदीयताम् ॥२३॥
रामपक्षेभभूमान (१८२९) -वर्षस्य शुभकारिणः ।
नभस्यस्य च राकाया-मितिः(ति) श्रेयो दिने दिने ॥२४॥

॥ इति श्रेयः ॥

कैलाससागरसूरि ज्ञानमन्दिर- कोबा, नं. ५२७४३

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(२५)

## श्रीलक्ष्मीचन्द्राचार्यं प्रति

# मुनिपरमानन्दस्य लेखः

श्रीजिनाय नमः ॥
स्वस्तिश्रीश्रेयसाप्त्यै प्रवरहिमभरक्षीरधिक्षीरहीर-
डिण्डीरक्षीरनीरप्रभवशुचिलसत्कान्तिशुक्लीकृताशम् ।
नित्यानन्तैकवासं जगति परिसरद्ध्वान्तविध्वंसदक्षं,
चाऽर्हन्तं सन्मृगाङ्कं प्रणमत सततं कौ मुदं वर्द्धयन्तम् ॥१॥ स्रग्धरावृत्तम् ॥

अथ नगरवर्णनम् ॥

अखर्वगर्वहयैश्च, दुर्दान्तो दान्तदन्तिभिः ।
रथैः पादातिकैर्यत्र, प्राज्यं राज्यं विराजते ॥२॥
**श्रीकर्मसिंहो** नरनाथ ईड्यो, न्यायार्जितश्रीभृतकोशगेहः ।
निसर्गधैर्यावलिलङ्घिताब्धि-र्दुष्टारिसिंहो वरिवर्त्ति यत्र ॥३॥
अतिलसत्कनकाभरणस्फुर-न्मणिगणि(ण)द्युतिदीपितदिग्गणाः ।
गुणगणप्रथिताः पुरुपौरुषाः, अपरुषाः पुरुषाः खलु यत्र च ॥४॥
विमलकमलनेत्रं प्रस्फुरच्चन्द्रवक्त्रं
मृदुतरतलहस्तं रूपसम्पत्प्रशस्तम् ।
कलितललितगात्रं स्फीतिमत्प्रीतिपात्र-
मविरतमभिरामं स्त्रीकुलं यत्र कामम् ॥५॥
तदुपकण्ठमहीकमलाकराः, गतलसत्कमलाः कमलाकराः ।
ददति यत्र मुदं कमलाकराः, विमलचारुलसत्कमलाकराः ॥६॥
ये तं जगति विख्यात-मुत्तममुत्तमप्रदम् ।
**पटियाला** नाम पुरं, सुप्रतिष्ठमधिष्ठिताः ॥७॥
ज्ञानाम्बुपूरपरिवृद्धिविधौ द्विजेशाः,
रत्नाकरा इव गभीरगुणोपपन्नाः ।
दारिद्र्यदुःखतिमिरौघहरिप्रभावा-
स्तस्मिन् वसन्ति खलु ते मुनिवृन्दवन्द्याः ॥८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

समस्तास्तीकृता भावा-रातयः कीर्तयस्तताः ।
येषां स्वेषां सदभ्यस्त-शस्तशास्त्रप्रपाठनात् ॥९॥
सच्चारित्रोदकस्तोम-प्रसिक्ता बधपादपाः (?) ।
स्वपादपद्मरजसा, प्रीणिताशेषविष्टपाः ॥१०॥

सिद्धान्तसिद्धान्तविचारदक्षाः, दूरीकृताशेषविपक्षपक्षाः ।
उन्मादिदुर्वादिमदैकशैल-नाशेन्द्रवज्राधिकसत्प्रभावाः ॥११॥

सर्वज्ञोपज्ञधर्मज्ञा, अज्ञज्ञानविधौ पराः ।
परोपकारसत्कार-कारप्राग्भारभासुराः ॥१२॥

सुवर्यौदार्यगाम्भीर्य-धैर्यसौन्दर्यसुन्दराः ।
सौभाग्यभाग्यवैराग्य-योग्यारोग्यगुणाकराः ॥१३॥

ये शिक्षयन्ति सततं विनयं विनेयान्
दुःकर्मघर्महृदभर्मसुधर्ममर्मम् ।
उद्दामदुर्दममदद्विरदैकवृन्द-
सिंहोद्धताः सकलदुःखविनाशकाश्च ॥१४॥

द्वादशघ्नगुणप्राप्त-मानैर्गुणगणैर्युताः ।
आचार्यवर्या र्नांगाभ्रं-भूंमितश्रीभिरन्विताः ॥१५॥

**श्रीलक्ष्मीचन्द्र**नामानः सूरयो जितसूरयः ।
भूरिश्रेष्ठर्षिभिः सेव्य-पादपद्मगुणालयाः ॥१६॥

श्रीमच्छ्रीपूज्यपादाब्ज-मधुपैः सुगुणोत्तमैः ।
**श्रीरघुनाथ**जित्कैश्च महर्षिपदधारकैः ॥१७॥

**जुहारमल्ल**मुनिभि-**र्हुकमा**ब्जैस्तथा पुनः ।
**शिवदासैः सिरदार-मल्लैर्लाभेन्दु**संज्ञकैः ॥१८॥

**भागचन्द्र-रायभाण-सुमेरुमल्ल**साधुभिः ।
**हिन्दूमल्लै**श्च **सन्तोष-चन्द्रकै रतिरामकैः** ।
तथा **माणिक्यचन्द्रै**श्च **दयाचन्द्रै**स्तथाऽपरैः ॥१९॥

सदा चञ्चदाचारसारैकविद्भि-
र्भवद्वाक्यपीयूषपानैकतृष्णैः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

शुभैर्लक्षणैर्लक्षितैर्भक्तिमुख्यैः,
शुभैः साधुवृन्दैर्युता(तां)स्तान् मुनीन्द्रान् ॥२०॥
**श्रीमद्विक्रमनगरं**, सकलकलारम्यमानुजग्रामम् ।
कृतिजनविहिताशोभं[1], बहुविलसद्राज्यसाम्राज्यम् ॥२१॥
तत्र स्थितः सदाचारो, भवदाज्ञापरायणः ।
पूज्यपादैकसद्ध्यानः, **परमानन्द**संज्ञकः ॥२२॥
**मानमल्ल-धर्मचन्द्र-लालचन्द्रै**श्च संयुतः ।
**टीकमेन्दु-सुजाणा**भ्यां **गुलाबा**ह्वेन वा पुनः ॥२३॥
स्यात् षष्टिप्रमार्जनकैः, द्वादशावर्तवन्दनैः ।
वावदीति भृशं पूज्यान्, वन्दित्वा वचनं त्वदः ॥२४॥
प्रमोदवल्ली भवतां कृपावता-मुल्लासमाप्नोति कृपासुदृष्टितः ।
सैवाऽनुधस्त्रं भवतां सुपार्श्व-पार्श्वस्य पार्श्वस्य कृपादृशः स्तात् ॥२५॥
यूयं गुणगरिष्ठेष्ठाः, परमेज्याः कृपालवः ।
तीर्थकृत्पदमारूढा गणभृत्पदधारकाः ॥२६॥
वयं तु सेवका एव, मनसाऽपि हि नाऽपरे ।
पूज्यराजैर्महाराजै-रिति ज्ञेयं शुभाशयैः ॥२७॥
ममोपरि सदा पूज्य-राजराज ! दयार्णव ! ।
कृपादृष्टिर्विधेयाऽऽप्ता, सुधावृष्टिसमाऽसमा ॥२८॥
संघाज्ञया चाऽष्टिकायां[2], **कल्पसूत्रा**भिधानकम् ।
मया हृद्यं वाचितं त-च्चितं पुण्यं महत्तरम् ॥२९॥
तथा संवत्सरीघस्त्रे, पौषधग्राहिणो नराः ।
एकत्रिंशन्मिता ज्ञेयाः, श्रावकाः सूरिपुङ्गवैः ॥३०॥
श्राविकाभिश्च भव्याभिः, शीलितं शीलमुत्तमम् ।
विचित्रं च तपस्तप्तं, गानमङ्गलपूर्वकम् ॥३१॥
तथाऽष्टिकाया हृद्यायाः, क्षाम्यन्ते क्षामणा मया ।
पूज्यराजैश्च क्षन्तव्याः, साधुवृन्दसमन्वितैः ॥३२॥

---

१. 'विहितसुशोभं' इति पाठः सम्भवेत् ।
२. अष्टाह्निकायां, पर्युषणायाम् ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इत्यादिमैः समाचारैः, समाचारैश्च पर्वणः ।
अदः स्वरूपं सर्वज्ञैः, पूज्यराजैः कृपालुभिः ॥३३॥
सुवर्णवर्णवर्णितं, सुलेखलेखमुत्तमम् ।
निरीक्ष्य हृष्य मानसे प्रदेयमञ्जसा दलम् ॥३४॥
वियन्निधाननागेन्दु (१८९०)-मिते वर्षे तथाऽऽश्विने ।
पक्षे सिते त्रयोदश्यां, लिखितो लेख उत्तमः ॥३५॥

श्री श्री १०८ श्री श्री श्री पुजजीसाहबसु साहा हुकमचंद करणीदांन केसरीसीव करणीदांन जीवणमल नथमल नवलमल सुरजमल ताराचंद पनालाल सादलसी सालमचंद बाहादरमल जीवराज धनसुख जसकरण वरढीयारी वंदणा बार १०८ अवधारसी. आपरै दरसणरी अभलीषा घणी छे. सुदरसण वेगे देरावसी कीरपा करनै घणै मानसु.[१]......

१. आ पछी भिन्न भिन्न गृहस्थोनी आ ज प्रमाणे सही-हस्ताक्षरोथी ते पृष्ठ तथा तेनो पाछलो भाग घणे सुधी भर्यो छे. जे नामो उकेलवानुं विकट छे.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( २६ )

## जेसलमेरुस्थ–श्रीलक्ष्मीचन्द्राचार्यं प्रति

# विक्रमपुरतो मुनिश्रीपरमानन्दस्य लेखः

श्रीजिनेश्वराय नमः ॥

स्वस्तिश्रीस्थितिभूतिविच्युतिमयं विश्वं हि विश्वं ध्रुवं,
यस्याऽऽदर्शतलेऽमलेव, विमले सत्केवले भासते ।
दीबंध्यामृतदायकं(?) नरसुरव्यूहैररं सेवितं,
तं **वामेय**महं जिनं प्रणिपनीपत्ये परामोदतः ॥१॥

**अथ नगरवर्णनम्**

भूमीश्वरो यत्र सदैव राजते, नित्यं सदाचारयुतोऽयुतोऽहंसा ।
दुष्टार्यहङ्कारसमूहशैल-नाशेन्द्रवज्राधिकसत्प्रभावः ॥२॥
यस्मिन् पदं शासति पित्र्यमीतयः, प्रतापसन्त्याजितवासभूमयः ।
सन्त्रासिता दैववशाद् वने वसद्-दुष्टारिसन्दोहनिवासमादधुः ॥३॥
स्वर्गादौ यस्य सत्कीर्ति-रुज्ज्वला गीयते सुरैः ।
शास्त्रानुसारव्यापारः, शिल्पज्ञानविशारदः ॥४॥
श्रीमूलराजेश्वरराज्यराजो, न्यायार्जितश्रीभृतकोशगेहः ।
निसर्गधैर्यावलिलङ्घिताब्धि-र्दुष्टारिसिंहो **गजसिंह**नामा ॥५॥

चतुर्भिः कलापकम् ॥

विचित्रचित्राः सुतरां पवित्राः, विशालशालाः सुतरां विशालाः ।
अतीव रम्या नरनाथनम्याः, जिनालया यत्र सतां हितालयाः ॥६॥
लसत्कीर्तियुक्ता धनश्रेणिसक्ताः, जिनाज्ञावहाः बिभ्रतः श्राद्धधर्मम् ।
जनानां वरा दुष्टमार्गातिरिक्ताः, सदा दाद(न)दा दानिनो यत्र सन्ति ॥७॥
लसति यत्र हि रम्यवधूजनो, निखिलपूरुषचक्रमनोहरः ।
चकितबालकुरङ्गविलोचनः, शरदुडुव्रजनाथवराननः ॥८॥
बहुविहङ्गमराजिकृतास्पदं, विशदवारिजराजिविराजितम् ।
**अमरसागर** इत्यभिधं सरो, लसति यत्र विशालतरं वरम् ॥९॥
सद्राकाहिमरश्मि-कुन्द-हिमवच्छुभ्रैस्तथाऽभ्रँल्लिहैः,
प्राज्यापाम्पतिपुत्रिभिर्बहुविधैः सौधैः सदा सुन्दरे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तस्मिन् देवपुरोपमे सुखकरे ये संस्थिताः सूरिपाः,
श्रीमज्जे**सलमेरु**नामनि पुरे विश्वम्भराभूषणे ॥१०॥

**अथ श्रीपूज्यानां स्तुतिः –**

**लुङ्कागच्छं** सनाऽच्छं **बृहतमहिपुरो**त्थं वरं श्रीवराढ्यं,
ख्यातं मह्यां विपश्चिद्वरमणिजलधिं सन्ततं शासतो वै ।
तेजोव्यूहोज्जटालज्वलनततिभरज्वालिताः शत्रुवर्गाः,
**श्रीलक्ष्मीचन्द्रजित्का** हिमकरकिरणाभैर्गुणैः शोभमानाः ॥११॥

शीलं हि तेषामकलङ्कितं च, द्रष्टुंमनाः पञ्चशरः समेत्य ।
सङ्कल्पयोनिर्हृदि लज्जितोऽभूत्, व्यर्थश्रमो दृप्त इति प्रलीनः ॥१२॥

अतीवोग्रपुण्या जनौघैः सुनम्याः,
सुगुप्तीर्दधानाः जितानङ्गमानाः ।
विनष्टारिपक्षा लसत्साधुपक्षाः,
शुभैर्लक्षणैर्लक्षिताः साधुशिष्याः ॥१३॥

शुभगणगणैर्नानावर्णप्रसूनविगुम्फितां,
सदुचिततरां येषां वाणीमशेषजनप्रियाम् ।
प्रवरगुणिनां युक्तामारोपयन्ति शिरस्सु च
स्रजमिव जनाः शश्वद्भक्त्या मनोहरणीमिह ॥१४॥

यदीयपादाम्बुजसेवनाप्त-विज्ञप्तिपारागसुधां निपीय ।
सच्छिष्यभृङ्गा हतजाड्यरोगा, महाप्रमोदं द्रुतमालभन्ते ॥१५॥

ध्रुवं सर्वविद्यासमुद्राः सुभद्राः,
जगद्विश्वजीवेषु चेतोदयार्द्राः ।
वरौदार्य-गाम्भीर्य-धैर्यैर्गरिष्ठाः,
जगद्विस्तृताचारु(र)भूरिप्रतिष्ठाः ॥१६॥

स्फुरद्रम्यराजीवपत्रालनेत्राः, समस्ता कलाकीर्णशुभ्रांशुवक्त्राः ।
सदा ध्यायमानोल्लसन्मूलमन्त्राः, सुगात्राः सदा पाठितानेकछात्राः ॥१७॥

आचार्यवर्या नागाशा(१०८)मिताभिः श्रीभिरन्विताः ।
सर्वज्ञोपज्ञधर्मज्ञाः, **लक्ष्मीचन्द्रा** मुनीश्वराः ॥१८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भवत्पादपाथोजए**कालिमङ्कैः (टेकादिमल्लैः?),**
प्रकृत्या विशिष्टै**रुमेदादिमल्लैः** ।
**जुहारादिमल्लै**स्तथा **शम्भुरामै-र्महादेवदासै**स्तथा **भारमल्लैः** ॥१९॥

**हुकमेन्दुरायरा( ग? )ण-लूणकर्ण**सुशिष्यकैः ।
**सिरदारमल्लजित्कै**श्च, **हिन्दूमल्लै**स्तथा पुनः ॥२०॥

**सुमेरादिमल्लैः सुसन्तोषचन्द्रै**-र्भवद्वाक्यपीयूषपानैकतृष्णैः ।
सदा चञ्चदाचारसारैकविद्भिः, शुभैः साधुवृन्दैर्युतान् तान् मुनीनान् ॥२१॥

श्रीमद्**विक्रमनगरे**, सकलकलारम्य**मानुजग्रामे** ।
कृतिजनविहिताशोभे(तसुशोभे), बहुविलसद्राज्यसाम्राज्ये ॥२२॥

तत्र स्थितो **रामधनः, परमानन्द**स्तथा पुनः ।
**मानमल्ल-धर्मचन्द्र-भागचन्द्रै**श्च संयुतः ॥२३॥

**कर्मचन्द्र-टीकमेन्दु-सुजाणा**दिसुशिष्यकैः ।
**आईदानेन** [च] पुनः, द्वादशावर्त्तवन्दनैः ।
वावदीति भृशं पूज्यान्, वन्दित्वा वचनं त्वदः ॥२४॥ षट्पदीयम् ॥

प्रमोदवल्ली भवतां कृपावता-मुल्लासमाप्नोति कृपासुदृष्टितः ।
सैवाऽनुघस्त्रं भवतां सुपार्श्व-पार्श्वस्य पार्श्वस्य कृपादृशः स्यात् ॥२५॥

वयं तु सेवका एव, नाऽपरे मनसाऽपि हि ।
पूज्यराजैरिति ज्ञेयं, विद्यारत्नाब्धिभिः खलु ॥२६॥

मनोलतायां मे पूज्य-राजराज! दयार्णव! ।
कृपादृष्टिर्विधेयाऽऽप्ता, सुधावृष्टिम(स)माऽसमा ॥२७॥

अष्टिकायां मया हृद्यं, **कल्पसूत्रा**भिधानकम् ।
सङ्घाज्ञया वाचितं त-च्चितं पुण्यं महत्तरम् ॥२८॥

तथा संवत्सरीघस्रे, पौषधग्राहिणो नराः ।
एकोनविंशतिमिता, ज्ञेयाः सूरिपुरन्दरैः ॥२९॥

सीमन्तनीभिर्भव्याभिः, शीलितं शीलमुत्तमम् ।
विचित्रं च तपस्तप्तं, सम्भाविताऽपि च भावना ॥३०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तथाऽष्टिकाया भव्यायाः, क्षाम्यन्ते क्षामणा मया ।
पूज्यराजैश्च क्षन्तव्याः, कृताञ्जलिपुटेन हि ॥३१॥

सर्मा(मा)चारैः समाचारैः, स्वरूपं पर्वणस्त्वदः ।
इत्यादिमैः पूज्यपूज्यै-र्ज्ञेयं ज्ञेयविचारिभिः ॥३२॥

सुवर्णवर्णवर्णितं, सुलेखलेखमुत्तमम् ।
निरीक्ष्य हृष्य मानसे, प्रदेयमञ्जसा दलम् ॥३३॥

अब्दे युगेभ-नागेन्दु-मिते(१८८४) ह्याश्विनमासि वै ।
राकायां भार्गवे वारे, लिखितो लेख उत्तमः ॥३४॥

तत्रत्यानां सर्वेषां श्रद्धालूनां श्रद्धालूनां धर्मलाभो निवेद्यः
श्रीमद्भिः पूज्यराजराजैः ॥

श्रीश्रीश्री१०८श्रीश्रीपुजजी साहबारा सदा सेवग हुकमी वरढीया साह हुकमचंद-करणीदांन-केसरी-सवजी-रूपजीवणमल-करणीदांन-नथमल-नवलमल-सादुलमल........

—x—

( २७ )

## श्रीरामचन्द्रसूरिं प्रति

# श्रीरघुनाथमुनेः पत्रम् (सं. १८८५)

स्वस्तिश्रीवरवर्णिनीप्रियतमं विश्वत्रयैकाधिपं,
प्रत्यूहप्रशमाय कामदमपि प्रेष्ठं परं कामदम् ।
प्रास्ताकं पुरुहूतपूजितपदं पार्श्वप्रभुं पावनं,
प्रख्यातं प्रणिपत्य सत्यमनसा कायेन वाचाऽपि च ॥१॥

सत्या सेचनके **सुधादिमसरः**सञ्ज्ञे पुरे तस्थुषां,
चातुर्मास्यविधानसाधनकृते श्रीपूज्यराजामिदम् ।
विज्ञप्तिच्छदनं प्रमोदसदनं पत्पद्मयोः प्राभृती-
कुर्वे प्राकृतबन्धुरं गुरुधियः ! शश्वत् क्रियासुः कृपाम् ॥२॥
युग्मम् ॥

* * *

सिवसिरिसुख(क्ख)निहाणं, तं जियमाणं सुलद्धनिव्वाणं ।
वंदामि **वद्धमाणं**, जिणप्पहाणं विसुद्धवरनाणं ॥१॥
जस्सत्थि संपयं तित्थं, सव्वसत्तसुहावहं ।
उत्तमं मुत्तिमहिला-मेलणे सुवियक्खणं ॥२॥ [गाहाजुयलं]
करंताणं सम्मं जणवयविहारं ज़िणमया-
रविंदाइच्चाणं सयलसिरिसंघाभिलसियं ।
कउज्जोग्गाणंता भवियपडिबोहत्थमयले,
धरंताणं चित्तं परमसुहमग्गे समहियं ॥३॥
विहरिय सुहंसुहेण, **पंचणय**क्खायसव्वखित्तेसु ।
हेमंतगिम्हकाले, सययं दढधम्मराएसु ॥४॥
अह धम्मोवदेसंबु-वुट्ठीए पाउसागमे ।
हरिउं पावसंतापं, वारियाणं व सव्वगं ॥५॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**पंचणय**भूमितिलए, भूविक्खाए सुवत्थुरमणीए ।
पासायपंतिकंते, उण्णयपाग(गा)रपरिवीए ॥६॥
बहुदेसागयलोए, गाहावइविंदभूसिए रिद्धे ।
धम्मियजणगणकमलु-ज्जलगुणमयरंदसुरभिए नियय ॥७॥
**अमर(य)सरणा**मरुइरे, पज्जोसवियाण णयरम्मि ।
सप्पुरिसाण वराणं, सुहसंजमवासियंगाणं ॥८॥
अस्सि दूसमकाले, गणहरसिरिइंदभूइसरिसाणं ।
सिट्ठट्ठसंपयाहिं, अहियं खलु रायमाणाणं ॥९॥
पदलियवाइमयाणं, समिईसमियाण गुत्तिगुत्ताणं ।
सूराणं धीराणं, गंभीराणं उरालाणं ॥१०॥
नयभंगभंगदुत्तर-परमागमसिंधुकण्णधाराणं ।
सारयसयलकलानिहि-सोयर**लुंकागणा**हिववराणं ॥११॥
छत्तीसगुणगुरूणं, जुगप्पहाणाण पहियकित्तीणं ।
सिरिपुज्जायरियाणं, सिरि(रिसि)वर**सिरिरामचंदाणं** ॥१२॥
सुगुणेहिं महरिसीहिं, धीरप्पवरेहिं **दीवचंदेहिं** ।
**कम्माइचंद**रिसिणा, **हरि**णामेण य **कण्हीएणं**(ण) ॥१३॥
सुविणीय**सोहणे**णं, **सोभारिसि**णा तहेव अन्नेहिं ।
भावरिसीहिं **हीरा-णंद**प्पमुहेहिं सेवियचलणे ॥१४॥
सुपुण्णेहि पुण्णे जणेहिं घणेहिं, **सुलच्छीनिवासे** सुनामे पुरम्मि ।
ठिओ सायरं सायवत्ताभिलासी, सया सेवगो तुम्ह निद्देसकारी ॥१५॥
**रघुणाह**नामधिज्जो, साहू **जिणदास**भिक्खुणा सहिओ ।
**रामप्पसाए**ण तहा, **दयाइचंदे**ण **वयरुडूणा** ॥१६॥
दुवालस-वत्तविहाणपुव्वं, वंदित्तु विण्णत्तिमिमं करेमि ।
सयच्चाणिज्जाण वहाणविज्जा-विऊण धीमं पुरओ पमोया ॥१७॥
उक्किट्ठसायसहिया, सहियाचरणं समंगला हट्ठा ।
जं अम्हे पकरेमो, अज्झयणज्झावणाइ सविसेसं ॥१८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सव्वं दीसइ सययं, णिद्धतराए य साणुकंपाए ।
विलसियमेयं सामी, सोमाए तुम्ह दिट्ठीए ॥१९॥

सण्टङ्कः-

सम्मं जिणिंदागमसारसारया !, विसारया ! संजमजोगजुत्ता ।
खामेमि भे देवसिए य राइए, आवस्सए पक्खियए वि णिच्चं ॥२०॥
चाउम्मासियसुपडिक्कमणंमि खमाविया मए सामी ।
सुद्धायारवियारो हवइ, पभूणं हि करुणाए ॥२१॥
अहाणुपुव्वीसमुवागएणं, **पज्जोसणा**पव्ववरेण जाओ ।
पमोयसंपत्तिभरो उरालो, सव्वत्थ(स्स) संघस्स वि चित्तमज्झे ॥२२॥
पण्णरसवायणाहिं, सावगजणकण्णमंदिरं णीओ ।
त्तत्थ(त्त)महत्थो सत्थो, पमोयगो **कप्पसिद्धंतो** ॥२३॥
सम्मं तुम्हाणुभावेणं, धम्मकम्मं पवट्टियं ।
तवोवुड्ढी विसेसेण, तहा धम्मप्पभावणा ॥२४॥
आलोइयबहुदोसे, नासियरोसे गुणत्थवरकोसे ।
संवच्छरियपदोसे, विहियाऽऽवस्सयकामधेणुपोसे ॥२५॥
पज्जोसिएण निव्विग्घं, सिरिपुज्जाण भावओ ।
अभिवंदिऊण सिरसा, खामणा खामिया मए ॥२६॥
खमंतु मंतप्पवरस्स पंच-पदत्तयस्संतरिया सरण्णा ।
महाणुभागा सुकयाणुरागा, तुम्हं वि तुट्ठा सिरिसूरिराया ॥२७॥
दक्खा सिक्खादाणे, एयस्स भवारिसा खमासवणा ।
नूणं हयंति जुग्गा, धम्मधुरीणा य सण्णाणा ॥२८॥
पंचायारधराणं, पुरओ भासेमि किं बहुण्णाणं ।
उवसमरससंपुण्णा, सिरिपुज्जा मे पसीयंतु ॥२९॥
सो वासरो पुण्णफलोववेओ, कया कलापुण्ण समागमिस्सइ ।
सुहावहं जत्थ भयंतदंसणं, सामी करिस्सामि ससावगोऽहं ॥३०॥
बहुविदवंदणिज्जं, वरयं भूवालमौलिआभरणं ।
तुम्हाणं पयकमलं, सरामि सामी सया विमलं ॥३१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

धण्णा णं ते भविया, कीरइ जेहिं भयंतपयसेवा ।
इइ संघहिययसेला, अवतिण्णा भावणारेवा ॥३२॥

जयइत्ति शेषः । अत्र गाथास्तु भूयस्य एव दृब्धाः, परंतु त्वरावशान् न लिखितुं पार्यन्ते । इयतैव मया कृता विज्ञप्तिरवधारणीया । सहस्रशः प्रणति-ततयस्समुल्लसन्तुतरामनवरतं श्रीश्रीपूज्यजितां पदयोः । भूयसी कृपादृङ् मयि धार्या । दूरस्थोऽपि निजचरणयोरेणुरिवाऽहमवसेयः । किं बहुवर्णव्यासन्यास-प्रयासेन ? ।

अथ च सर्वेषां पूज्य**श्रीदीपचन्द्र**जित्-प्रभृतिभ्यो मुनिभ्योऽस्माकं वन्दना क्षामणा च निवेद्या । लघीयसामृषीणां सुखपृच्छना विधेया । अत्रत्यानां समेषां श्रावकाणां वन्दना बहुशोऽवधारणीया । कृपासुदृष्टिः सुरक्ष्या । तत्रत्येभ्यः समस्तेभ्यः श्रद्धालुभ्यो मन्नामग्राहं धर्मलाभो निवेद्यः । शश्वत् सुश्रुतं किं शोश्रूयते तैः श्रीमत्पूज्यपादपादेषु [तद्] लेख्यमिति । अत्रात्र (अत्र) भवच्चरणोपासकेन श्रमणोपासकानां पुरतः श्रीपर्युषणापर्वान्तरं **श्रीपञ्चमाङ्ग**व्याख्यानं प्रारब्धमस्ति । तच्च श्रीमद्भदन्तपुङ्गवानां सुदृशा सप्रत्याख्यानादिकं सम्यग् बोभवीति निरन्तरम् । कृपया पत्रप्रसादार्पणं विधेयम् । शुभम् ।

अह च - अहयहियसहियसामिकरलिहियलेहवायणेण नवनिहाणलाभसरिसो हरिसो मे समुप्पण्णो मणसि । पुन(ण)रवि पसायं काऊण दायव्वो खलु सुहिययहिययहारी सो लेहो । जेण उक्किट्ठतुट्ठिपुट्ठिमणुभवामो तहा कायव्वं सिरिसिरिपुज्जपाएहिं किं बहुणा ?

कारुण्णपुण्णाण तवोधणाणं, थेराण सज्झाणपराण निच्चं ।
वंदामि खामेमि य सामिपाया-भिवंदगाणं गुणसोभियाणं ॥१॥

**सिरिदीवचंदाणं** तहाऽऽण्णेसिं च । यदत्राऽशुद्धं तत् क्षन्तव्यमीज्य(ड्य)-चरणैः ॥

पयाण जुयलं तुम्हं सरंतस्स वएसिणो ।
**दयाचंद**स्स नामेणं, सीसस्स बहु वंदणा ॥१॥

विण्णेया नियदासस्स, भुज्जो भुज्जो निरंतरा ।
अणुकंपाभरो णिच्चं, रक्खणीयं(ओ) विसेसओ ॥२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तत्थ सुविणीयहीराणंदपाभिइलहुसीसाणं सुहपुच्छणा कायव्वा । अज्झयणे रक्खियव्वं माणसं, जेण अम्हारिसाणं मणसि संतोसो उदयमेइ । **कृष्णचन्द्रा**ख्यश्छात्रः कस्येत्याद्युदन्तजातः सर्वोऽप्याविष्करणीयः पत्रदूतद्वारा । श्रेयःश्रेणयस्सन्तुतराम् ।

सिरिविक्कमभूवाओ, इंदियवसुअट्ठचंद(१८८५)परिमाणे ।
वरिसे असोयबहुले, दसमीए विलिहिओ लेहो ॥१॥

रघुणाहमुणिणा । इति शेषः ॥

सकलगुणगरिष्ठेषु विद्वज्जनवरिष्ठेषु श्रेष्ठेसु प्रेष्ठेषु मुनिप्रवरेषु श्रीमत्सु **श्रीगङ्गारामजित्**स्वस्मत्कृता अनुनतिप्रणतिपरम्परा निवेदनीया । सुखं च प्रष्टव्यम् । अत्रत्याः सुखसमाचाराः सन्ति । तत्रत्यास्सार्वचार्त्त(?)वार्त्तावावदूका पत्रार्पणेन प्रदातव्या इत्यपि वाच्यं श्रीश्रीपूज्यपादैः सदयैः । शुभम् ॥ श्रीः ॥

श्रीम**ज्जेसलमेरु**तः समागते च्छदे पत्रं दास्यामहे ससमाचारम् । अथ पत्रमपि शीघ्रमेवाऽऽयास्यति पथिकस्य चिरगतत्वात् स हि लघुगामीति च हेतोः ।

—x—

ला. द. विद्यामन्दिर
अमदावाद
नं. ४३८५५

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( २८ )

# श्रीतपगच्छपतिं प्रति

# पं.श्रीदेवविजयलिखितो विज्ञप्तिलेखः (त्रुटितः)

.................................... घटने देवद्रु-चिन्तामणीन् ॥२६॥

अथ देशवर्णनम् –

मन्दाकिनी द्वीपवतीषु वज्री, सुरेष्वशेषेषु नृपेषु चक्री ।
ऋक्षेषु चन्द्रो गरुडो द्विजेषु, दन्तावलेष्विन्द्रगजो गरिष्ठः ॥२७॥
नगेषु मेरुश्च हरिर्मृगेषु, तीर्थेषु मुख्यो विमलाद्रिरेव ।
रत्नेषु चूडामणिरायुधेषु, वज्रं यथा कामदुघा च गोषु ॥२८॥
सैन्येश्वरेषु प्रभुकार्त्तिकेयः, श्रीकल्पवृक्षो फलदेषु गेयः ।
**श्रीगूर्जराख्यो** विषयेष्वमेयो, देशावलीश्रीमुकुटोपमेयः ॥२९॥ [त्रिभिर्विशेषकम्]
यावल्लोके गगनसुमणि(णी)मण्डलं सोमभान्वो-
यावद् गङ्गा सुकनकगिरिः शेषनागः सरस्वान् ।
यावद् विश्वे जलधितनया भारतीनां समाज-
स्तावज्जीयाज्जगति विदितः सर्वदेशाधिराजः ॥३०॥
नाऽऽपुः समग्राः(ग्रा) विषयाः समत्व-मन्ये दधानाः परमर्द्धियुक्ताः ।
त्रिवर्गलक्ष्मीः सकलैव यस्य, स्पर्द्धां सदा स्त्रस्तसमस्तभीतेः ॥३१॥
राज्यं कुर्वति यत्र राज्ञि मनुजाः प्रापुः परां निर्वृतिं
मत्तेभालिसवेगतुङ्गतुरगे न्यायैकसद्धर्मणि ।
न प्रापुः प्रतिवीरधीरधरणीनाथातिवामभ्रुवः
सौख्यं क्वापि जयावहे सुविषये श्रीभासुरे **गूर्जरे** ॥३२॥
महान्नास्ति सदा देशे, विभेदो देव-भूस्पृशोः ।
उन्मेष-पादचाराभ्यां, यत्र विज्ञायते नरः ॥३३॥
उदारनेपथ्यभृतो जनौघाः क्षामेक्षुतुल्या नयकोविदाश्च ।
यस्मिन् धरेशाः सुरनाथतुल्याः, श्रियां निवेशे रुचिरप्रदेशे ॥३४॥
सर्वेषु देशेषु विराजमाने, तस्मिन् गुणैः स्वैर्मुकुटायमाने ।
**श्रीगूर्जरे** या नगरीव चूडा-मणीयते वै परमर्द्धियुक्ता ॥३५॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथ नगरवर्णनम् –

यत्राऽतितुङ्गा जिनपुङ्गवानां, प्रासादपङ्क्तिर्गगनं व्रजन्ती ।
परां गतिं मानवमा_ _नां, विलासिनां सूचयतीव सद्यः ॥३६॥
नारीदीधितियुक्तवक्त्रनयनाभाभ्यां निशेषाम्बुजौ,
शङ्केऽहं विजिता वयं शशधरो _ _ मितोङ्कान्वितः ।
एको _ _ _ _ रिदुर्गशरणं स्वलोकमन्य _ _
यत्राऽशिश्रियदूनकान्तिविभवः प्रासादशोभाभरैः ॥३७॥
हिलावर्त्त्य कणाः _ _ _ _ _ _ _ _ ।
रुपतो यत्र वर्त्तन्ते, वेलेव खलु नीरधेः ॥३८॥
वातायने संस्थितकान्तकान्ता-मुखैः प्रभ _ _ _ _
पूर्णेन्दुबिम्बप्रतिमप्रभौघैः सहस्रचन्द्रं गगनं बभूव ॥३९॥
वनैकदेशा विधवा न रामा हलावलीष्वेव कुशीलताऽपि ।
स्नेहक्षयो यत्र च दीपपात्रे, दानादिकार्ये व्यसनं च यत्र ॥४०॥
चापल्यमक्ष्णामिह मानिनीनां, वसन्न हंसादपरः सरोगः ।
विहाय यस्मिन् मधुपो द्विरेफं, न श्रूयते यत्र कदापि कश्चित् ॥४१॥
दण्डध्वनिर्यत्र जिनगृहेषु, कलाक्षयश्चन्द्रकलासु नान्ये ।
वेणीभुजङ्गादपरश्च यूनां, दंदश्यते नो हृदयं भुजङ्गः ॥४२॥
सीमन्तिनीभ्रूषु च वक्रभावो, वेणीषु बन्धोऽपि कृशोदरीणाम् ।
गालिप्रदानेषु परेषु यत्र, कार्पण्यमेकं किल सज्जनानाम् ॥४३॥
काठिन्यमेकमतुलं कुचमण्डलेषु, कौटिल्यमेव रमणीचलकुन्तलेषु ।
प्रेमप्रयोगविसरादपरः प्रयोगः किं विप्रयोगयिह चाऽस्ति न दम्पतीनाम् ॥४४॥
भाग्यान्वितेभ्यसदनेषु हिरण्मयेषु, पाञ्चालिकाचपलचालितचित्तवृत्तिः ।
यत्राऽग्रतोऽन्यसदनेषु समुत्सहे नो, गन्तुं समुद्यत इहाऽपि सुकामचारी ॥४५॥
व्यापारिणः सौरभगान्धिकौघा वसन्त्यनेके मणिमौक्तिकानाम् ।
कार्षापणज्ञाः सुपरीक्षि(ता)रो, यस्मिन् विशिष्टा व्यवहारिणश्च ॥४६॥
भान्त्यापणस्थानि क्रयाणकानि, यस्मिन् महार्घ्याणि गता लभन्ते ।
व्यापारिणस्तत्पितरौ विना न, यत्तदूह्य ने(नै?)कानि सुदुर्लभानि(?) ॥४७॥
वापी-तटाक-सरसोपवनेषु यत्रा-ऽध्वन्यं प्रयासमखिलं विनयन्ति पान्थाः ।
उप्तान्यनुप्तसकलानि च सम्भवन्ति, धान्यानि तेन किल तत्र कुतो बुभुक्षा ? ॥४८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नितम्बवक्षोरुहभारनम्रा-स्तारेण हारेण वरेण्यवक्षाः ।
विहारराजीं परमार्हतानां व्रजन्ति यत्र प्रमदाः प्रमोदात् ॥४९॥
एकातपत्रं त्रयविष्टपानां, घण्टाध्वनिः श्रीजिनराजराज्यम् ।
ब्रूते जिनानां निलयेषु यस्मिन्, त्रिकालपूजासमयोत्थ एव ॥५०॥
भवभवकश्मलवर्जितदेहा(:) कटितटतानवतर्जितसिंहा(:) ।
गुरुगुणगानरतिं विदधाना(:) सकलकलाकलिता(:) खलु यत्र ॥५१॥
यत्र लोका न विद्यन्ते, कदापि हि विपल्लवाः ।
वृक्षौघा यत्र वर्त्तन्ते, सर्वदा च विपल्लवाः ॥५२॥
यस्मिन्निभ्याकुले हस्ति-यूथवत् स्तनयुग्मवत् ।
सीमन्तिन्याः सद्विहारे, विद्यन्ते मानवा नवाः ॥५३॥
कैलाशवद् युते भूत्या सशिवे यत्र सन्त्यलम् ।
सरोवद् विविधा व्यक्ता अनेककमलाश्रये(?) ॥५४॥
स्त्रीगणो यत्र धात्रीवत् सदाधरमनोहरः ।
विशुद्धाहारसंयुक्ता, व्रतीशा इव सुन्दराः ॥५५॥
विशालं _ _ _ भालं, भाति भातिमनोहरम् ।
व्योमवद् विपुलं सारं चन्द्रालङ्कारसुन्दरम् ॥५६॥
स्त्रीगणो यत्र माधुर्य-चातुर्यगुणभासुरः ।
अक्षमालारतः शुद्ध-साधुवत् सर्वदानघः ॥५७॥
गावो गजा वा तुरगा महिष्यो, यस्य गृहेऽमूनि चतुष्पदानि ।
स प्राप्यते यो मनुजैः क्षितो, पणे पुरे यत्र विहारसारे(?) ॥५८॥
गृहे गृहे यत्र च वैजयन्त्यः सन्तर्जयन्त्यः सुविमानपङ्क्तिम् ।
सुरेश्वराणां गुणसागराणां जिनेश्वराणां नतितत्पराणाम् ॥५९॥
यत्र स्त्रियः स्वस्तिकपूरणेन, विशुद्धमुक्तामणिभिर्मुनीनाम् ।
विभूष्य चैत्यान् वसतिं विभाते, प्रशस्तहस्तेन विभूषयन्ति ॥६०॥
जम्बीर-गूवाक-सदा-ऽऽम्र-रम्भा-शोक-प्रियालप्रमुखद्रुमाणि ।
तमाल-नारङ्ग-वटा-ऽर्जुनानि, वनानि यस्मिन् विहगाश्रितानि ॥६१॥
गुरोर्न चन्द्रान्न कुजान्न _ _, बुधान्न शुक्रान्न शनेर्न सौम्यात् ।
न राक्षसो (साद्) वा न च सैंहिकेयात् पराभवांशोऽपि कुतोऽपि राशेः ॥६२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ओकांसि यस्मिन् जिनशेखराणां, स्वर्लोकनिश्रेणिनिभानि भान्ति ।
विमानशोभां प्रभया हरन्ति, किं स्यात् पुरः कृत्रिमवर्णनेन ? ॥६३॥
त्रिसन्ध्यमार्या विधिवन्दनादि, गुरोर्वितन्वन्ति हि नागरौघाः ।
दानेन युक्ता निरताः स्वधर्मे, यत्र प्रभाते प्रकटप्रभावाः ॥६४॥
मं यत्र शोभां मुनयो हरन्ति, धनीश्वरा वैश्रमणस्य शोभाम् ।
हरेः क्षितीशा यदि चोरयन्ति, न्यायैकगेहे च तथाऽपि यत्र(?) ॥६५॥
देवे-गुरौ च प्रतिबद्धरागाः(गा) न्यायेन सम्पन्नधनाश्च चङ्गाः ।
वसन्त्यनेके वसुधाप्रधानाः श्रद्धालवः स्वार्जितभूरिमानाः ॥६६॥
विराजते श्राद्धततिर्विशुद्ध-मुक्तावदाता ग्रहमण्डलीव ।
सदानभोगा भुवने प्रसिद्धाः, सदा प्रबुद्धा गुरुणा सनाथाः ॥६७॥
श्रद्धालवः सन्ति समस्तशस्त-गुणैर्गरिष्ठाः स्वकुलप्रतिष्ठाः ।
क्रुधा लघिष्ठाश्च वृषेण पुष्टा दौस्थ्ये दविष्ठा भुवने विशिष्टाः ॥६८॥
उदारनेपथ्यधराः सदाना-स्तपस्क्रियावश्यकसावधानाः ।
कृतोपयामाः सुखिनः स्वशील-कुलोपमैर्यत्र सहाऽन्यगोत्रे ॥६९॥
इत्यादिभिः श्राद्धगुणैर्विशुद्धाः श्रद्धालवो यत्र वसन्त्यनेके ।
पूज्यागमैः शोषितसर्वदौस्थ्ये, स्वीयस्थितेः सूचितसर्वसौस्थ्ये ॥७०॥
विश्वाद्भुतस्थावरजङ्गमश्री-तीर्थद्वयावाप्तजये प्रसिद्धे ।
पुरे वरे श्रीमति तत्र **तातैः** पवित्रिते रेणुभिरंह्रिलग्नैः ॥७१॥
विश्वत्रये सकलराजसमाज**सांई-दासा**भिधो वसुमतीयुवती _ _ _ शः ।
यत्र प्रशास्ति सकलाः सकलाः स्वकीय-प्राज्यप्रजाः प्रतिदिनं प्रबलप्रतापः ॥७२॥
प्रौढप्रतापसदनं कदनं रिपूणां, ज्ञाता स्वधर्मनिरतो विदितो जनेऽस्मिन् ।
कर्पूरपूरकलधौततुषारहार-कैलासशैलशशिकुन्दयशःप्रसारः ॥७३॥
वापी-प्रपा-कूप-तटाकराजी विराजते यत्र पयःप्रपूर्णा ।
वयोविलासोचितभूमिदेशा स्निग्धद्रुमैः शोभितसर्वपार्श्वा ॥७४॥
उत्तुङ्गशृङ्गचङ्ग-वृषभजिनोद्यद्विहारचारुतरात् ।
**वसहीपुरात्** तस्ताऽसौ(?) योजितकरकुड्मलो मु(मू)र्ध्ना ॥७५॥
**श्रीतातपाद**पादा-म्बुजसारपरागचञ्चरीकाभः ।
श्री**भानुचन्द्र**वाचकं(क-)शिशुः शिशुर्बालबुद्धियुतः ॥ युग्मम् ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

शिष्याणु**देवविजयो** विनयावदातं **श्रीतातपाद**पदसंस्मरणैकचित्तः ।
सत्प्रीतिरीतिनिपुणं परभक्तिमानं सोत्कण्ठमद्भुतसुमूर्द्धविधिप्रधानम् ॥७७॥
भक्त्या वचःकायमनोविशुद्ध्या सत्प्रीतिरित्या खलु बालबुद्ध्या ।
अत्यादरं फुल्लितरोमकूपो विनेयलेशाणुकणानुरूपः ॥७८॥
षड्वक्त्र-नेत्रप्रमितैरदोषिभि-रावर्त्तकैर्योजितपाणिकुड्मलः ।
हर्षप्रकर्षादभिवन्द्य वन्दनै-र्विज्ञप्तिकामातनुते यथाविधिः(धि) ॥७९॥
प्रयोजनं चाऽत्र विभातकाले स्वयं प्रबुद्धोत्पलपुष्पमाले ।
स्वाध्यायमध्यापनमर्हदादि-पञ्चप्रमिच्छ्रीपरमेष्ठिजापः ॥८०॥
तपः-क्रिया-लेखन-शोधनादि गुरोः समीपे पठनं च चिन्तनम् ।
इत्यादिविश्वाद्भुतधर्मकर्म प्रवर्त्तते शर्मसहाययुक्तम् ॥८१॥
**श्रीतातपादा**ह्वयमन्त्रजापान्-मिथ्यात्वदुस्तामसदीप्रदीपात् ।
विश्वातिशायिप्रथितप्रभावा-दनन्तमाहात्म्यनिधेः पवित्रात् ॥८२॥
श्रीगुरुवर्णनम् –
सूरिः सुखाय मे धीर भवकल्याणराजितः ।
सूरिः सुखाय मे धीर भव कल्याणराजितः ॥८३॥
विभवभवभावावो, विभवो विभवी विभुः ।
भुवोवभोविभीभावी-वभावो भुवि भाववित् ॥८४॥
रैरुक्करिकरोरूरुः, कोरेकः ककरोकरः ।
क्रूरारिकां ककोकारिः, कककुः करिकाकरः ॥८५॥ त्रिभिर्विशेषकम् ॥
आधाय धाष्ट्र्यं यदहं स्तुवे त्वां, तत्राऽपि भक्तेर्महिमा न शक्तिः ।
भेको यथा नृत्यति भोगिनष्के तत्रापि सद्गारुडिनः प्रभावः ॥८६॥
पातालं च भुवस्तलं गतमलं त्वत्कीर्तिमूर्तिः प्रभो !
प्राप्ताऽयं त्रिदिवं विगाह्य विदिता स्वर्वाहिनीस्वम्भसः ।
पूरैः स्वं स्नपयाञ्चकार चतुरा वाराच्युता बाष्कणाः
कर्पूरेन्दु-तुषार-हार-करका जातश्रमा ते ततः ॥८७॥
श्रीसूरिराज ! भवदीययशः सुरामे, सोमे हरौ फणिफतौ(णे) सुरसिन्धुरेवा ।
वाण्यां वृषे ग्रहगणेऽपि रुचिं बभार, कर्पूरपूरकलधौततुषारतार(:) ॥८८॥
त्वद्वादिनां मदवतां च तदम्बरेऽम्बके, कण्ठे च तन्नयनयोर्युगले मदेतत् ।
तत्कुन्तले बहुलतामससम्भृतानां तत्प्रोथके सिततरे पृथुतत्पथे वा ॥८९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सूरीश ! रत्नविमला बहुरूपिणी सा, जागर्त्ति या त्रिभुवने खलु चित्रमेतत् ।
शुद्धस्वरूपसहिता भवदीयकीर्त्तिः, सर्वत्र पर्यटति या विमला कथं सा ? ॥९०॥
त्वं चेद् यदा कल्पतरुस्तदायं, चिन्तामणिश्चेत् त्वमनल्पदाता ।
पूषा कथं चेद् भवतः प्रतापो मुधैव सृष्टा विधिना मुनीश ! ॥९२॥
प्रालेयाचलकुन्दकैरवलसत्कर्पूरपूरोपमे
ब्रह्माण्डोदरभासुरः शुचितरस्त्वत्कीर्त्तिपूरः परः ।
सर्वेषां च चमत्कृतिं न कृतवान् मेधाविनां शुभ्रिमा
यद् वादीन्द्रमुखैर्गुरोर्न मुमुचे विश्वे सिते श्यामता ॥९३॥
मुक्तालताचन्दनकीर्त्तिवल्ली-स्ववाहिनीव्याजत एव तारम् ।
आरुह्य वर्या प्रसरत्यजस्त्रं, प्रभो ! नभोमण्डपमिद्धभासा ॥९४॥
पुष्पाणि पुष्टानि भवन्ति तारा, क्षीराब्धिडिण्डीरसुहारतारा ।
पीयूषपूर्णोऽपि विधुः फलं तत्, संश्रूयते सर्वजने प्रसिद्धम् ॥९५॥ युग्मम् ॥
याते दिवं किल यशो नखरायुधेते त्रस्तार्कसोदर इवेति भिया मुनीश ! ।
तत्कुम्भतः पतितपेशलमौक्तिकौघै-स्तारं वियद् जगति तारकितं बभूव ॥९६॥
त्वत्कीर्त्याऽतितिरस्कृता यतिपते ! स्ववाहिनी व्योमनि
श्रीकण्ठस्य ससाद _ _ सुजटाजूटाटवीकोटरम् ।
जाने शापमदत्त रुद्रशरणा तस्यै च ते कीर्त्तये
त्वन्नाथस्य सुचङ्गसङ्गविरहो नैकत्र वासोऽस्तु ते ॥९७॥
कुन्देन्दुकैलाशतुषारहार-मुक्तासतारसुरशुक्तिकीर्त्तिः(?) ।
तिरस्कृता हंसततिस्तवे(स्त्वये)श ! जडाश्रयं मानसमाससाद ॥९८॥
श्रीराजेन्द्रसभागतेन भवता वादे समारम्भिते
यत्प्राप्तं खलु येन येन भगवन्! वादेन शब्दोत्कराः ।
क्षुभ्यत्क्षीरसमुद्रसान्द्रलहरीतुल्यैसुशब्दैर्जय-
स्तेन त्वं त्वयका[पि?] कीर्त्तिविसरस्तेनाऽपि विश्वत्रयम् ॥९९॥
ज्योत्स्नौघः किमु चान्द्रिकः ? किमथवा कैलाशशैलाधिपः ?
पिण्डः सारसुधारसस्य विमलः ? कर्पूरपूरोऽथवा ? ।
प्रालेयाचलतारतारविलसद्गोदुग्धपिण्डोऽथवा
प्रेक्ष्य ! त्वद्यशसां भरः श्रुतवतामित्याशयो भासते ॥१००॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

काचिद् वक्त्रमहीनरूपमनघं भक्त्या प्रमोदात् क्षणाद्
बिम्बोष्ठा गजगामिनी सुकृतिनी सीमन्तिनी श्रीगुरोः ।
बाला लोकयतेऽम्बरं पृथुतरं भ्रान्त्या कया कोविदाः
प्रोद्यच्छास्त्रधिया कथं मतिमतः प्रश्नस्य भेदं वद ॥१०१॥

शिष्टश्रेणिशिरोमणिस्ततमतिः पौराणिकः श्रीगुरुं
सम्प्रेक्ष्य प्रकटप्रभावभवनं चारुप्रभाभासुरम् ।
वर्हिं कोऽपि कथं स्पृशत्यनुदिनं शस्तेन हस्तेन वा
धीर! त्वं सुधियाऽन्वितो दो(?) धृतरतिः प्रश्नस्य भावं मुने ! ॥१०२॥

गुणागाधवार्द्धिं कुलोदारदीप(पं) स्तुवेऽहं गुरुं कामदं कामरूपम् ।
नताशेषदेवेन्द्र-नागेन्द्रभूपं लसज्ज्ञानसद्धारिणोऽगाधकूपम् ॥१०३॥

व्योमस्थालं विशालं सुरपतिललनामण्डलो नाथ ! भृत्वा
मुक्तातारापफलौघैस्तव भुवि पुरत(तः) स्वस्तिकं कर्तुकामः ।
मुक्तं तस्योपरिष्टाद् रवि-शशिविलसन्नालिकेरद्वयं च
त्वत्पादाब्जं समेति प्रकटगुणगणो वन्दनार्थं मुनीश ! ॥१०४॥

भक्त्या श्रीगुरुराजिराजपुरतः श्रद्धावतीभिः सदा
नारीभिर्भुवि भावतो विनिहिता मुक्ताफलस्वस्तिकाः ।
तानालोक्य मतिर्महामतिभृतां प्राप्तं गुरूपासनात्
पुण्यं मूर्त्तमिदं तु भव्यभविनामेवं समुज्जृम्भते ॥१०५॥

अनाहतानां यशसां निकेतनं, स्वरूपशोभाजितमीनकेतनम् ।
विधाय रूपं तव विश्वसर्जने विधिः प्रयासं सफलं विनिर्ममे ॥१०६॥

मुदा तवोपास्तिमवाप्य मर्त्त्यो गुणी गुणीयत्यनघो न चित्रम् ।
चित्रं पुनश्चेतसि भासते मे, गुणैर्विहीनोऽपि च मादृशो ना ॥१०७॥

एतच्चित्रं विचित्रं त्रिभुवनविदितं नैव कुत्राऽपि दृष्टं
नो भूतं नो भविष्यन्न च भवतितरां शृण्वतां पण्डितानाम् ।
धीधाम्नां त्वद्गुणाब्धिर्दिशि दिशि चतुरः सागरानुत्ततार
क्षुभ्यत्क्षाराब्धिमुक्ताफलशशिविलसद्वारिडिण्डीरपिण्डात् ॥१०८॥

भृङ्गैरिवाऽब्जं च सरो मरालै-र्भानुर्यथा भानुभिरेव देवः (वः) ।
ऋक्षैरिवेन्दुस्त्रिदशैस्तुराषाड् यः सेव्यते साधुपरम्पराभिः ॥१०९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अताड्यजाड्यद्रुकरिर्महानो गुणैरशेषैः सुतरामहानः ।
प्रोद्दामकामद्विपसिंहरूपः छिनत्त्वपोषान् सविपल्लवान् सताम् ॥११०॥ युग्मम् ॥
विलोक्य लोकोऽपि गुरून् स्वचित्ते, विकल्पते किं किल कल्पपादपाः ।
एते ह्यनन्तोत्तमवस्तुदानाः, कल्पद्रुमाश्चिन्तितमात्रदानाः ॥१११॥
पूज्येन पूज्यचरितेन गुणैः स्वकीयैर्येन ह्यसीमपरभाग्यमुनीश्वरेण ।
साम्यं वदन्ति तव_ [ये] शशिनो मुखस्य ते पण्डिता जगति मुग्धधियो विभोऽमी ॥११२॥

संस्मारिता जगति गौतममुख्यपूज्याः(ज्या)
भूयाद् गुरुः स भवतां भवतान्तिशान्त्यै ।
आस्यं तवाऽतिविमलं मलिनो मृगाङ्को
मध्येऽमलस्य मलिनस्य समानता क्व ? ॥११३॥

विभ्राजते दन्ततितिस्त्वदास्ये, जानेऽहमेवं समसूरिरत्न ! ।
जिह्वाग्रपद्मस्थितशारदाया हारस्य कण्ठे लतिका विभाति ॥११४॥
त्वद्वक्त्रशुभ्रेन्दुमसौ निरीक्ष्य क्षपाकलङ्की मुनिराज! चन्द्रः ।
मदाच्छशाङ्कोऽभिषुणोति लाञ्छनं सुगौरदुग्धाम्बुधिमेत्य नित्यशः ॥११५॥
मेधाप्रधानैः प्रवराभिधानै-र्बुधैः स्वबुद्ध्यो(द्ध्य)र्जितभूरिमानैः ।
मुक्तावदातैर्विमलावदातै-र्निषेव्यते सूरिसमाजराजः ॥११६॥
जगति विजयराजिनोऽपारिजाताः प्रजापारिजाताः सदाखर्वगर्वोतिगुर्वर्णवागस्तयः
प्रणमदमरकोटयः कामदाः कामदाः श्राग् दोषाश्रिताः क्षिप्तदोषाः समुद्रा अमुद्राः पुनः ।
सकलकुशलधोरणीभिः समृद्धा विशुद्धाः प्रसिद्धा अयुद्धाः प्रवृद्धाः सुसन्धाः स्वयं
गुरुगुणगणसल्लताम्भोधराः ज्ञानपानीयरत्नाकराः सूरिराजाः(जा) जयन्तीश्वराः सुन्दराः ॥११७॥

सकलसकलभासिनो भासयन्तोऽर्हतां शासनं शंशयन्तः सुमार्गं समग्रं समयेश्वराः
अभिनवतरचारुचातुर्यमाधुर्यगाम्भीर्यसौन्दर्यसुस्थैर्यविश्वाद्भुतौदार्यवर्यादिभिः ।
सुजगति कलिता गुणैः प्रोद्भवद्धीभराः श्रीकराः श्रीकराः श्रीद(पदवी)धराः शङ्करा भासुराः
नति(त)वति धनदानरे सूरिचञ्चच्छिरःकोटिकोटीरकल्पा विशुद्धावदाता यशोराजिताः ॥११८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यः पापठीत्यद्भुतभक्तिभासुर-स्त्वद्गोत्रमन्त्रं सततं पवित्रम् ।
**योगीन्द्रवंशा**भ्रनभोमणिप्रभो ! क्रोडे रमा तस्य तु लोलुठीत्यहो ॥११९॥
श्रेयः श्रेयःसम्पदां सन्निधानं सेवन्ते त्वां ये सदा सावधानम् ।
सन्तः सन्तो मानसे भक्तियुक्ता-स्तेषां कीर्त्तिः **शालिनी** सूरिराज ! ॥१२०॥
बिम्बफलोष्ठी कोकिलकण्ठी, सद्गतिहंसिकाऽपि सुकेशी ।
**चम्पकमालां** कापि वहन्ती, त्वामभिगच्छन्ती रतये स्यात् ॥१२१॥
सा भारती भाति तवैव शुभ्रा, भागीरथीव प्रकटप्रभावा ।
जाड्याद्रिविद्रावम**हेन्द्रवज्रा**, ध्वस्तं ययाऽज्ञानतमोऽस्तमोह ! ॥१२२॥
**द्रुतविलम्बित**मायतलोचना, तव मुखाब्जविलोकनचञ्चला ।
सुकृतिनी सदनादुपसर्पति, कटिकुचोत्कटतां प्रपटीयसीम् ॥१२३॥
वासरान्तघनघनभा-मङ्गनां त्यज **हलमुखीम्** ।
दुर्मुखीं सपदि मलिनां - श्रीगुरुं भजत भाविकाः ॥१२४॥
याचे नाऽहं श्रीः सांसारीः **विद्युन्माला**दोलालोला[:] ।
त्वत्पादस्याऽजस्रं सेवा, से(सा)ऽस्तु प्राज्या मैनोहन्त्री ॥१२५॥
**उपेन्द्रवज्रा**युधसन्निभा ते सरस्वती वर्णवती विभाति ।
अशेषसन्देहमहीधरो(रौ)घे विनिद्रमर्त्त्याकुलदेशनायाम् ॥१२६॥
योगीन्द्रस्त्वं कथयसि भुवनेऽहं दयावान् दया मे(?)
**मन्दाक्रान्ता**ऽहितमधुसखा दुष्टभावेभसिंहः ।
स्वामिन् ! दानी कथमसि सदा त्वं यतो वादिवारै-
र्नाप्तं पृष्ठं त्रिभुवनमहितस्ते कदाप्यर्थितं च ॥१२७॥
विस्फूर्जन्मतयो मदेन कलिताः **शार्दूलविक्रीडितं**
त्वां पश्यन्ति च वादिवारणघटा नश्यन्ति वादोद्धुराः ।
त्रस्यन्त्यद्भुतमेतदेव न विभो! चित्रं यतस्त्वां गुरुं
भक्त्याऽवेक्ष्य नरामरेश्वरगणा प्रीतिं प्रयान्त्यद्भुताम् ॥१२८॥
ता एव वर्णयामो वयं विशेषेण वैबुधीः श्रेणीः ।
या जिनराजगुणानां गाने गर्जन्ति **मुखचपलाः** ॥१२९॥
तव गुणगीतिप्रीतिः स्फीतमती स्फ(स्फु)रति मानसे यस्य ।
धन्यानां मूर्द्धन्यः स एव सङ्गीयते सदा सद्भिः ॥१३०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भवदीयपादपूजां जगत्पते ! जनयितुं मदीयेयम् ।
हस्तद्वयी च जिह्वा गुणग्रहे ते **महाचपला**:( ला ) ॥१३१॥
कल्पद्रुमाधिकफलप्रद ! भक्तजन्तो-स्त्वत्पादपङ्कजयुगस्य ममाऽस्तु सेवा ।
स्वर्गापवर्गसुख तिसमुक्तमस्ति(?), सेवा भवेन्न महतां विफला कदापि ॥१३२॥
**श्रीतातपादैः** प्रवरप्रसादैर्गतावसादैर्विगलत्प्रमादैः ।
**श्रीचन्द्रशाखा**म्बरभासनैक-सहस्रपादैः प्रणतेन्द्रपादैः ॥१३४॥
सन्दर्भिताः सौववपुःसमीपा-भिवर्तिवाचोपचयैर्वचोभिः ।
प्रसादमाधाय शिशौ स्वकीये प्रसादपत्र्यस्तु मुदे प्रसाद्याः ॥१३५॥
मे भूरिवर्षविरहानलतप्तचित्त-सन्नीलकण्ठममलं कलिदोषमुक्तम् ।
आनन्दयिष्यति च मोदपयःप्रपूरै-स्तृष्णातुरं जगति लेखलसत्पयोदः ॥१३६॥
त्व[त्पत्र]लेखः स्फुटमञ्जुभाषी प्रशस्तहस्ताह्वविमानसंस्थः ।
आनन्दयिष्यत्यनिशं विदग्धो विशुद्धवंशप्रभवोऽत्यभीष्टः ॥१३७॥
यतः सन्तो भवन्तीह, प्रार्थनाभङ्गभीरवः ।
उदारचरिताश्च स्यु-र्विशेषज्ञा विशेषतः ॥१३८॥
आज्ञारसिकचित्तस्य किङ्करात् किङ्करस्य च ।
हितशिक्षा हिताः प्रेष्याः प्रेष्यानन्दकृते प्रभो ! ॥१३९॥
दासः प्रेष्यः प्रसादार्थी सेवाहेवाकसेवकः ।
किङ्करस्तावकीनोऽस्मि तत्प्रसादमपि प्रभो! ॥१४०॥
पात्रापात्रविचारोऽपि महतां नैव युज्यते ।
केवलं कृपया लेख-प्रसादेन च पालय ॥१४१॥
वासरोऽवसरः सोऽपि, साऽपि वेला प्रशस्यते ।
यत्र श्रीतातपादानां दर्शनं जायते शिशोः ॥१४२॥
दुःप्रापं मन्दभाग्यानां चिन्तारत्नं भुवस्तले ।
तथाऽस्मादृशां स्वामिन् ! दर्शनं पावनं तव ॥१४३॥
स्वशिशोः प्रणतिस्तातै-रवधार्योपवैणवम् ।
भाग्योदये च [मे] साक्षाद, भाविनी पाविनी पुनः ॥१४४॥
त एव धन्या भुवि ते विशुद्धा(द्धाः), सुजन्मिनस्ते खलु ते कृतार्थाः ।
सुजीविनस्ते धुरि कीर्त्तनीया-स्ते पुण्यभाजां सुकृतैकभाजनम् ॥१४३॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गृह्णन्ति ये लोचनयामलस्य, शुद्धं फलं दुर्लभमेव विश्वे ।
ये प्रत्यहं प्रातरवेक्ष्य तात-पादाम्बुजं भाग्यभरेण लभ्यम् ॥१४४॥ (युग्मम्)
वनस्पतिप्ररोहाणामपि सत्तीर्थवासिनाम् ।
धन्यत्वं कथयन्तीह, किं पुनो(न)म(र्म)हतां नृणाम् ॥१४५॥
अगण्यपुण्यलभ्ये हि, तीर्थेऽस्मिन् जङ्गमे समे ।
भक्तिभाजां च साधूनां, सर्वदा पावनात्मनाम् ॥१४६॥ युग्मम् ॥
प्रोद्दामवादिकुलकुञ्जरकुट्टनैक-कण्ठीरवा वरगुणाः प्रवरप्रभावाः ।
ज्ञाताखिलस्वपर _ _ गणस्वभावाः श्रीधर्म _ _ _ वरा(:) समवाचकेन्द्राः ॥१४७॥
श्रीमत्त**पागण**विशुद्धविशालसौध-स्तम्भोपमाविविधशास्त्रगणानि नूनम् ।
यैः पाठयद्भिरनिशं गुरुगौरवार्हाः(र्हं) सत्पाठकत्वममलं सफलीकृतं च ॥१४८॥
पण्डिताः **पद्मविजयाः**, पण्डितोत्तमताजुषः ।
**नयादिविजया**स्तत्र, पण्डिता गुणमण्डिताः ॥१४९॥

(एतावन्मात्रमेवेदं पत्रमुपलभ्यते)

—x—

ला. द. विद्यामन्दिर,
अमदावाद
सू. ४३४०४

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(२९)

## जीर्णदुर्गस्थ-वाचकश्रीविनयविजयं प्रति श्रीहीरचन्द्रमुनेः पत्रम्

सङ्घेषु शान्तिं कुरुतां स **शान्ति**-र्नाम्ना गुणेनाऽपि सदर्थनाम्ना ।
यं शान्तिदेवी भजते स्म भावाद्, विश्वत्रयीलोकविलोकनीयम् ॥१॥
यदीयं हरिणो रम्यं, शिश्रिये चरणाम्बुजम् ।
स्वीयं संसारसागरं, तितीर्षुरिव तारकः(कम्) ॥२॥
एवं(नं) श्रीमन्तमर्हन्तं, कृत्वा प्रणामगोचरम् ।
श्रीम**द्राजकोट**द्रङ्गात्, तत्र श्रीमतिपूर्वकम् ॥३॥
शिष्याणु**र्हीरचन्द्राख्यः**, प्रेमपूरितमानसः ।
सम्भाषते ससन्मानं, भक्तिभारभरावहः ॥४॥
यथाजन्यमिह प्रातः, प्राचीनाचलचुम्बति ।
मयूखमालिनि ध्वस्त-ध्वान्तप्रकरतस्करे ॥५॥
महेभ्यसभ्यसम्पूर्ण-सभायां वाचनं मुदा ।
**भगवत्याख्य**सूत्रस्य, प्राणिनां कर्मपाचनम् ॥६॥
पठनो(ने)च्छुकसाधूनां, पाठनं पठनं पुनः ।
इत्यादिदिनकृत्येषु, विद्यमानेष्वविघ्नतः ॥७॥
क्रमायातं सर्वपर्व-शिरोरत्नसमोपमम् ।
श्रीमदा**ब्दिकपर्वा**ऽपि, स्तुत्यं सुमा(म)नसामपि ॥८॥
यत्र कल्पितम(क)ल्पस्य, **कल्पसूत्र**स्य वाचनम् ।
समीरगुणसङ्ख्याङ्कैः, प्रभावनादिसंयुतम् ॥९॥
**षोडशद्युजीवामारि-पटहोद्घोषणं** पुनः ।
सन्तोषणं मार्गणानां, सर्वसाधर्मिपोषणम् ॥१०॥
महामहसमायुक्तं, निर्व्यूहं भिन्दवियतः (?) ।
देव-गुर्वोः प्रसादेन, श्रीमतां च हिताशिषा ॥११॥
यदीयकीर्त्त्यकूपारो, नवीनोऽभूत् सुदुस्तरः ।
परमेषां(परेषां) कीर्त्तिसिन्धूनां, प्रवेशं न ददौ यतः ॥१२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

परापकीर्त्तेर्यत्कीर्त्ति-रहसच्चन्द्रनिर्मला ।
द(दि)शान्धकारनीलाया(यां), निशि तारावलिच्छलात् ॥१३॥
यत्कीर्त्तिव्रतती स्वर्गं, मेरुदण्डेन गच्छती ।
द्वे फले सुषुवे व्योम्नि, हंसेन्दुबिम्बकैतवात् ॥१४॥
नन्दनादिवनेषूच्चै-र्वीक्ष्य पुष्पानि(णि) निर्जराः ।
वितर्कयन्ति यत्कीर्त्त्य-प्सरसां हसनं किमु ॥१५॥
कीर्त्तिस्त्रोतस्विनी येषा-मपूर्वा भ्राजतेतराम् ।
पुष्णन्ती श्रेयःपृथ्वीं तत्, खलाब्धौ नैति कौतुकम् ॥१६॥
हरित्सीमन्तिनीवक्त्रं, सुरभीकुरुतेतमाम् ।
यत्कीर्त्तिनिकरो राका-कौमुदीपतिपाण्डुरः ॥१७॥
तैः स्वीयगात्रनीरोग-तासमाचारसूचकः ।
देव ! दूतो मम प्रेष्यो, महासन्तुष्टये हृदः ॥१८॥
इत्यनन्तगुणरत्नरोहणै-स्तातपादचरणैरनारतम् ।
धारणीयमथ चोपवैणवं, **हीरचन्द्र**नमनं स्वचेतसि ॥११॥
तत्र श्री**सुकनकाख्यः**, सु**कान्तेर्विजय**स्तथा ।
**नोयमाद्**(नेमाद्)**विजय**नामाऽभूद्-**रत्नाद् विजय**नामकः ॥२०॥

अथ –

तत्कालीकृतवृत्तेन, लिखिता पत्रिका ततः ।
श्रीमद्भिर्वाचनीयेयं, संशोध्य किल दूषणम् ॥२१॥
कृत्यं शिशूचितं वाच्यं, प्रणम्या जिनराजयः ।
मन्नाम्ना शनिविजय-दशम्यामिति मङ्गलम् ॥२२॥

शेषसाधु-साध्वीप्रमुखाणां यथार्हं प्रणतिरवधार्या । तथाऽत्रत्यसङ्घः प्रणमति । शिशूचितं कार्यं प्रसाद्यम् । अन्यच्च क्षूणं यदत्र तत् क्षन्तव्यं क्षमाक्षीरनीरधिभिः श्रीपरमगुरुभिरिति भद्रम् ॥

श्रीम**त्तप**गणगगनाङ्गणदिनमणि**विजयसेनसूरीणां**
॥ पूज्याराध्य ॥ सकलवाचकसभाभामिनीभालस्थलभूषणायमान वाचकश्री ९
श्री**विनयविजय**गणिचरणाब्जानाम् ॥ श्री**जीर्णदुर्गे** ॥

—x—

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर, सूरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ३० )

## पत्तननगरस्थ-वाचकश्रीलावण्यविजयं प्रति

## श्रीमेघचन्द्रमुनेः पत्रम्

श्रिये स वः **सप्तमतीर्थनेता**, यस्यांऽह्रियुग्मश्रयणादवाप ।
यः स्वस्तिको मङ्गलतामनर्घ्यां, सर्वासु सन्मङ्गलमालिकासु ॥१॥
रेजुः पञ्चफणा यस्य, शीर्षे पृथ्वीभुवः प्रभोः ।
मन्ये सुमतयः पञ्च, पञ्चाऽऽचारा इमेऽथवा ॥२॥
अष्टाभिर्भवसम्भवैर्नवनवस्नेहैकपाशैर्दृढं,
बद्धामिन्दुमुखीं विहाय तृणवद् राजीमतीमादरात् ।
दीक्षां क्षीणभवोऽभजच्छिववधूसंयोगसद्दूतिकां,
**शङ्खाङ्कः** स शिवासुकुक्षिसरसीहंसः शिवायाऽस्तु नः ॥३॥
यस्मिन् दुष्टकलौ गताखिलमणीयन्त्रमन्त्रप्रभावे,
गोमांसाशनदुष्टमुद्गलदलोद्वासिताशेषदेशे ।
सर्वत्र प्रचुरप्रभावमहिमाविस्तारमाप्तस्तदा;
स श्रीपार्श्वविभुर्जगत्त्रयजनानन्दकन्दाम्बुवाहः ॥४॥
स्वस्तिश्रीशरणं गता(त?)प्रहरणं पुण्यश्रियाः प्रापणं,
सत्कारुण्यलतावितानविलसत्संवृद्धिपाथष्कणम् ।
भव्याभीप्सितपूर्त्तिकामकलशं सर्वापदां वारणं,
श्रीवामेयममेयमञ्जुमहिमापारं मुदां प्रापणम् ॥५॥
अथ परमगुरुसकलवाचकेश्वरवाचक श्री५ श्री **लावण्यविजय**चन्द्रवर्ण[न]म् ॥
पद्मं पादतलं मृशद्(?) गतमदं रेखामिषाद् यद् विभो-
र्वक्त्येवं जडजेन ते मुखशशिस्पर्द्धा मयाऽकारि यत् ।
स्वामिंस्तीक्ष्णमुखैश्शिलीमुखगणैर्दुर्वेधसा विध्यते,
मुक्तायः(?) खलु मेऽभवत् तत इदं प्रत्यक्षसिद्धं फलम् ॥६॥
भव्याज(न)ना(?)ब्जवनराजिनवाम्बुवाहं, संसेवितामरनरोरु(र)गवृन्दनाथम् ।
मोहान्धकारहनने सहस्रांशुतुल्यं, श्री-ऋद्धि-वृद्धिसुखदं प्रणमामि भक्त्या ॥७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सर्वातिशायिमहिमाम्बुधिवृद्धिचन्द्रं, संसारसागरपतज्जनयानपात्रम् ।
कर्माष्टशत्रुहनने कृतसारयत्नं, भव्या नमन्तु गुरुराजसमं प्रमोदात् ॥८॥
औदार्यगाम्भीर्यगुणाभिरामं, कन्दर्पनिर्धा प्र(?)सुशीलसेव्यम् ।
भव्या जनानां शिवदं नतेन्द्रं, सेव्यं सदा ज्ञानमयं नमन्तु ॥९॥
तपोग्निना त्वद्दहितः स्मरारि-स्तद्धूमपुञ्जैर्गगनं व्यलेखि ।
नो चेद् वचःपावनमेव नाथ!, नीलाभ्रकं मेघमिषात् कथं तत् ॥१०॥
इत्यनन्तगुणरत्नरोहणै-स्तातपादचरणैरनारतम् ।
धारणीयमथ चोपवैणवं, **मेघचन्द्र**नमनं स्वचेतसि ॥११॥

साधु-साध्वीप्रमुखाणां यथार्हं प्रणतिरवधार्या । तथाऽत्रत्यः सङ्घः प्रणमति । शिशूचितं कार्यं प्रसाद्यम् । अन्यच्च योगोद्वहनादिकविषये बह्व्युत्कण्ठा वर्त्तते । तेनाऽस्मिन् वर्षे तत्कृत्यं भवति । **भुजनग**रादि सम्यक् भवति । तथा एतद्विषये श्रीताता एव सामग्रीमिलनप्रभवः । अन्यच्च श्रीतातचरणे मधुकरीभवितुकामः शीघ्रमेवाऽस्मि, तथापि दूरदेशत्वान्मार्गवैषम्या(द)थ कियन्ति दिनानि लगन्त्यपि । तथा श्रीतातैरेतत्कार्यं स्वकार्यीकृत्य येषामादे(ष्ट)व्यं भवति तेषामादेष्टव्यम् । अथैतत्कार्ये श्रीपूज्यचरणा एव स्रष्टार इति भद्रम् ॥

अथ –

तत्कालीकृतवृत्तेन-पत्रिका लिखिता यतः ।
श्रीमद्भिर्वाचनीयेयं, संशोध्य किल दूषणम् ॥१२॥
कृत्यं शिशूचितं वाच्यं, प्रणम्या जिनराजयः ।
मन्नाम्ना शनिविजय-दशम्यामिति मङ्गलम् ॥१३॥ श्रीरस्तु ॥

॥ पूज्याराध्य ॥ सकलवाचकसभाभामिनीभालस्थलभूषणायमान वाचकश्री १९ श्री**लावण्यविजय**गणिचरणाब्जानाम् ॥ पत्तननगरे ॥ श्रीरस्तु ॥

—x—

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर, सूरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ३१ )

## वाचकश्रीअमरचन्द्रं प्रति

# मुनिश्रीकर्मचन्द्रस्य लेखः

सत्कर्मचन्द्रो लिखति ओं श्री अमरचन्द्रान् प्रति–
स्वस्तिश्रीमन्तमाप्तं परमसमरसीभावमासाद्य सद्यो-
ध्वस्ताबोधं विशुद्धं प्रशमसुखवतां योगनिद्रां गतानाम् ।
प्रत्याहारेण नूनं विशदसुहृदये योगिनां प्रस्फुरन्तं
नामं नामं प्रकामं त्रिजगदधिपतिं **पार्श्वनाथं** सनाऽथ ॥१॥
अथास्ति भूस्पृग्भिरदभ्रविभ्रमै–र्भ्रातं च निर्भीतिविभूतिसंयुतम् ।
अखण्डभूमण्डलभूषणं पुरं, भुवस्तले **श्रीफलवर्द्धि**नामकम् ॥२॥
प्रशस्तवातायनमत्तवारणै–रभ्रोत्कराभैः सद(र?)दभ्रसद्मभिः ।
विभाति तत्पत्तनमुच्छ्रितैस्ततैः, सना विमानैरिव शर्मदं दिवम् ॥३॥
तदथ दूरि(र)तरादतिभासते, वियति संचरितैर्मरुदीरितैः ।
ननु विधातृभिरेव पुरश्रियो, जिननिकेतनकेतनराशिभिः[१] ॥४॥
बहुलबिल्वहलिप्रियसल्लकी–बकुलसालतलादिकरालिकैः[२] ।
पृथुतरं परितोऽस्ति पुरं हि तत्, सुगहनं गहनं सुफलादनम्[३] ॥५॥
प्रदधतां विमलं सलिलं सदा, जलरुहैर्दलितैर्ललितैर्लसत् ।
सुरभिमत् पिहितं प्रमदंकरैः, सुसरसां सरसाम्बुदरामभे[४] ॥६॥
सुविपिनेऽस्ति नु यत्र ततिर्युता, श्रमहरैर्हरिहारिलतोत्करैः[५][६] ।
अनिललोलपलाशलतावृतैः, सघननिम्बकदम्बकदम्बकैः ॥७॥ युग्मम् ॥
सुकदलीनिलयेषु कलाभृता[७], विशदसंहननाः सदृशाननाः ।
असुखहारिणि यत्र सुकानने, सदयिता दयिता विहरन्ति वै ॥८॥
घनघनेऽभ्रपथे कृतगर्जिते, गतवतां प्रचकास्तितरां मुदम् ।
सुशिखिनां सुखिनां प्रियनर्तनैः, शुचिकलापकलापभृतां[८] हि तत् ॥९॥
तदधिवसन्ति ससाताः, शिष्यव्रातैः समावृताः शश्वत् ।
कोविदकोटिकलाभृ-**च्छ्रीमदमरचन्द्रमुनिराजाः** ॥१०॥

---

१. प्रसादध्वजसमूहैः । २. वृक्षैः । ३. शोभनं शुकपक्षिकम् । ४. सजलघनकृष्णदीप्ति ।
५. मर्कट । ६. शाखासमूहैः । ७. चन्द्रेण । ८. पिच्छसमूह ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

बृहदबोधतमोऽपनयन्निवा-स्तमितवादिबुधोडुगणो रविः ।
विशदबोधमनोहरधामभृत्, समुदितो[१] मुदितो हि स भासते ॥११॥
लसदगण्यगुणान्वितभूघनो, मतिमतामवतंससमो दमी ।
क्षितितले सविपक्षकविव्रजो, विजयतां जयतां दृढमर्ज्जयन् ॥१२॥
प्रसरिसर्त्ति जगत्सु बृहद्यशः, सकलशारदचन्द्रकरोज्ज्वलम् ।
बहुमदोद्धतधीरजयोत्थितं, शुभवतां भवतां भवतां गुरो! ॥३१॥
अथ चकास्तितरां प्रतिवासरं, सुरगुरुप्रतिमोऽखिलविद्यया ।
स मृदुवाक् जनरञ्जनकोविदः, सुकृतिनां कृतिनां पुनरुत्तमः ॥१४॥
तेषां गुरूणां कमनीयलक्षणं, पादारविन्दद्वयमेनसोऽपनुत् ।
वन्दारुभूमीशकिरीटसुस्रजां, रजस्समूहैरनुरञ्जितं महत् ॥१५॥
नंनन्ति मूर्ध्ना शतशोऽथ भक्तियुक्, सन् **कर्मचन्द्रः** सुमना मनीषिणाम् ।
स **थांदिलाणान्त**पुरं वरं पुरं, सदाऽधितिष्ठन् रुचिरं चिरन्तनम् ॥१६॥
युग्मम् ॥

यतिस्तु तत्रत्यमिति प्रशस्तं, स शस्तुमिच्छन् सुवचस्सविस्तरम् ।
प्रवक्ति युष्मत्कृपयाऽत्र सद्विभो!, समुल्लसन्ती कुशलावलीत्यलम् ॥१७॥

अथ च निजाकूतं प्रचिकटयिषुर्म्रदीयसीमिमां वाचमभिदधामि । भवद्विनेयोऽहकम्, भगोऽद्य श्वो वा श्रीगुरूपान्ते व्रजेयमिति विमर्शं विदधानोऽहकं द्राक् श्रीमतां प्रस्थातमेव मां जानीत । ननु चात्रैव कस्यांचिदभ्यर्णवर्तिन्यामेव पुरि स्थाताः प्रागभ्यर्हिताः कैश्चिदभत(?) । कथं तर्हि सत्वरमेवाऽतिदूरस्थले प्रस्थितवन्तो भवन्तो भवन्तसन्तो(?)ऽथैतर्हि भवद्दर्शनरणरणकवतो ममैकैको वासरो हायनसन्निभो व्यत्येतितरामुपलब्धिमतामनुतरेणाऽवगन्तव्यमिति किं बहुना वाक्प्रपञ्चेन ? । प्रतिपर्णं तूर्णं कर्णाभ्यर्णचरिष्णु कार्यं च । तथोदाहार्यमार्यवर्यैर्द्वार्यचि(?) कृपादृक्मयीति मन्तव्यम् । सद्यो हार्दहृद्यानवद्यहृदयेन लब्धवर्णवरेण्येन भवता शुभवता श्रीमता ।

मितिः प्रौष्ठपदसितप्रतिपत्कर्मवाट्याः ॥

भवदभ्यर्णवर्त्तिनां मुनीनां नत्यनुनतिततयो यथायथं मन्नाम ग्राहं ग्राहं कर्णजाहोपगूहीकार्याश्चेति मङ्गलममलमलं स्तात् लेखकवाचकयोरिति ।

**श्रीमत्तपोगणीयेन श्रीसागरेण** भवदंह्री प्रणिपनीपत्येते ॥

—x—

१. उदयं प्राप्तः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ३२ )

# मङ्गलपुरस्थ-श्रीलब्धिचन्द्रविबुधं प्रति
# वीरमग्रामतो श्रीगुणचन्द्रस्य विज्ञप्तिः

स्वस्तिश्रियं वस्तनुतां सनाथः, कृपार्द्रचेता इह **शान्तिनाथः** ।
अर्हन् सपर्यां नतदेवनाथ-श्चरित्ररत्नान्वितसाधुनाथः ॥१॥
स्वस्तिग्रहाधीश्वरतुण्डपद्मः, स्वप्नासुरासेवितपादपद्मः ।
पद्मादिचिह्नैर्युतहस्तपद्मः, स्वाङ्गप्रभानिर्जितहेमपद्मः ॥२॥
संसारवार्धौ वहनांह्रियुग्मः, सरोजकोशैः सदृक्षा(शा)क्षियुग्मः ।
सत्पद्मनालासमबाहुयुग्मः,सुपार्श्वकोपासकदेवयुग्मः ॥३॥
जगत्त्रयेशः सहसाजितारः, जेयः सदा संसुखसेवितारः ।
सद्देशनागीर्जनरञ्जितारः, जनोरमाजेषु गतावतारः ॥४॥
अशिश्रयद् यस्य पदारविन्दं, मृगो विहायैव वनारविन्दम् ।
स्त्रिया जितं मे नयनारविन्द-मिवेति पूत्कर्तुमिहच्छविन्दम् ॥५॥
श्रीमन्तमेनं स्तुतिगोचरीकृतं, श्रीविश्वसेनान्वयपुष्करारुणम् ।
श्रीसर्वतीर्थेश्वरदेवकुञ्जरं, देवासुरासेवितपादपङ्कजम् ॥६॥
श्रीशान्तिसोमद्युतिमेव मन्मनः-कात्यायनीनाथललाटपत्रकम् ।
शीघ्रं समानीय जगच्छिवङ्कर-मापद्धरं वाञ्छितदं च भूस्पृशाम् ॥७॥
यत्राऽधिपो राजति नित्यधर्मा-रक्षापरो जानपदे स्वकीये ।
द्योतद्विपोन्मूलितवैरिवृक्ष-आशैशवाभ्यासितसर्वविद्यः ॥८॥
यत्र भूमिपपथे मतङ्गजा, बभ्रुरेव सदृशं पयोमुचाम् ।
गर्जनेन तु मदश्रवेण ह(?), श्यामवर्णतनुना च साम्प्रतम् ॥९॥
राजन्ति तीर्थेश्वरराजगेहा, सच्चित्ररूपान्वितभित्तिदेशाः ।
स्याद्वादिबिम्बान्वितमध्यदेशा, भक्तालिसंचारितनित्यपूजाः ॥१०॥
यत्राऽऽर्येभ्या धनदसुरवद् याचके दत्तदानाः,
सद्धीमन्तो नरपतिसभानित्यसंप्राप्तमानाः ।
कुर्वन्तोऽर्हां वरजिनपते(?),
चन्द्राब्जाभा गुरुवचनरताः सोद्यमाः पुण्यकृत्ये ॥११॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नार्यो यस्मिन् वनजवदनाः स्पर्द्धयन्त्यः सुरीभी,
　　रूपाधिक्याद् विशदगमनात् श्वेतपक्षैश्च सार्धम् ।
सारङ्गाक्ष्यो विपुलजघना नित्यविस्तीर्णचित्ताः,
　　शस्याचाराः शुभगुणभरास्तत्परा धर्मकार्ये ॥१२॥
यस्मिन् सन्ति व्रतिजनगणा नित्यसोल्लासचित्ताः,
　　श्रीवीराज्ञाकरणपटवो ज्ञातसिद्धान्ततत्त्वाः ।
पूतात्मानः शमरसयुतास्त्यक्तसंसारसङ्गाः,
　　संश्रेयोदं चरणमणिकं सोत्सुकं संदधानाः ॥१३॥
श्रीश्रीमति तत्र विशद-**मङ्गलपुर**नाम्नि बन्दिरे रम्ये ।
**श्रीतातपाद**पङ्कज-रेणुभरपवित्रितानन्ते ॥१४॥
श्रीमद्**वीरमग्रामाद्**, वीरमग्रामाज्जनालिसङ्कीर्णात् ।
गजरथकरभतुरङ्गम-संपूरितमध्यभागाच्च ॥१५॥
तरणिप्रमितावर्तक-वन्दनकेनाऽभिवन्द्य सोल्लासम् ।
सस्नेहं सोत्कण्ठं, सहर्षमेवेह सानन्दम् ॥१६॥
हर्षोद्गमरोमाङ्कुर-हृदयो भून्यस्तको विनेयाणुः ।
**गुणचन्द्रो**ऽथ विधिवद्, विज्ञप्तेः पत्रिकां तनुते ॥१७॥
शमिहाऽस्ति यथास्माकं, श्रीगुरुसौम्येक्षणावलोकनतः ।
श्रीमद्गुरुनाममहा-मन्त्रस्मरणेन पुनरपरम् ॥१८॥
वदननिर्जितपूर्णनिशाकरं, शुचिसुरासुरमानवशङ्करम् ।
कुसुमकेतनहेलनशङ्करं, समतया चिरमानवशङ्करम् ॥१९॥
सकलपापतिमिस्रदिवाकरं, वचनपाटवरञ्जितनागरम् ।
तपकुठारविदीर्णभवाकरं, शमरसामृतसोमजसागरम् ॥२०॥
नवसुवर्णवनोद्भवबन्धुरं, विबुधमानवसन्ततिसिन्धुरम् ।
नृपसमाजसुलब्धसदादरं, सकललोकहितव्रतसुन्दरम् ॥२१॥
शिवलताङ्कुरवर्धनवार्धरं, पदपयोरुहसन्नतभूधरम् ।
भज गुरुं भविलब्धिकलाधरं, स्वतनुधीर(रि)मतर्जितभूधरम् ॥२२॥
पापं तमो याति दिगन्तरं[?], तपःप्रतापांशुमिहेक्ष्य यस्य ।
स्फुरत्सना द्वादशभेददीधितिं(?), नमामि तं श्रीगुरु**लब्धिचन्द्रम्** ॥२३॥

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

जय त्वं व्रतिनामीश!, जगद्धितपतो(ते?)ऽनिशम् ।
संव्रतपापकृत्यायः, सन्ति यथा ग्रहालयः ॥२४॥
चरणं त्राणमब्जाभं, भवान्धौ पततां भवेत् ।
भगवद्! बुधकृत्सेव!, भजेऽहं जनशंभव! ॥२५॥
एकाधारं भवन्नाम, मर्त्यानां भुवि साम्प्रतम् ।
मनीषादन्तृषादाप्तं, मया रत्नमिवो(वा?)द्धुतम् ॥२६॥
इत्यादिकृतस्तवनैः, श्रीवन्द्यैर्लब्धशश्वदानन्दैः ।
सुरसेवितपदकमलै-र्वादिद्विपनिकरसिंहतुलैः ॥२७॥
मामकहस्तसरोरुह-निर्मलकेलिकरमधुकरीतुल्या ।
मद्धृदयामृतवल्ली-चित्ररसविवृद्धिजलमाला ॥२८॥
स्वशरीरपरिकराणां, तथासुखोदन्तसूचिका रम्या ।
प्रेष्या प्रसादपत्री, श्रीगुरुपादैश्च हर्षभरैः ॥२९॥
किञ्चाऽस्माकं ज्ञेया, सन्नतिरुपवैणवं भवत्पादैः ।
क्वाऽस्ति चतुर्मासान्ते, विहार(रं) कर्तुं च वञ्चित्तम् ॥३०॥
श्रीपूज्याचार्याणां, ज्ञायन्त उदन्तकाश्च युष्माभिः ।
**सूर्यपुर**सामि(मी)प्यात्, प्रयोजनं नो न लिप्यातः (?) ॥३१॥
अन्य उदन्ताः केचिद्, ज्ञेया लोकोक्तिलेखतो वन्द्यैः ।
श्रीमत्पण्डितपत्रा-ज्ज्ञेयाः केचिच्च वृत्तान्ताः ॥३२॥
वलमानो लेखो मम, हृन्मोदकृते प्रसादितव्यश्च ।
ज्ञेया नतिरनुपूर्वा, विबुधश्री**रूपचन्द्रा**णाम् ॥३३॥
तत्र श्री**रविचन्द्रा**णां, गणिनां शुक्लधीमताम् ।
गणिश्री**लालचन्द्रा**णां, विजितानेकवादिनाम् ॥३४॥
गणिश्री**रायचन्द्रा**णां, स्ववागुरञ्जितदेहिनाम् ।
गणि**कल्याणचन्द्रा**णां, तनुभाजिद्विवस्वताम् ॥३५॥
मुनि**लावण्यचन्द्रा**णा-मनन्तगुणधारिणाम् ।
**अमीचन्द्र**मुनीनां च, मुनौ सद्भक्तिकारिणाम् ॥३६॥
साध्वीश्री**गुणलक्ष्मी**णां, सदृशीनां च सीतया ।
साध्वीश्री**भावलक्ष्मी**णां, पवित्राणां च चेतसा ॥३७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इत्यादिमुनिसिंहानां, श्रीतातपदसेविनाम् ।
ज्ञाप्या प्रणतिरस्माकं, यथार्हं नरकुञ्जरैः ॥३८॥
**श्रीचन्द्रस्य गणे**रत्र, **पूर्णचन्द्रगणे**रपि ।
मुनेश्च **नयचन्द्रस्य**, **सुन्दरेन्दु**मुनेस्तथा ॥३९॥
**सुधीचन्द्र**मुनेश्चाऽपि, **लक्ष्मचन्द्र**मुनेरथ ।
ज्ञाप्या यथार्हमन्येषां, ज्ञेया नतिस्त्रिसायकम् ॥४०॥
ज्ञाप्या विशेषवृत्तान्ताः, पुराणा अपुराणकाः ।
श्रीगणाधीशपादानां, श्रुताः केचिद् भवन्ति चेत् ॥४१॥
**त्रिविक्रम**कृता **चम्पू**-रधुनाऽधीयते मया ।
अत्र शिशूचितं कृत्यं, प्रसाद्यं साधुपुङ्गवैः ॥४२॥
सागारिणामिहस्थानां, नतिर्ज्ञेया विशेषतः ।
पत्तने गृहिणां ज्ञाप्या, वृषाशिस्तत्र मामकी ॥४३॥
यत्किञ्चिल्लिखितं क्षूणं, मयेह मन्दबुद्धिना ।
क्षन्तव्यं तच्च सर्वस्वं, वन्द्यपादैः कृपापरैः ॥४४॥
श्रीसार्वनतिवेलायां, स्मर्तव्योऽहं शिशुर्मुदा ।
आश्विनपौर्णमास्यां तु, पूर्णेन्दाविति मङ्गलम् ॥४५॥

इति श्रीगुरुलेखः ॥

लेखकपाठकयोः कल्याणं भवतु श्रीशङ्खेश्वरपार्श्व-
नाथप्रसादात् ॥ इति मङ्गलम् ॥

—x—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ३३ )

# कोविदवरेण्य-श्रीपुण्यधीरजिन्मुनिवरान् प्रति श्रीजयकीर्तिमुनिलिखितं पलाशम्

स्वस्तिश्रीविलसन्महामणिकलधौतकलितपादपीठतलदीधितिसमवायाविच्छिन्नालङ्कारहारिसंहननराजनिकरोपासितानि विघटितघनपापसन्तापसमवायसपरिधायफलोदयसदिन्द्रनागेन्द्रयोगीन्द्रवृन्दस्तुतानि श्रीम**द्वामेय**जिनचरणकमलानि मानसकासारे निधाय पञ्चमं प्रीतिपात्रं पत्रं लिख्यते ।

नानाप्रशस्तगभस्तिविशिष्टहीरकगैरिकादिसमवायाविच्छिन्नावनिप्रदेशे **श्रीमत्कच्छ**विषये कान्तितिरस्कृतान्धतमसानेकरुचिरतरमणिमुक्तामुक्ताङ्गनागरिकवधूगतिविलासचलच्चरणचलच्चित्ताभीकेऽनेकाश्चर्ययुक्ते **श्रीमण्डवीबिन्दरे** स्थितान् निबिडवर्णाज्ञमतितिमिरतिमिरारीन् निखिलवादीन्द्रवृन्दमातङ्गदलनमहानादसमोपमान् **श्रीमत्पुण्यधीरजि**न्मुनीन् प्रति **श्रीमद्विक्रमपुर**स्थायि**जयकीर्तिमुनिः** सादरं सहर्षं नमस्करीकरीति ।

कुशलव्यूहमिह वरीवृतीति श्रीमत्पार्श्वदेवकृपाकटाक्षात् । तस्मादेवाऽत्रभवतो भवतो तदेव सततं भवतु । अन्यच्च- युष्मत्कृताक्षरविन्यासं सत्समाचारपूर्णं सुवर्णव(प?)र्णमेकमत्राऽऽगतम् । तद्वाचनेन मन्मानस आनन्दथुरभूत् ।

अन्यच्च- श्रीमद्भिर्भवद्भिः पलाशं सम्यक् कृतम् । परं मन्मनः क्वचन प्रयोगे संशेते । तथाहि- भवद्भिः माहं माहं इति णमन्तं नत्वा इति क्त्वान्तं च पदं प्रयुक्तम् । तत् समानकर्तृकक्रियापदप्रयोगाभावादनुपपन्नम् । समानकर्तृकक्रियापदप्रयोग एव पूर्वकाले तद्विधानात् । तथा श्रीआदिनाथप्रभुं इत्यत्र सन्ध्यकरणमप्यनुचितम् । न च विवक्षित एव सन्धिः स्यादिति वाच्यम् । विवक्षा हि वाक्ये । समासे तु सन्धेर्विवक्षाया अनपेक्षकत्वात् 'नित्या समासे' इति प्रागुक्तेः । अत्र हि समासः । किञ्च- सर्वत्र सन्धेरनित्यत्वे 'ओदन्तोधौवेता' वित्यादेरानर्थक्यापत्तिः स्यात् । तथा- 'अनेकनीवृदागतवणिजात्मजे'त्यत्र वणिक्छब्दस्य चवर्गतृतीयान्तत्वात् कुत्वेन 'वणिगात्मजे'ति भाव्यम् । तथा- 'प्रोद्दामप्रज्ञे'त्यादीन्द्रवज्रायामाद्यतगणभङ्गः । अत्रापि कथञ्चिन्निर्वाहेऽपि दुष्टप्रयोगकरणस्याऽनुचितत्वात् । तथा- 'अहर्दिव'मित्यत्र द्वन्द्वानुपपत्तिः, 'पदार्थतावच्छेदक-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भेदे द्वन्द्व' इति कैश्चिदुक्तत्वात् । तथा- 'फाल्गुनशुक्लषष्ठी-कर्मवाट्यां' इत्यत्र षष्ठीशब्दे पुंवद्भावेन भाव्यमित्यादि प्रतिभाति ।

तदेवंभूतप्रयोगभ्रान्तमनस्कानां स्वमतिदोषेणाऽऽविष्कृतपरमतिदूषणानामस्माकं चापलमविगणय्य स्वमतिविलासेनोत्तरं प्रैष्यम् । अन्यच्च- कुमतिकुमुदखण्डन-प्रचण्डमार्त्तण्डोपम-सकलामलवेदवेदान्तसिद्धान्तादिविद्याऽवारपारतरण्ड-श्रीमद्-**व्यासकुलोत्तंस-श्रीमन्नन्दलालजितः किरातार्जुनीयमहाकाव्यस्य** पञ्चदश सर्गा अधीताः । अधुना मया**ऽभिधानचिन्तामणि**र्विलोक्यते । श्रीमतां भवतां स्मरण-महोरात्रे चरीकरीम्यहम् । भवद्भिरपि मदुपरि कृपा सुरक्षणीया । अत्रोचितमनुष्ठानं किञ्चिल्लेखनीयम् । कृपापर्णमाशु देयम् । चैत्रशुक्लसप्तम्यामलेखि पर्णम् ॥ सद्गम्भीरार्थासमापारजैनशास्त्रादिविद्यापारीणजगत्सकलकोविदोत्तमाङ्गकिरीट**श्रीक्षमा-कल्याणजिते** वन्दना मम निवेदनीया ॥

पं. **श्रीमद्वीरचन्द्रेभ्यो** नतिर्निवेदनीया । पं. **श्रीखुस्यालचंदजी पं. पुन्यधीरमुनिसुं पं. विनैहेमरी** वंदना घणी कृपा राखज्यो । याद करता रहज्यो । **वा.** श्रीश्रीश्री**अमृतधर्मजीगणिसु विजारी जीवराजरी** वंदना । बहु कृपा रक्षणीया ॥

—x—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ( ३४ )

# मधूकपुरस्थ-भ. महीचन्द्र-मेरुचन्द्रान् प्रति
# पूषनूपुरतः श्रीउदयविजयस्य लेखः

स्वस्ति सासार-मसारसंसाराकूपारपारप्राप्त-माप्तोपदेशदेशकमावेश-वद्वादिवाग्वारिवाहवातव्रात-मनुतीव्रव्रतव्रजजिताजर्जरकर्माण-मृतममृतनिर्यास-वासमूर्तिमन्त-मनन्तराय-मनन्तरायज्ञानविज्ञातविश्वविश्व-मुपविश्वसत्-श्वासिचित्तचित्तवृत्ति पुण्यवैवर्तदृष्ट-मदृष्टगुणगणोदन्वदन्तमुदं तन्वन्तमतिमतिपति-शयाम्नातायति-मायतयशस-मनृशंस-मसंशयशयशयितसिद्धिसुखमुषसि **आश्वसेन्यं** सेनान्यं यतिसेनाया मूर्ध्ना प्रणंनम्य सम्यक् श्रीमति तत्रभवद्भवत्पाद-पङ्केरुहरजःपावितभुवि शुभविभौ रामराज्य इव सलक्ष्मणे कलाकेलाविव रतियुक्ते वामदेव इव समहिमनि ब्रह्मणीव चतुराननेन स्तुते **श्रीमधूकपुरे** महीवत् सर्वसहानां मेरुवद् धैर्यजुषां सर्वशास्त्रकषाश्मनि मृष्ट-शिष्टबुद्धीनां भ० श्री ५ श्री **महीचन्द्र-मेरुचन्द्र**पादपाथोजन्मनां **श्रीपूषनूपुरात्** अवनतोर्ध्वकाय **उदयविजयः** सबहुमानं सोल्लासं सोत्कण्ठं सहर्षं अनामयम(मा)रोग्यवार्तया विज्ञपयति, यथाकृत्यं चाऽत्र श्रेयः, श्रेयःश्रेणयः समेधन्ते एधन्ते च भवतां सुगृहीतनाम्नां नामग्रहणपुरस्सराणि सुखानि, अनुभूयन्ते चाऽस्माभिर्नित्यं विदुःखानां विदुषां गोष्ठीः साध्यन्ते च व्रतकर्माणि, संगच्छते च भवतां दर्शनमृते सर्वमपि सुखमित्यलमतिपल्लवनेन। श्रीमद्भिरङ्गारोग्यादिवावदूकं वाचिकं प्रसादनीयम् आसादनीयं च कालान्तरे मिलनमिति संभाव्यते । तत्त्वं तु तत्त्वविदो विदन्ति । सार्वप्रणामावसरे स्मारणीयोऽहमिति श्वोवसीयम् । प्रथमज्येष्ठमासि बहुलपञ्चमीकर्मवाट्यामजायता-ऽऽनन्दः ॥

* * *

सूरि**र्विजयसेना**ह्वो, रत्नसानुर्नवोऽभवत् ।
निर्मथ्य यः पयोराशिं, यशोलक्ष्मीं ललौ स्वयम् ॥१॥

नन्दतान्**नन्दि**हनूमान्, **हीर**रामानुसृष्टिकृत् ।
**सागरा**न्तर्गतां **पञ्च-ग्रन्थी**लङ्कामुवोष यः ॥२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**सर्वज्ञशतक**च्छद्म-विषं सिन्धुसमुद्भवम् ।
यः क्षणात् फल्गुतां निन्ये, स जीयात् **सोमशेखरः** ॥३॥
अजनिष्ट **कमासूनुः**, चक्रभृत्सगरोऽपरः ।
यः सागरं बहिश्चक्रे, जम्बूद्वीपात् **तपागणात्** ॥४॥
**राम**विज्ञद्वयीं मन्ये, सीरिशार्ङ्गिद्वयीमिह ।
न्यवेशि वार्द्धिमुत्सार्य, **हीरा**ज्ञाद्वारिका ययोः ॥५॥

इत्याद्यष्टकं उ० मुनिविमलकृतमस्ति ॥

श्रीसिद्धार्थकुलाम्बरदिनकर, कीर्तिपराजितसुन्दरसितकर,
हितकरकामकरीर तु...जय जय... हित० ॥१॥
अव्ययपदसुखसन्ततिकारण, वृजिनानोकहनाशनवारण,
वारणपतिगतिवीर तु...जय जय... वार० ॥२॥
विहितोपशमपयोनिधिमज्जन, स्मितविस्मापितसकलजगज्जन,
सज्जनजनवनकीर तु...जय जय... सज्ज० ॥३॥
हेलानिर्जितदुर्जनतमयम, शासनवासितवरवाचंयम,
संयमतरुघननीर तु...जय जय... संय० ॥४॥
कमलपलाशसुकोमलकाय, जननमहागतदेवनिकाय,
कायाऽवनसुपटीर तु...जय जय... काया० ॥५॥
श्रीत्रिशलाङ्गजसामजभासुर, गुणगणरञ्जितसकलसुरासुर,
सुरवरभूधरधीर तु...जय जय... सुर० ॥६॥
कण्ठनिवेशितचम्पकमाल, कविकोकिलकुलसरसरसाल,
सालभुजालशरीर तु...जय जय... साल० ॥७॥
कारितजनसुकृतार्जनहेव, गौतमादिगणधरकृतसेव,
सेवकवत्सलवीर तु...जय जय... सेव० ॥८॥
इत्थं स्तुतश्चरमतीर्थपतिः प्रकामं, कामाङ्कुशद्युतिविरञ्जितजीवलोकः ।
सूरीशितु**र्विजयदेव**गणाधिभर्तुः, सेवाविनीतमतिकस्य जयश्रिये स्तात् ॥९॥
इति स्तवः ॥

—x—

मुनिश्रीधुरन्धरविजयजी-सङ्ग्रहगत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ( ३५ )
## श्रीरत्नविजयमुनिवरं प्रति
## जयपुरसङ्घस्य पत्रम्[१]

अर्हं नमः –

श्रीमत्पार्श्वजिनेन्द्रपादकमलध्यानैकतानाः सदा,
श्रेष्ठध्यानयुगेऽतिरक्तहृदयाः षट्कायिकानां दया ।
जीवानां च विधायका निखिलसार्वज्ञाऽऽगमाऽभ्यासिनो,
व्याख्यानामृतवर्षणेन नितरां धर्माङ्कुरोत्पादकाः ॥१॥
सत्सिद्धान्तविचारदक्षमतयो दीनोद्दिधीर्षायुताः
पाखण्डद्रुमदाहनेऽग्निसदृशाः श्रीसङ्घसम्पूजिताः ।
अद्य श्रीशुभमूर्तिरत्नविजयाख्याना विराजन्ति ये,
तत्पादाब्जयुगेऽस्तु सङ्घजनतामूर्ध्ना सदा वन्दना ॥२॥

सकल**जयपुर**स्थश्रीसङ्घैर्विज्ञप्तिर्विधीयते–

स्वामिन्! धन्या सा वसुधा यत्रत्यजनाः श्रीमच्चरणारविन्दसेवानुरता अहर्निशमधुना स्वामिमुखनिःसृतधर्मोपदेशवचनामृतलहरिसम्पर्कात् स्वकीयहृद्गताज्ञानताजनितसन्तापं दूरीकुर्वते ।

स्वामिंस्तदेवाऽहर्वयमप्यतिसमीचीनं मनिष्यामहे, यस्मिंश्च श्रीमच्चरणाम्भोजरजोऽस्मदुत्तमाङ्गे पतिष्यति । तदैवास्योत्तमाङ्गं नाम सफलीभविष्यति ।

स्वामिन्नस्मान् जयपुरस्थान् पावयितुकामैः श्रीमद्भिर्यदाऽत्राऽऽगमनं विहितं तदा चाऽस्माभिरेवं विचारितम् 'अहो ! अतिधन्या वयं येषां कालत्रितयस्याऽपि पुण्यवत्तैव सूच्यते मुनिराजागमनेन' । तथा चोक्तम्–

हरत्यघं सम्प्रति हेतुरेष्यतः, शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं, व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥१॥

एवं हि पुण्यवत्त्वे सिद्धे तस्य च पापविघटनोत्तरजायमानत्वेन भवच्चरणारविन्ददर्शनप्रतिबन्धकीभूतपापस्येदानीमभावात् प्रतिबन्धकाभावस्य कार्यमात्रजनक–

१. पत्रमिदं सचित्रमस्ति ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

त्वाद् भवद्दर्शनमस्माकमवश्यं भविष्यत्येवेति निश्चयेनोत्कण्ठा सर्वेषां वर्तते ।

श्रीमद्**रत्नविजयमुनि**-चरणसरोजावलोकनं सततम् ।
**जयनगर**स्थजनानां, शुभोदयं सर्वदा दिशतु ॥१॥

स्वस्तिश्रीमत्समस्तसजातीयसाधर्मिकभ्रातृभ्यः, परमचारित्रधारकेभ्यः प्रत्यहं सामायिकाद्यावश्यककरणशीलेभ्यः **शुभनगर**निवासिश्रीसङ्घजनेभ्यः इतो **जयपत्तनात्** सकलश्रीसङ्घजनसमुदायैः प्रेमतो विहिताः प्रणामाः सन्तुतरामत्र कुशलं तत्राऽस्तु । भ्रातरो भवन्तोऽतिधन्या येषामिदानीमेतन्मुनिराजचरणसरोजे भक्तिभरो वर्द्धते तेषां कियान् शुभोदयो वर्ण्यते ?

**दाधीच**द्विजवंशज-**नानूलाला**भिधेन विदुषा वै ।
पत्रं निर्मितमेतद्, भवतु मुदे सर्वसङ्घस्य ॥१॥ आर्याछन्दः ॥

**लछमीपत-घनपतसींघ-छत्रसींघ-गनपतसींघ-नरपतसींघ**की वंदना त्रीकाल-त्रीकाल समय-समय वंचावसी । आप पुज्य हो, ग्यानी हो, **गुवालेरमे** वीराजमान हो, हम लोगके उपर कृपा करके दरसन दीलावजो । छमछरी समंधी खामना खमाते है, सो खामजो । स्रावक-स्रावकनी धरमधुरनधर साधरमी भाइयांने प्रानाम होजो ।

[आथी आगल नव जणना हस्ताक्षरमां वन्दना जणावी छे ।]

—x—

श्रीप्रेमलभाई,
वालकेश्वर - मुंबई

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ३६ )

# श्रीविजयदानसूरिं प्रति प्रेषितं विज्ञप्तिपत्रम्
# (त्रुटितम्)

[....]

त्यक्तारं गमिता सरित् सुमनसामर्तिं हृदा बिभ्रती,
पूत्कर्तुं परिसर्पतीव सविधे पाथोनिधेः प्रेयसः ॥२०॥
त्वद्वागस्खलितप्रवाहमहिमोत्कर्षाभिलाषोत्सुकी-
भूतस्वान्ततयाऽनगार! जगतीराजीविनीवल्लभ! ।
प्रालेयाचलतुङ्गशृङ्गशिरसः सम्पातदम्भादसौ,
झम्पां द्वीपवती दिवो वसुमतीपीठे प्रदत्ते किमु ॥२१॥
यस्याऽश्रान्तनिरी(रि)त्वरप्रसृमरव्याहारविस्फूर्जितैः,
स्वस्सत्सिन्धुरदभ्रविभ्रमभरैर्धिक्कारतां लम्भिता ।
मज्जद्दिग्गजराजराजिविलुलत्कल्लोलकोलाहलै-
रूहे शेषहरिन्महेन्द्रपुरतो दुःखं व्यनक्त्यात्मनः ॥२२॥
देव! त्वद्वचनामृताम्बुधिलुलत्कल्लोललीलायित-
प्राप्तावुत्तरलीभविष्णुहृदयं जह्नोर्दधाना कनी ।
वप्तः स्वस्य महाग्रहग्रहवतीवाऽऽदाय पादाम्बुजं,
प्राञ्चद्वीचिचयक्वणेन रुदती मन्ये मुहुर्याचते ॥२३॥
संस्पर्द्धिष्णुतयाऽनिशं स्वविभवैर्वाचां विलासान् विभो-
र्हन्तुं स्वं कियदेतिकां विदधतो व्यालोक्य शङ्काकुलाः ।
नश्यन्तो न दिशोदिशं किमगमन्नोघा भवन्तः पृथक्(ग्),
जाह्नव्या भवनेन चेदितरथा ते स्युः सहस्रं कुतः ॥२४॥
वातान्दोलितसर्वतोमुखमहापीयूषकर्षुप्रिय-
प्रेङ्खत्तुङ्गतरङ्गपुञ्जसहजैर्यद्वाग्विलासैर्नवैः ।
नीता न्यत्कृतिपद्धतिं दिगधिपप्रत्यक्षमृक्षाध्वनः,
सिन्धुर्व्रीडवशंवदोत्समभवज्जानीमहे निम्नगा ॥२५॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

संहर्षेण विभूषया कृतरुषो यद्वाग्(क्)तरङ्गव्रजा-
न्निर्वर्ण्य प्रतिकर्तुमीश्वरतया न स्वेन मन्दाकिनी ।
सिद्धान् सिद्धिकृतः प्रतीपहतये किं कुर्वती गोचरं,
भक्तेः सिद्धधुनी तदादि भुवने तत्सञ्ज्ञया पप्रथे ॥२६॥
सापत्न्यात् शिवया च धूर्जटिजटाजूटाटवीसंस्थिते-
र्भूमौ भूधरसार्वभौमशिरसः स्वस्याऽवरोहात् पुनः ।
और्वास्ये विनिवेशनाच्च लवणीकृत्याऽम्बुधेः स्वर्धुनी-
त्युद्वेगादपविघ्नवाग्विभवतां विद्मो विभोर्भेजुषी ॥२७॥
इत्यादिगुणसमुद्रै-र्वदनाम्बुजवैभवाधरितचन्द्रैः ।
प्रणमज्जनकृतभद्रैः, पदकजभृङ्गायमानेन्द्रैः ॥२८॥
**तातपादैः** प्रसाद्या स्व-शिशोः प्रीतिं वितन्वती ।
पूर्णा प्रभावमणिभि-र्निधिकुञ्जी(म्भी)व पत्रिका ॥२९॥

शिशोस्त्रिसायं प्रणतिरवधारणीया । तत्रत्यसकलभट्टारकपुरन्दरभट्टारक-प्रभुश्रीश्रीश्री **हीरविजय**सूरीश्वर, पं. **लाभविजय**गणि, पं. **धनविजय**गणि, पं. **भानुविजय**गणि, पं. **कीर्त्तिविजय**गणिप्रमुखाणां यथार्हं नत्यनुनती प्राभृती-कर्त्तव्या(व्ये) । अत्यत्र ग. **लड्डू**, ग. **कीर्त्तिवर्धन**, मु. **दयाविमल**, मु. **हंसविमला**दीनां प्रणतिरवधारणीयेति ॥

—x—

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर
सूरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ३७ )

# श्रीहीरविजयसूरिं प्रति

## श्रीविजयसेनसूरिभिः प्रेषितं विज्ञप्तिपत्रम् (त्रुटितम्)

[....]
तदपि मोहकरं न महात्मनां, त्वमसि यस्य विवर्धनतत्परः ॥६५॥
गुणगणस्तव यद्गणनातिगः, समगमज्जगतीपरतोऽप्यसौ ।
त्वयि तथाऽपि गुणस्थितिरद्भुता, तदतिमानवमानसमोहकृत् ॥६६॥
तव विधानविधौ खलु योऽभव-द्विधिरनन्तगुणस्मृतिकृद्विधेः ।
पुनरुपैति कथञ्चन नाऽप्यसौ, यदि समेति शुभः समयोऽप्यसौ ॥६७॥
कलिरपि प्रसरत्कलिकेलिभृत्, कमलयाऽमलया कलितः सदा ।
कवलितो भवता भवतो भवेत्, सुखमखण्डितमत्र कुतोऽन्यथा ॥६८॥
तव विधाय विधिर्वपुरुत्तमं, पुनरपीश! तथा यतते ततः ।
विहितवानयमिन्दुमुखान् परं, तव कलाऽपि न तेषु कदाऽप्यभूत् ॥६९॥
विहितवाँस्तव देव! विधिर्वपुः, पुनरयं न तथा यतते यते! ।
तव कुतोऽपि कदाऽपि यतः कला, जगति नैव जनेऽजनि जातुचित् ॥७०॥
शशिनमेककलङ्क[क]लङ्कितं, तरणिमप्यतितापतिरस्कृतम् ।
मणिमपीश! दृषन्मयमुत्तमं, जलधिमप्यतिशायिजलालयम् ॥७१॥
विहितवान् विधिरेष पराङ्मुखः, सततमेव सतां शुभसम्पदः ।
स्मृतिमगात्किमु नैव भवान् परं, त्वयि न दोषलवोऽपि यतोऽभवत् ॥७२॥
[युग्मम्]

गणपतेऽगणनीयगुणास्तव, प्रसरमापुरिमे जगतीतले ।
मतमनेन न यौगिकमुन्नतिं, व्रजति यद् गुणिनोऽपि विना गुणाः ॥७३॥
न रमणी रमणीयगुणाम्बुधे-र्मनसि यस्य सदाऽपि समाविशत् ।
स जयताज्जयताज्जगतीतले, सुगुरुशेखर एष सुखाश्रयः ॥७४॥
अमितमानवमानवदायिनं, मतिमतामतिमोहतमोऽपहम् ।
नमत नाकिनरेशनतक्रमं, क्रमगतागमगौरवकारणम् ॥७५॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

त्वमेवाऽसि जगन्नाथ! जगज्ज्येष्ठ! गुणैर्गुरुः ।
गुरुताऽपि प्रमाणं ते, यस्यां नामाऽपि नाऽन्यजम् ॥७६॥

त्वमेवाऽसि जगत्त्राता, त्वमेवाऽसि जगद्गुरुः ।
जगद्बन्धुस्त्वमेवाऽसि, परमानन्दमन्दिरम् ॥७७॥

इत्यनेकगुणग्राम-रमणीयरमास्पृशाम् ।
दत्तानेकनरश्रीणां, श्रीतातानां ततौजसाम् ॥७८॥

लेखो लेख इवाऽत्यन्तं, मनः प्रामूमुदत्तमाम् ।
शैशवं तदुदन्तोऽपि, शिशुमानसमाविशत् ॥७९॥ [युग्मम्]

पुनरप्यनन्तपुण्याढ्यैः, सदाढ्यैर्वपुषः सदा ।
प्रसादनीया पत्र्येका, श्रीतातैः सुखसूचिका ॥८०॥

अत्र च परिसरे -

**वानरर्षी**ति नामानो, विबुधा **उसमापुरे** ।
**पुरे राजधना**ह्वाने, विद्वद्वि**नयसुन्दराः** ॥८१॥

मुख्येऽस्मिन् **राजनगरे, ज्ञानविमल**पण्डिताः ।
पुरे **कुमरगिर्या**ख्ये, विद्वद्वि**जयसागराः** ॥८२॥

**वटपल्ली**पुरे तस्थुः, **पद्मविजय**पण्डिताः ।
**मुनिविजय**विद्वांसो, नगरे **विश्वला**भिधे ॥८३॥

**कृष्णर्षि**गणिविद्वांसः, पुरे **सिद्धपुरा**भिधे ।
**महीशानपुरे** तस्थुः, **श्रीवन्तमुनि**पण्डिताः ॥८४॥

**कीर्त्तिसारे**ति विद्वांसो, **विद्यापुर**पुरस्थिताः ।
**शुभविजय**नामानः, **कट्यां** पाण्डित्यभाजिनः ॥८५॥

एवं ये यत्र विद्वांसो, गणयोऽपि गुणस्थिताः ।
चतुर्मासीं समासीना-स्ते तत्र सुखसंश्रिताः ॥७६॥

निर्विघ्नविहितानेक-पर्वकृत्यकदम्बकाः ।
सन्ति श्रीतातसेवाया-मासक्तमनसः सदा ॥८७॥

भून्यस्तमस्तकस्याऽथ, शिशोः सन्ध्यात्रयेऽपि च ।
श्रीतातैः प्रणतिः पूर्व-मवधार्या यशोधनैः ॥८८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथ तत्र -

श्रीतातचरणाम्भोज-भक्त्यासक्तसुचेतसः ।
नाम्ना **विमलहर्षा**ह्वाः, श्रीवाचकपदाङ्किताः ॥८९॥
**सोमविजय**नामानः, पण्डिताः पुण्यपूरिताः ।
नाम्ना **कनकविजयाः**, गणयो गुणसंश्रिताः ॥९०॥
**लाभविजय**नामानो, गणयोऽगण्यगौरवाः ।
**धनविजय**नामानो गणयः, पूज्यपूजकाः ॥९१॥
गणयो **रामविजया**, **भानुविजय**सञ्ज्ञकाः ।
**गुणविजया**ख्यगणयः, **सूरर्षि**गणयोऽपि च ॥९२॥
गणिश्च **कीर्त्तिविजयो**, **गोविन्दगणि**रित्यपि ।
वृद्धश्च **शुभविजयो**, **हेमादिविजय**स्तथा ॥९३॥
एतेऽन्येऽपि च मुनयः, श्रीतातक्रमसेविनः ।
ज्ञाताज्ञातप्रकारेण, द्विधाऽपि शुभचेतसः ॥९४॥
प्रसाद्याऽनुनतिस्तेषां, मदीया सकलश्रियाम् ।
यतीनां यतिनीनां च, नामग्राहं विशेषतः ॥९५॥

(अपूर्णं त्रुटितं चेदं पत्रमवासम् ।)

—x—

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर
सूरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ( ३८ )

# श्रीविजयसेनसूरिं प्रति प्रेषितं विज्ञप्तिपत्रम्
## (त्रुटितम्)

यद्यशःक्षीरपाथोधौ, कान्तिकल्लोलमालिनि ।
लोकनालिः समग्राऽपि, नौरिवाऽऽभाति मध्यगा ॥७४॥
सर्वतः परिवर्द्धिष्णौ, यद्यशःक्षीरनीरधौ ।
तारकाः पृषतायन्ते, फेनपिण्डायते विधुः ॥७५॥
भ्रमराञ्जनसंकाशं, यद्यशःक्षीरसागरे ।
अम्बरं चन्द्रम(मा)श्शुभ्रो(भ्रः), शेवालवल्लरीयते ॥७६॥
मनः पवित्रं च वचः पवित्रं, वपुः पवित्रं च जनुः पवित्रम् ।
वयः पवित्रं च यशः पवित्रं, येषामपि न्यक्षमहो! पवित्रम् ॥७७॥
अनुत्तरं ज्ञानमनुत्तरं तपो-ऽप्यनुत्तरध्यानमनुत्तरं यशः ।
अनुत्तरं दर्शनमप्यनुत्तरं, शीलं च येषां धृतिरप्यनुत्तरा ॥७८॥
क्रीडाऽनन्तनिभेन वेश्मनि बलेः क्रीड क्षमामण्डले,
कैलासाख्यमहाशिलोच्चयमिषादानन्दयन्ती जनान् ।
क्रीड स्वर्गिनिकेतने सुरगजव्याजादपीत्थं शुचि-
र्यत्कीर्तिः परकीर्तिखण्डनपरा चिक्रीड विश्वत्रये ॥७९॥
सदा सरस्वती वक्त्रे, करणे चरणेन्दिरा ।
येषां कुपितयोषेव, कीर्तिर्भ्रमति दूरतः ॥८०॥
त्रिष्वपि विश्वविश्वेषु, सञ्चरन्ती निजेच्छया ।
कीर्तिमन्दाकिनी येषां, निर्मलीकुरुतेऽखिलम् ॥८१॥
ग्रामोऽत्र कस्याऽपि पुरी परस्य, कस्याऽपि देशो भरतं परस्य ।
येषां तु शुभ्रेण यशोभरेण, विश्वत्रयी व्यापि समन्ततोऽपि ॥८२॥
यशांसि येषां सुरभीणि शार-दीनाभ्रशुभ्राणि मनोहराणि ।
महासुमानीव सुराङ्गनानां, स्वर्गेऽपि कर्णाभरणीकरोति ॥८३॥
येषां यशोऽहर्निशमेव देव ! सीमन्तिनीभिः सुरलोकमध्ये ।
सङ्गीयतेऽधोऽसुरवर्णिनीभिः, सत्किन्नरीभिर्गिरिकन्दरेषु ॥८४॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

विस्तीर्णकर्णाञ्जलिभिर्यदीयकं, निपीयते तृप्तिविवर्जितैर्यशः ।
सुधामनादृत्य सुधाशनाधिपैः, स्वाद्येषु हृद्यामपि सर्वदैव ताम् ॥८५॥
निशाकरकरक्षीर-नीराकरजलोज्ज्वलम् ।
कर्पूरपूरसुरभि, यशो येषां विजृम्भते ॥८६॥
**श्रीतातपादै**रपि पूज्यपादैः, प्रसादमाधाय कृपां विधाय ।
स्वकीयशिष्योपरि तैः सुवित्तै-रगण्यकारुण्यपरीतचित्तैः ॥८७॥
स्वशरीरपरीवारा-रोग्यादिसुखसूचिका ।
तथा **पर्युषणापर्व**-निर्विघ्नोदन्तदेशिका ॥८८॥
हितशिक्षाप्रसादादि-समाचारमनोरमा ।
प्रसादपत्रिका मेघ-मालेव स्फूर्तिमालिनी ॥८९॥
प्रसादनीया त्वरितं, सर्वत्राऽऽनन्दकारिणी ।
शिशोः शिखण्डिनो हर्ष-प्रकर्षोत्पत्तिहेतवे ॥९०॥
अथाऽवधार्या प्रणतिस्त्रिसन्ध्यं, शिशोर्विशेषान्नतमस्तकस्य ।
प्रसादनीया च निजांह्रिपद्म-मधुव्रतानां मुनिसत्तमानाम् ॥९१॥
निजवचनचातुरीभिः, प्रसन्निता यैः सदा परमगुरवः ।
तेषां वाचकपुङ्गव-श्रीवाचक**वि[मल?]हर्षा**णाम् ॥९२॥
आनन्दितजनतानां, षड्भाषालक्षणेषु दक्षाणाम् ।
वाचकततिमुख्यानां, श्रीवाचक**नन्दिविजया**नाम् ॥९३॥
तथा- सर्वत्र शास्त्रविषये, कषपट्टककल्पबुद्धिविभवानाम् ।
आसादितविजयानां, पण्डितवर**लाभविजया**नाम् ॥९४॥
बुध**रङ्गविजय**नाम्नां, गुरोर्मनोरञ्जनेऽतिरक्तानाम् ।
अभिरामगुणगणानां, कोविदवर**रामविजया**नाम् ॥९५॥
निर्मलबुद्धिधराणां, बुधसिंहानां च **सीहविजया**नाम् ।
गणिवर**सधारणा**नां, गुर्वाज्ञाधरणधीराणाम् ॥९६॥
गणिवर**मतिविजया**नां, तथा च गणिमुख्य**तेजविजया**नाम् ।
**गणिशान्तेर्विजया**नां, प्रशान्तगणि**पद्मविजया**नाम् ॥९७॥
गणि**रामविजय**नाम्नां, वरकीर्तीनां च **कीर्तिविजया**नाम् ।
गणि**विनयविजय**नाम्नां, **चन्द्राद् रत्नाच्च विजया**नाम् ॥९८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गणि**धीरविजय**नाम्नां, धर्मपराणां च **धर्मविजया**नाम् ।
ज्ञानाभ्यासरतानां, क्षुल्लानां **कमलविजया**नाम् ॥९९॥
अन्येषामपि नित्यं, यथोचितं वन्दनानुवन्दनया ।
सा शैशवी प्रसाद्या, साधूनां सानुभावानाम् ॥१००॥

अथाऽत्रत्याः-

गणि**हीरविमल**नामा, गणिस्तथा **बुद्धिविमल** इत्याह्वः ।
गणि**रत्नविमल**नामा, मुनिस्तथा **नेमिविमला**ह्वः ॥१०१॥
मुनि**जसविमला**ह्वानो, मुनिस्तथा **मानविमल**नामा च ।
मुनि**हर्षविमल**नामा, तिस्रः साध्व्यश्च वन्दन्ते ॥१०२॥
रम्य**तलोद**ग्रामा-वस्थितबुध**कीर्तिविमल**नामानः ।
**कर्पटवाणिज्य**स्थित-बुध**नयविमला** नमन्त्युच्चैः ॥१०३॥
सकलोऽपि सङ्घलोकः, प्रणमति गुरुपादपादपद्मानि ।
आश्विनशुक्लचतुर्थ्यां, विज्ञप्तिरियं कृता सिद्ध्यै ॥१०४॥

[अस्य पत्रस्य प्रारम्भिकांशस्य छायाकृतिः
(Xerox) अस्माभिर्न संप्राप्ता]

—x—

ला. द. विद्यामन्दिर
अमदावाद
(मुनिश्रीधरन्धरविजयजी द्वारा)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ३९-४० )

## श्रीविजयदेवसूरिं प्रति प्रेषितं

# पं. श्रीलावण्यविजयस्य पत्रद्वयम् (त्रुटितम्)

( १ )

[...] स्वयं,
साकं स्वीयपरिच्छदेन च किमु श्रीनन्दनोऽकारयत् ॥२६॥
यया स्वीयशोभातिरेकेण पुर्या-ऽभिभूता पुरी निर्जराणां भरेण ।
दधाना ततोऽद्वैतदुःखप्रकर्षं, हृदाऽभूतपूर्वं किमु स्वर्जगाम ॥२७॥
विश्वत्रयीनिखिलपत्तननिर्जयिन्या, लक्ष्म्या यया धनदपूर्गमिताऽभिभूतिम् ।
मन्ये न दर्शयितुमास्यमलम्भविष्णु-र्व्रीडावशाद् गतवती रजताद्रिशृङ्गे ॥२८॥
येन स्वैः पुटभेदनेन विभवैर्विश्वत्रयीपत्तन-
श्रेणीमानमलिम्लुचैः परिभवं संप्राप्यमाना भरात् ।
गन्तुं क्वाऽपि न यत्पुरः कथमपि प्राणान् गृहीत्वा प्रभु-
र्लङ्का मध्य इवाऽम्बुधेर्निरपतत् तद्व्रीविहस्ताशया ॥२९॥
त्रिलोकीपुरीगर्वसर्वङ्कषायाः, श्रियं प्राप्तुकामा किमु स्वेन यस्याः ।
किमाकण्ठनीरे प्रविश्याऽम्बुराशे-स्तपस्तीव्रमातन्वतीति स्म लङ्का ॥३०॥
विभीषणो रात्रिचराधिपोऽसौ, निर्विण्णचित्तेति च नायकान्निजान् ।
विहाय तं गुप्ततमं ततः क्षितौ, लङ्का किमेषा वरभर्तृकाम्यया ॥३१॥
यस्येक्षणाच्च वचनश्रवणादभद्रं, भर्ताऽभवद् विधिवशान् मम कौशिकः सः ।
उद्वेगभाक् किमिति नाकपुरी कथञ्चित्, त्यक्त्वा किमागतवती भुवि यन्निभेन ॥३२॥
भूतेशभूधरनभोङ्गणचुम्बिशृङ्गे, तप्त्वा तपो निधिपतेर्नगरी नितान्तम् ।
अद्वैतवैभवमवाप्य पुरीमिषेण, भूमण्डले स्थितवती समुपेत्य मन्ये ॥३३॥
स्वस्सत्पुरीजित्वरवैभवाया, यस्याः श्रियं प्राप्तुमिवेहमाना ।
कैलासभूमीधरतुङ्गशृङ्गे, गत्वा तपस्यत्यलका दिवानिशम् ॥३४॥
तक्ष्णोत्येष निरागसां शमवतां यत्तापसानां तपः,
पत्या पातकिनाऽमुना तदुचितः सङ्गः कथञ्चिन् मम ।
इत्यारेक्य तपस्विनां सुखकरी स्वस्सत्पुरी यन्मिषात्,
सन्त्यज्याऽवततार किं क्षितितले धर्मात्मभिः पूरिते ॥३५॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अरविन्द इवोन्निद्रे, तस्मिंल्लक्ष्मीनिकेतने ।
**श्रीमत्तातपदा**म्भोज-रजःपावितभूतले ॥३६॥

श्रीतातपादवरनामपवित्रमन्त्र-ध्यानावधानजनरञ्जकसन्निधानात् ।
विश्वातिशायिविबुधव्रजराजमानात्, श्रीमत्पुरात् **सदहिमन्न**गराभिधानात् ॥३७॥

सानन्दं विनयावनम्रशिरसि न्यस्य द्वयं हस्तयो-
र्नत्वा शम्भुतनूरुहाम्बकमितावर्त्तप्रणत्या पुनः ।
भक्तिव्यक्तितरङ्गरङ्गितमना निश्शेषशिष्याणुको,
**लावण्याद् विजयः** समुत्सुकतया विज्ञप्तिकां ढौकते ॥३८॥

प्रयोजनं चाऽत्र विभातकाले, विभावसोरंशुविभातकाले ।
सभाजनानां गुणभाजनानां, सभासमक्षं जनरञ्जनानाम् ॥३९॥

श्रीशान्तिकृ**च्छान्तिचरि**त्रवाचनं, वाचंयमारम्भितसूत्रवाचनम् ।
उपासकश्राद्धयुपधानवाहनं, मुमुक्षुयोगोद्वहनं विशेषात् ॥४०॥

ब्रह्माननत्रिदृगपत्यपवित्रनेत्र-मेयव्रतोच्चरणपूर्वकचारुनन्दिः ।
इत्यादिकं सुकृतिनिर्मितपुण्यकृत्यं, प्रावर्तताऽनवरतं ननु जायते च ॥४१॥

अथ परम्परया समुपागते, गणिसुधर्मसुधर्मसुसङ्गते ।
जिनपतिप्रवराननिर्गते सुविधिना विधिना समुपागते ॥४२॥

बहुलसज्जनमानसमोहने, विबुधनिर्मितसन्नियमोहने ।
सुविहिताखिलपर्वमहोत्तमे, प्रवर**वार्षिकपर्व**महोत्तमे ॥४३॥

अनल्पसङ्कल्पसमीहितार्थ-कल्पस्य **कल्पस्य** महोदयस्य ।
नवक्षणैर्दत्तनवक्षणैः श्री-**कल्पाख्यसूत्रस्य** सुवाचनाऽभूत् ॥४४॥

साधर्मिकप्रकरपारणकप्रदा(धा)ना(न)-पुण्यं च चैत्यपरिपाटिकया समेतम् ।
**सूर्यप्रमाणदिनजन्त्वभयाभिधान-दानप्रर्वत्तन**कुकर्मनिवर्त्तने च ॥४५॥

महामहाः सप्तदशप्रकारा, जिनेश्वराणां शिवशर्मकाराः ।
बभूवुरुच्चैश्च जिनालयेषु, विशेषतः स्नात्रमहा महान्तः ॥४६॥

तथाऽर्द्धमासक्षपणाद्यनेक-द्वि-पञ्च-पञ्चा-ऽष्टकसङ्ख्यमुख्याः ।
तपोविशेषा बहवो बभूवुः, पुण्यात्मनां कर्मवनीकुठाराः ॥४७॥

इत्यादिधर्मिजननिर्मितसर्वशर्म-धर्माम्बुधिः सकलसिद्धिमियाय वृद्धिम् ।
श्रीतातपादसफलोदयिनामधेय-ध्यानोत्तमद्विजपतेरुदयप्रसादात् ॥४८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथ गुरुवर्णनम्-

सुधाशनद्वीपवतीतटे तपः, कृत्वा च मुक्त्वा स्वकलङ्कपङ्कम् ।
जग्राह किं रात्रिपतिर्यतीन्दो-र्वाणीसुधाशालिमुखावतारम् ॥४९॥
श्रीसूरिवास्तोष्पतिना स्वकीर्त्ते-र्वलक्षलक्ष्म्याऽमृतवारिराशिम् ।
नीत्वाऽभिभूतिं किमु वाग्विलास-च्छलादुपादायि सुधा तदीया ॥५०॥
रसातले भोगिकुलाकुलीकृते, स्वघातशङ्कां दधती हृदन्तः ।
प्रणश्य निर्विघ्नमुनीन्द्रवक्त्र-कुण्डे सुधा वाङ्मिषतः स्थितेव ॥५१॥
वाणीविधानावसरे व्रतीन्दो-र्जगत्सृजा निर्जरसौधमध्यात् ।
सुधा गृहीता सकला तदादि, सुरा बभूवुः किमु यज्ञभोजिनः ॥५२॥
सारङ्गदृक्सन्ततिकान्तवक्त्र-श्रियाभिभूतत्वसमुत्थदुःखात् ।
त्यक्त्वा क्षयन्तं शशिनं सुधेव, भेजे यदास्यं वचनच्छलेन ॥५३॥
कुमुद्विबोधप्रविधायकस्य, हृदुल्लसद्ध्यानसुधापयोधेः ।
सुधारसः सूरिसुधाकरस्य, वाणीमिषात् किं प्रकटीबभूव ॥५४॥
धात्रा मुनीन्दो! तव वाक्समूहं, प्रकुर्वता तां स्वसुधां गृहीताम् ।
विभाव्य वार्द्धिः पतितो धरित्र्यां, तारस्वरैरारटतीव दुःखम् ॥५५॥
तरङ्गिणीप्राणपतौ स्थितो मां, जनार्दनो मा तुदतात् कदाचित् ।
सुधा विचिन्त्येति विमुच्य वार्द्धिं, वाणीमिषाद् यस्य मुखे किमीयुषी ॥५६॥
मिथ्यात्वरोगं जगतीजनस्य, निहन्तुकामेन मुनीश्वरेण ।
अद्वैतवाणीकपटेन मन्ये, धृता सुधा स्वास्थ्यसुवर्णपात्रे ॥५७॥
अद्वैतमाधुर्यजुषा गुरोर्गिरा, जिगीषितेनाऽधिकसाध्वसोदयात् ।
निजावनायेव सुधारसेन, स्वस्याभितोऽरक्ष्यत चक्रिचक्रम् ॥५८॥
विधित्सता श्रीव्रतिवासवस्य, वाचं विधात्राऽच्छसुधा गृहीता ।
बिम्बान् मृगाङ्कस्य तदादि तस्मिन्, कलङ्कदम्भादिव रन्ध्रमासीत् ॥५९॥
श्रीसूरिराजस्य मुखस्य शोभां, सम्प्राप्य मौनीहृदयेश्वरेण ।
अद्वैतवाणीमिषतः स्वयं पुनः, प्रीतेन जाने स्वसुधोपदीकृता ॥६०॥
विश्वामयान् हन्तुमहं प्रभुश्च, न मत्_क _ पिविधोः क्षयितू(तु)म् ।
तत् तत्क्षयघ्नीं दिश शक्तिमेवं, वक्तुं सुधा यद्वचनं श्रितेव ॥६१॥
श्रीसूरिराजान् निजवाग्विलासै-र्जिगीषतः स्वं भयतः प्रणश्य ।
किं चन्द्रकान्ते [ह्य?]मृतं विवेश, तेभ्यो न चेत् तत् कथमभ्युदेति ॥६२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यदीयवाचं सृजता विधात्रा, ज्ञात्वा स्वकुण्डादमृतं गृहीतम् ।
इतस्ततो भ्राम्यति तद्दिदृक्षया, तदादि तद्भ्रष्टफणिव्रजः किम् ॥६३॥
मुनिमहीरमणेन निजेन वाग्-मधुरिमातिशयेन तिरस्कृता ।
मनसि दुःखभरं दधती सुधा, किमु पपात पयोधिपयःप्लवे ॥६४॥
गाम्भीर्यातिशयैस्त्वया यतिपते! नीत्वा पराभूततां
बन्दीकृत्य च वारिधिं स्वपितरं रेखामिषाद् रक्षितम् ।
चक्षुर्वत्म(र्त्म)गतं विधाय रजनीकान्तेन मन्येऽमृतं
त्वत्तो मोचयितुं कथञ्चिदपि तं वाणीमिषाद् ढौकितम् ॥६५॥
श्रीमत्सूरिसमाजराजविलसद्वाणीविधानक्षणे,
यत्नादम्बुजजन्मना सितरुचेः स्वस्याऽङ्गजस्याऽमृतम् ।
आदत्तं प्रविलोक्य नीरनिधिना गृह्णातु मा मेऽमृतं
मत्वैवं किमु दैत्यजित् स्वसविधे रक्षाकृते रक्षितः ॥६६॥
त्वद्वक्त्रं विदधानमम्बुजभवं वाग्निर्मितिप्रक्रमे,
गृह्णन्तं प्रविभाव्य वारिधिशुभस्थानात् समग्रां सुधाम् ।
गृह्णीतान्मम माऽमृतं स्वमनसीत्यभ्यूह्य तद्भीतितो,
रात्रिप्राणपतिः प्रणश्य गतवान् मन्ये मुरारिक्रमे ॥६७॥
स्वर्गे सत्त्रभुजां करोम्युपकृतिं दर्वीकराणां तथा,
पाताले पृथिवीस्पृशां पुनरहं नैवोपकुर्वे क्वचित् ।
सन्तर्क्येत्युपकर्तुमुत्सुकमना भूमीजनस्याऽन्वहं,
मन्ये साधुविधो! सुधा तव मुखं ब्राह्मीमिषादाश्रिता ॥६८॥
एवं कोविदवृन्दवर्णितवचःकर्पूरपूरोच्छलत्-
सौरभ्यप्रकरप्रसारनिचितब्रह्माण्डभाण्डोदरैः ।
श्रीसूरित्रिदशेश्वरैर्निजवपुःकल्याणवार्त्तापयः-
पूर्णः पत्रपयोधरः शिशुशिखिप्रीत्यै प्रहेयः प्रियः ॥६९॥
स्फूर्जत्कार्त्तिककौमुदीपतिलसत्कीर्त्तिद्युतिद्योतित-
ब्रह्माण्डैः परमेष्ठिपट्टपदवीपाथोजिनीभास्करैः ।
श्रीतातैः प्रहितां हितोक्तितडितां क्रोडीकृतामीहते,
पत्राम्भोधरधोरणीमतिलसद्वर्णां शिशुश्चातकः ॥७०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भोगैकनिर्मोकमकैकहेतुं(?), मन्युं विमुञ्चन्निह हायनोत्थम् ।
इलातलन्यस्तशिराः प्रणामं, करोति वः शिष्यभुजिष्यमुख्यः ॥७१॥

तत्रत्याः-

चातुर्योत्तमवार्द्धिवृद्धिविधवो भट्टारकग्रामणी-
सन्मानोचितचातुरीपरिचिता निस्सीमभाग्योदयाः ।
**सूरिश्रीविजयादिसिंह**मुनिपप्रद्योतना दीप्तिमद्-
वर्याचार्यसुसार्वभौमपदवीं प्राप्ताः परां सम्प्रति ॥७२॥

श्रीजैनशासनसरोवरपुण्डरीकाः, श्रीपूज्यपादचरणाम्बुजचञ्चरीकाः ।
**धन्यानगारसदृशा** गुणिनां पुरोगा-**श्चारित्रपूर्वविजया** वर**वाचकेन्द्राः** ॥७३॥

श्रीसूरिभूरिगुणगानविधानदक्षा, लावण्यपुण्यवपुषः कृतदक्षपक्षाः ।
विश्वे जयन्ति वरवाचकराजहंसा, **लावण्यपूर्वविजयाभिधवाचकेन्द्राः** ॥७४॥

[त्रुटितमपूर्णं चेदं पत्रम्]

—x—

( २ )

स्वस्तिश्रियं तनुमतां तनुतां स शान्ति-र्यन्नासिका परमविभ्रममाबिभर्ति ।
यद्वक्त्रपद्मवसतेः किमु दीपिकेयं, लक्ष्म्या भ्रुवोः कपटतोऽञ्जनमुद्गिरन्ती ॥१॥

गन्धज्ञया श्रीजिनभानुमालिना, नीत्वाऽभिभूतिं किमु कज्जलध्वजाः ।
कामाङ्कुशानां कपटेन बन्दी-कृत्य स्म रक्ष्यन्त पदे स्वकीये ॥२॥

यन्नासिकाया विभवातिरेकं, सम्प्राप्तकामं गृहरत्नमेव ।
स्थाणुस्थयष्टेरुपरीव तिष्ठद्, विनिर्मिमीते स्म तपोऽतितीव्रम् ॥३॥

दशेन्धनत्वं मम तीर्थनाथ!, निवारय त्वं किमिदं विवक्षुः ।
यन्नासिकाकैतवतः समेत्य, निकेतरत्नं कुरुते स्म सेवाम् ॥४॥

जिनेशितुर्नासिकया स्ववैभवै-र्विनिर्जिता मन्दिररत्नराजयः ।
दुःखं दधाना हृदि कज्जलच्छलान्, मुञ्चन्ति किं निःश्वसिताग्निधूमान् ॥५॥

दिनेश्वरस्येव दिवस्पृथिव्योः, प्रकाशशक्तिं मम देव! देहि ।
इतीव वक्तुं स्पृहयन् प्रदीपो, नासामिषाद् यस्य करोत्युपास्तिम् ॥६॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तेजो यथा स्फूर्तिमुपैति नक्तं, मम स्फुरेदह्नि तथा कुरु त्वम् ।
विज्ञीप्सयेतीव निकेतरत्नं, समागतं नक्रमिषाद् यदन्तिके ॥७॥
सर्वत्राऽप्यपकीर्त्तिरञ्जनवपुः प्रादुर्भवत्यन्वहं
तस्मात् तामपमृज्य निर्मलयशो विश्वे विभो! देहि मे ।
इत्थं वक्तुमना निकेतनमणिर्यन्नासिकाकैतवा-
दौत्सुक्यं कलयन् समेत्य भगवद्वक्त्रेऽवतस्थे किमु ? ॥८॥
सान्द्रं तमःसमुदयं प्रणिहन्ति नित्यं, प्रोद्यत्प्रदीपकलिकेव यदीयनासा ।
संसारसागरपतज्जनयानपात्रं, तं शान्तिनाथमनघं प्रणिपत्य भक्त्या ॥९॥

**अथ नगरवर्णनम्-**

जिनेन्दुना निर्जितया यशःश्रिया, प्रसत्तिमाधातुममुष्य गङ्गया ।
सोपानदम्भादिव तद्गृहाङ्गणे, रङ्गत्तरङ्गा उपदीकृता निजाः ॥१०॥
बुब्बूलेन मरुल्लतेव विधिना संयोजिताऽहं जग-
च्छ्लाघ्या पापकपालिना सह विभो! दुःखं जहीदं मम ।
इत्थं वक्तुमनास्तरङ्गितनभःसिन्धुर्विहाराङ्गणे,
चन्द्रारोहणकैतवेन भजते स्माऽभ्येत्य जाने जिनम् ॥११॥
श्रीमज्जिनेन्द्रोऽतिगभीरिमश्रिया, मा मां जयत्वेष इतीव वार्द्धिना ।
सोपानदम्भात् प्रहिता निषेवितुं, निजास्तरङ्गा भगवद्गृहाङ्गणे ॥१२॥
दाशार्हः स्वपदे दधात्यपि महादेवेन संस्थापितां,
प्रीत्या मां निजमूर्द्धनीति भगवन्! दुःखं ममाऽपाकुरु ।
आख्यातुं किमिदं जिनं धुसरिता स्वीयोर्मयः प्रेषिताः,
सेवन्ते पुरिचैत्यचान्द्रविलसत्सोपानदम्भादिव ॥१३॥
भिक्षुत्वमीश! जहि मद्दयितस्य शम्भो-र्विज्ञप्तिकामिति विधातुमिवोत्सुकाऽर्हतः ।
चैत्याङ्गणे स्थितवती स्फटिकाश्मबद्ध-सोपानकायिततरङ्गसुरश्रवन्ती ॥१४॥
मां मानयेद् गौर्यधिकां यथा शिवः, स्वामिंस्तथा च प्रणयेति वक्तुम् ।
सोपानदम्भात् सतरङ्गगङ्गा, चैत्याङ्गणस्था भजतीव सार्वम् ॥१५॥
गाम्भीर्यमस्मिन् मयि वाऽतिशायि, जिज्ञासयेतीव सुधापयोधिना ।
श्वेताश्मसोपानमिषाद् विहारे, निजा लहर्यः प्रहिता जिनान्तिके ॥१६॥
मां संत्यजन्तमहितं न कदाचिदौर्वं, दूरीकुरु त्वमिति वक्तुमिवाऽऽर्णवेन ।
स्वीयोर्मयः प्रतिजिनं शशिकान्तक्लृप्त-सोपानदम्भत इमाः प्रहिता विहारे ॥१७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

निपीयमानाज्जलधेरगस्तिना, स्वपानशङ्काकुलिता इवाऽन्तः ।
प्रणश्य सोपानमिषात् तरङ्गा-श्चैत्ये समीयुः शरणे जिनस्य ॥१८॥
जिनेन्दुना स्वीयगभीरताभि-र्न्यत्कारभावं गमितः सुधाम्बुधिः ।
चैत्ये सितारोहणकैतवेन, प्रैषीत् तरङ्गानिव तं निषेवितुम् ॥१९॥
लक्ष्मीक्रीडागृहे तस्मि-न्नरविन्द इव स्मिते ।
श्रीमत्तत्र भवत्पाद-पद्मोत्तंसितभूतले ॥२०॥
श्रीमद्देवगुरुध्येय-ध्यानासक्तजनव्रजात् ।
नगरान्नगरोत्तंसा-**दहिमन्नगरा**भिधात् ॥२१॥
आनन्दचन्द्रिकोन्निद्री-कृतमानसकैरवः ।
**लावण्यविजयः** शिष्यो, विज्ञप्तिमुपढौकते ॥२२॥
यथाकृत्यं सदा श्रेयः-शिखरी वृद्धिमश्नुते ।
श्रीमत्तातपादनाम-स्मृतिजह्नुसुताजलैः ॥२३॥

**अथ गुरुवर्णनम्-**

अद्वैतशौण्डीरतया व्रतीन्दुना, विनिर्जितो निर्जरराजवारणः ।
प्रसन्नतायाः प्रविधित्सया प्रभो-र्भुजानिभेनेव करं वितीर्णवान् ॥२४॥
यतिक्षितीन्दोर्भुजवैभवेना-ऽभिभूयमानं स्वकरं विलोक्य ।
मन्दाक्षलक्षीकृतचित्तवृत्ति-र्बभाज कुञ्जं किमु कुञ्जरेन्द्रः ॥२५॥
पराजितं यद् भुजवैभवेन, कथञ्चिदालोक्य करं स्वकीयम् ।
दुःखातिरेकेण करी स्वकीये, क्षिपत्यजस्रं शिरसीव धूलीम् ॥२६॥
व्रतिक्षितीन्द्रेण जितेन गत्या, जिगीषता तं पुनरात्मना रिपुम् ।
गजेन तच्छिद्रदिदृक्षयेव, बाहुच्छलात् प्रैषि करः स्वकीयः ॥२७॥
स्वं प्राभृतीकृत्य करं भुजाङ्ग-मध्येतुकामो गतिमज्जिमानम् ।
आकारदम्भादिव पादपद्मे, गुरोर्गजेन्द्रः प्रणयत्युपास्तिम् ॥२८॥
गुरुणा निजबाहुवैभवैः, स्वकरं जेतुमुरीकृतं हठात् ।
अधिगत्य गजोऽतिसाध्वसा-च्छरणं शैलरिपोरिवाऽऽश्रितः ॥२९॥
अरुन्तुदं भिन्द्धि मदीयबन्धनं, विज्ञप्तिकां कर्तुमितीव यत्पुरः ।
दोर्दण्डदम्भादयमात्मनः करः, प्रस्थापितः कुञ्जरपुङ्गवेन ॥३०॥
विज्ञाय वाचंयमवासवेन, गृहीतमात्मीयगतेर्विलासम् ।
पश्चात् ततो मार्गयितुं गजेन, भुजाङ्गहस्तः प्रहितः किमेषः ॥३१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इत्यादिगुणगरिष्ठैः, पदकजभृङ्गीभवत्सुरवरिष्ठैः ।
प्राप्ताखिलप्रतिष्ठैः, सुरतरुभिरिव प्रदत्तेष्टैः ॥३२॥
.................. कृतसातैः, कृताघघातैर्नमन्नृपव्रातैः ।
निमित्तं................................................ ॥३३॥
.............................................. मेलिकाम् ।
प्रसाद्य चेतः कुमुदं प्रसद्य, विकाशलक्ष्मी मम लप्स्यती तत् ॥३४॥
प्रणतिर्मम त्रिसन्ध्यं, भृङ्गीवाऽम्भोरुहे नभोमणिभिः ।
सम्प्रापयितव्या - - महर्निशं स्वहृदये तातैः ॥३५॥

किं च-

[अपूर्णमिदं पत्रम्]

—x—

कैलाससागरसूरि ज्ञानमन्दिर
कोबा
नं. ३१४३३

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ४१ )

# रायधन्नपुरस्थ–श्रीविजयदेवसूरिं प्रति प्रेषितम्
# श्रीविनयवर्धनलिखितं विज्ञप्तिपत्रम् (अपूर्णम्)

स्वस्तिश्रियां निधिरयं किल पूर्णचन्द्रः, सौम्याकृती रसजनिर्मलपूर्णभद्रः ।
प्राञ्चद्वृतोत्थतपइद्ध(?)समृद्धधामा, दोषाकरो मृगधरो जिनशान्तिनामा ॥१॥
भेत्ता प्रमत्ततमसामुदपेक्षणीयः, सम्पूर्णकामितकरो जनतार्हणीयः ।
प्रोल्लासयन् कुवलयं मुखतारयाऽऽप्तः, प्रोज्जृम्भते क्षितितलेऽभिनवो निरङ्कः ॥२॥
श्रीशान्तितीर्थेश! सदोदयस्ते, दन्तालयो क्षीणमहो कलङ्की ।
शशी न तत् ज्ञास्तु मृषोपमानो-पमेयभावं प्रतितो(?) वदन्ति ॥३॥
शान्तीशनेत्रप्रतिपक्ष एष, सारङ्ग आत्मीयबलं समीक्ष्य ।
दासीभवंस्ते प्रणिपत्य पाद-द्वयीमसेवीज्जिनलक्ष्मदम्भात् ॥४॥
श्रीशान्तिमूर्तिर्मनुजार्तिजित्वरी, सौभाग्यसौन्दर्यगुणैकधीवरी ।
सर्वार्थदात्रीव सुवर्णपीवरी, जीयात् प्रसन्ना किल कल्पवल्लरी ॥५॥

एनं श्रीमन्तं श्रीमन्तं श्रीमन्तं श्रीविश्वसेनविश्वसेनविश्वसेनरसेनरसेनरसेन-जननदशशतनवदजजीवनजननविकचीकरणप्रवणदशशताधिकभानुभानुकेसरं सकल-जगतीमण्डलदशदिगन्तप्रसरत्प्रबलकज्जलामलश्यामलकश्मलपटलतिमिरप्रमाप्रमा-पणपरांचच्च(?) जननलिनयमलपुनर्नवनभोरत्न-प्रणतामर्त्यमर्त(र्त्य)प्रकरसौरेय-करणत्राणशेखरं खट्खण्डाखण्डापूर्वकरणशान्तिपटहोद्घोषणारवाकर्णनक्षणनिरोगी-भूतप्रभूतजनपदास्तोकलोकलोकान्तःकरणारविन्दोन्निद्रनिलयनिवसदादेय-नामधेयमन्त्रमन्त्राक्षरम् अनेकाच्छकानच्छातुच्छाच्छेद्याभेद्याजेयामेयाप्रष्ठस्पष्टकष्टद-कृष्णकर्ममर्मदक्षालक्ष्य_क्षलक्षकक्षदावनिष्पावबृहद्बृहद्भानुभानुतापोपघातोप-शान्तीकरणजगदुद्धरणदुष्करपुष्करावर्तजलधरधाराप्रकारं विशिष्टशिष्टशिवङ्कर-श्रीकुन्थूत्तरतीर्थकरदिनकरं प्रणामापूर्वा(र्व)पूर्वाचलचूलावलम्बिनं विधाय प्रोत्तुङ्गाभ्रङ्कषशृङ्गाग्रभागसर्वीयनिशान्तप्रशान्तप्रतिमार्चनचतुरागण्यपुण्यगुणगणारीण-धर्मधुरीणगरिष्ठवरिष्ठाचारचरणकरणसप्ततिगुणगुरुतरगुरुवचनरचनारसास्वाद-परिपूर्णान्तःकरणसश्रद्धश्राद्धश्राद्धीजनालङ्कृते असमावासदोसा(षा?)वकाशनयना-नन्दननन्दनवननिर्झरनिर्जरनिर्जरराजवाजिगजराजिवासवावाससंकाशभावभाजिनि

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जगज्जगद्वन्द्यानिन्द्यश्रीवन्द्यपादपादपद्मद्वन्द्वरजःपुञ्जप्रसरपावनीभूतभूतले श्रीमति श्रीमति श्रीमति **श्रीरायधन्नपुरे** महानगरे प्रशस्तसमस्तमण्डलाखण्डलगूर्जर-मण्डलावारपारान्तरीपसम**दधिपद्रद्र**ङ्गतः अक्षितिक्षितितलविनयावनतानुत्तमोत्तमाङ्गललाटपट्टविन्यस्तशस्तहस्तद्वयकुड्मलप्रकटीकृतभक्तिभावोऽमन्दानन्दकन्दोत्पुलकिताङ्गभागोऽशेषारोषहरिषसन्तोषपोषमेदुरमना अकृत्रिमपरमप्रीतिलतामालतीम(मु)कुललालसलालसभसलोपमः शिष्यद्व्यणुकसमवायिकारणं विनेयो **विनयवर्धनः** निर्मापितनव्यनव्यव्याकृतिनामिनामाक्षरप्रमितप्रणामं विज्ञप्तिप्रटकिनीं प्राभृतीचरीकरीति । यथाकृत्यं चात्र सकर्णकर्णपुत्रे प्राचीनप्राचीमहेलिकाभालतमालपत्रे उदयोदयाचलप्रष्ठप्रस्थारूढे सहस्रकिरणावलीढे सरससरसीसरसीरुहां परिवृढे दिवसराजन्यास्थानमण्डपासनासीने प्रातः प्रतिदिनं विदीनभावापूर्वालभ्यमहेभ्यसभ्यपञ्चजनपरिपूरितायां परिषदि जीवाजीवविचारसारश्री**जीवाभिगमसूत्र**स्वाध्यायविधानश्रीवर्धमान**वर्धमानदेशना**-व्याख्यानवाचन-षाण्मासिकयोगोद्वाहन-वाचंयमाध्ययनाध्यापनादिधर्मकर्मणि सशर्ममर्मसञ्जायमाने सति क्रमायाते सर्वपर्वाखर्वगर्वामर्षमुषि सकलसकलाविकलपूरुषहर्षपुषि अन्योन्यात्यन्ताभावरुषि पर्वानुत्तमपर्वणि **श्रीवार्षिकपर्वणि** सक्षणनवक्षणानल्पसंकल्पविकल्पकल्पकल्पश्री**कल्पसूत्र**-वृत्तिवाचन-सकलजीवामारिप्रवर्तन-कुकर्मनिवर्तन-मार्गणगणमार्गितार्थसार्थसमर्पण-मासार्धमासक्षपणाष्टाब्दिकाष्टमषष्ठादिदुस्तपतपस्तपन-सस्नात्रवादित्रसप्तदशप्रभेदपूजाप्रतिमार्हत्प्रतिमापूजन-नवप्रभावनाषरमादिप्रभावनाभवन-समस्तपरमार्हतपारणाकरण-कर्करकर्कशशब्दाजल्पन-दुःकर्मकर्ममर्मपाचनादि पर्वपुण्यपुण्यकृत्यं निरपायं समहं समजीजनत् **श्रीमत्तातपाद**नाममहामन्त्रस्मरणकरणोद्भूतप्रभूतप्रभावप्रचयातिरेकादपरम्....

[हांसियामां-]

सं. १७०२ वर्षे

[एतान्मात्रमेव पत्रं लिखितमस्ति]

—X—

सागरगच्छ-जैनज्ञानभण्डार, पाटण

डा. १९७

नं. ८०१२

पत्र-१

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(४२)

## श्रीविजयदेवसूरिं प्रति प्रेषितं

# श्रीहीरचन्द्रमुनेः पत्रम्* (त्रुटितम्)

स्वस्तिश्रियां सुन्दरमन्दरेण, यदीयपादाम्बुजयामलेन ।
पवित्रितां भासुरभूतधात्रीं, बिभर्ति शेषश्शिरसीति शङ्के ॥१॥
यत्र निस्त्रिंशता खड्गे, मुष्टिबन्धोऽपि तत्र हि ।
निर्नामिकत्वं यत्रासी-न्मत्कुणेषु जने न हि ॥२५॥
व्यसनं यत्र दानेषु, नीचत्वं यत्र वारिणि ।
दात्रदेशेषु वक्रत्वं, यत्र पुण्यस्य बन्धनम् ॥२६॥
यत्र श्राद्धाः सदा दान-विधिविज्ञानशालिनः ।
जिनेन्द्रधर्ममर्मज्ञाः, साधुसेवापरायणाः ॥२७॥
श्राविका यत्र राजन्ते, सतीजनमतल्लिकाः ।
जिनधर्मरता नित्यं, शुद्धसम्यक्त्वसंयुताः ॥२८॥
पद्मिन्यो विकसत्कोशा, निर्यद्भ्रमरपङ्क्तयः ।
स्वकान्तकरसंस्पृष्टाः, सहर्षाः स्युर्न योषितः ॥२९॥
त्रियामाविरहोद्भूत-ज्वरापगमकोविदम् ।
अवाप विधुरा चक्र-वाकी हृदयवल्लभम् ॥३०॥
कुण्डोध्न्यः प्रक्षरद्दुग्धाः, जिह्वास्पृष्टैकतर्णकाः ।
दामनीबन्धनत्यक्ता, ययुर्गावो वनान्तरम् ॥३१॥
सस्नेहाः सगुणाश्चैव, तमोदर्शितमार्गकाः ।
पात्रसंस्था अपि प्रापु-र्म्लानिं कज्जलकेतवः ॥३२॥
लूतातन्तुपटाशङ्का-मवाप रजनीकरः ।
गतोद्यमा इव स्पष्टं, क्षयमापुश्च तारकाः ॥३३॥
गिरेर्गुहासु वसतिं, भेजे भीत्या तमोभरः ।
अपश्रिकः य (अपश्रियः) कुमुद्वत्यो, भेजुः सङ्कोचमुल्बणम् ॥३४॥

---

* पत्रस्याऽस्य प्रायः सर्वेऽपि श्लोकाः श्रीविजयसिंहसूरिं प्रति मुनिमेघचन्द्रेण प्रेषिते पत्रेऽपि सन्ति (पत्रक्र.-११) -सं.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तदेभ्यजनयुक्तायां, संसदि प्रतिवासरम् ।
**धर्मकल्पद्रुमा**ख्यस्य, वाचना प्रविधीयते ॥३५॥
श्रीमज्जिनेन्द्रभवने-ऽभवन् स्नात्राणि भक्तितः ।
तथैव साधुवर्गस्या-ऽध्ययनाध्यापनादिकम् ॥३६॥
इत्यादि धर्मकार्याणि, क्रियमाणे निरन्तरम् ।
सर्वपर्वशिरोरत्न-मगाद् **वार्षिक**सञ्ज्ञकम् ॥३७॥
दुष्टाष्टकर्मसङ्घात-घाति षष्ठाष्टमादिकम् ।
विधानं तपसो जात-मात्मनः शुद्धिसिद्धये ॥३८॥
व्याख्यानैर्नवभिस्तत्रा-ऽनल्पसङ्कल्पपूरणे ।
वाचनं **कल्पसूत्र**स्य, कल्पद्रुरिव जङ्गमः ॥३९॥
मार्गणद्रविणादानं, शोषणं दुष्टकर्मणाम् ।
**लोचनेन्दुमितान् [ १२ ] घस्त्रान्, जीवामारिप्रवर्तनाम्** ॥४०॥
महामहःसमं य(ज)ज्ञे, चैत्यानां परिपाटिका ।
मन्ये सिद्धिवधूभाले, पत्रालीव मनोरमा ॥४१॥
इत्यादिपुण्यकृत्यानि, बभूवुस्तातनामतः ।
जायन्ते च तथा नित्यं, तातानां सौम्यचक्षुषा ॥४२॥

अथ परमगुरुगच्छाधिराजभट्टारकश्री**विजयदेवसूरी**न्द्रचन्द्रवर्णनम् ॥

कामं कामगवीसुरद्रुमलतामुख्याः पदार्थाश्च ये,
चिन्तारत्नविचित्रचित्रलतिकासत्कामकुम्भादयः ।
सर्वेषां निजचित्तकल्पितमहाभीष्टार्थसंसाधका-
स्तेभ्यस्त्वं मम वाञ्छितार्थकरणाधिक्यं दधानो जय ॥४३॥
श्रीमत्सूरिराजेन्द्र !, वयं के गुणवर्णने ? ।
यत्कीर्त्तिकामिनीभाले, कस्तूरीतिलकं नभः ॥४४॥
श्रीमत्सूरिराजेन्द्र-निर्माणे ब्रह्मणः करात् ।
परमाणुकणाः कीर्णाः, कर्ण-कल्पद्रुमादयः ॥४५॥
वर्योऽपि तुर्यारक एव सूरे! चेतश्चमत्कारकरो न चाऽऽसीत् ।
प्रशंसनीयः किल पञ्चमोऽयं, यत्र प्रभो! त्वं जनतारकोऽभूः ॥४६॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

श्री**मत्तपागच्छ**सुराज्यलक्ष्मी-र्न त्वां विना शोभत एव देव ! ।
कार्त्तस्वरीयोत्तमभाजनं विना, व्याघ्रीपयस्तिष्ठति नो कदापि ॥४७॥
देवानां भवने वने सुरनगे पातालपीठे सदा,
**कर्णाटे** विकटे च **लाटविषये भोटे** च **चौडा**भिधे ।
सौराष्ट्रे किल **मालवेऽङ्ग**विषये त्वत्कीर्त्तिसन्नर्तकीं,
दृष्ट्वा किं बहुरूपिणीति विशदा विद्याऽनया शिक्षिता ॥४८॥
त्वत्कीर्त्त्या धवलीकृते क्षितितले भेदो न विज्ञायते,
रूप्याद्रेः कनकाचलस्य यमुना-गङ्गातटिन्योरपि ।
स्वर्भाणोः शशिनो निशा-दिवसयोः काकस्य हंसस्य च,
कर्पूराञ्जनयोश्च वृद्ध-नवयोर्नीली-हिमान्योस्तथा ॥४९॥
त्वयि(तव) शीलगुणश्चित्ते, चमत्कारं करोति न ।
यतो नारदर(नादर?)पूर्वासीत्, त्वं(त्वद्?) गुरो! गरिमानिधे! ॥५०॥
अयि गुरो! तव कीर्त्तिनटी स्फुटं, त्रिभुवने किल नृत्यति रङ्गतः ।
श्रवणसम्पुटतः पतिते किमु, शशि-रविच्छलतः शुभकुण्डले? ॥५१॥
एवंविधैः सद्गुणशोभमानैः, पवित्रचारित्रगुणाभिरामैः ।
ममाऽवधार्या नतिरेव सूरी-श्वरैः सदा **वार्षिकपर्वणो**ऽनिशम् ॥५२॥
इलातलमिलन्मौलिः संयोजितकरद्वयः ।
**शिष्याणुहीरचन्द्रो** विज्ञप्तिं तनुतेतराम् ॥५३॥
तथा श्रीतातपादाब्ज-सेविनां शिवकाङ्क्षिणाम् ।
यथार्हं नत्यनुनती, प्रसाद्ये करुणापरैः ॥५४॥
भव्याः! प्रमादमवधूय भजध्वमेनं, सूरीश्वरं **विजयसिंह**गणाधिराजम् ।
**ऊकेशवंश**वरनीरधिपूर्णचन्द्रं, मायारसाधरविनाशविधौ सुरेन्द्रम् ॥५५॥
**विजयसिंहसूरीन्द्राः**, श्रीअनूचानपुङ्गवाः ।
श्री**मद्धनविजया**ख्या, वाचका विश्वविश्रुताः ॥५६॥
**श्रीराजसुन्दर**विबुधा, विबुधाः श्री**हंसविजय**नामानः ।
**श्रीऋद्धिविजय**विबुधा, विबुधाः **श्रीसाधुविजया**ह्वाः ॥५७॥

—x—

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर
सूरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ( ४३ )

# श्रीलावण्यविजयगणिनो लेखस्यांऽशः

पदे पदे पुष्करिण्यः, वृत्तहंसोपसेवितसुनीराः ।
निर्मलवारितरङ्गैः, पूर्णानि सरांसि सर्वत्र ॥१॥
सर्वर्तुकपुष्पफला, आरामाः सन्ति यत्र स श्रीमान् ।
देशः सदैव सरसो, जयति **श्रीमेदपाट**वरः ॥२॥ युग्मम् ॥
तत्र- **उदयपुरं** वरनगरं, मन्दिरमुदयश्रियः समग्रायाः ।
विभ्राजतेतरां यत्, वसुधावरवर्णिनीतिलकम् ॥३॥
यत्पुरमानन्दकरं, जगद्दृशामृद्धिपूर्णमालोक्य ।
मन्ये त्रपाभरादिव, लङ्का दृगगोचरत्वमगात् ॥४॥
यत् पुरमनन्यशोभं, दृष्ट्वा धनधान्यनिचयसंनिचितम् ।
भोगावती प्रनंष्ट्वा, विवेश पातालमिव गुप्तम् ॥५॥
यत् पुरमनेकलोक-प्रकराकीर्णं विलोक्य विश्वाग्रम् ।
मन्ये लङ्का जगाम, व्योमपथं किमिव गतदर्पा ॥६॥
यत् पुरमिभ्यसहस्र-श्रेणीकलितं समग्रगुणयुक्तम् ।
भुवनत्रयवरपुरवर-निकरशिरोमौलिमाभाति ॥७॥
यत्र पुरे जिनभर्तुः, सद्मान्यभ्रंलिहानि दीप्राणि ।
गौरीशाचलशिखरो-पमानतामिव सदा बभ्रुः ॥८॥
यत्र पुरे सुजनानां, मनांसि शिखराणि जिनगृहाणां च ।
अत्युच्चानि त्रिदशा-पगापयःपूरविशदानि ॥९॥
सामन्ताखिलनरपति-भालमणिघृष्टचलननलिनयुगः ।
श्री**जगत्सिंह**नामा, सान्वर्थो विश्वविख्यातः ॥१०॥
यत्र प्रजापतिरिव, प्रजाव्रजं शास्ति वसुमतीपालः ।
न्यायैकनिष्ठचित्तो, भूमितलव्याप्तकीर्तिभरः ॥११॥ युग्मम् ॥
यत्र पुरे प्राकारः, प्रोद्दीप्रद्रोपुरः सदाकारः ।
विविधायुधसम्पूर्णः, कपिशीर्षकदम्बकाकीर्णः ॥१२॥
सारसुधाभरलिप्त-श्चकास्ति विश्वत्रयप्रमोदकरः ।
अत्युच्चो हिमवानिव, पुरमन्वेष्टुं किमत्राऽऽगात् ॥१३॥ युग्मम् ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

चातकचक्रमयूरा-न्यभृतमरालादिविविधविहगगणैः ।
परिसेव्यमाण(न)सलिलं, निभृतं मत्स्यादिजलजीवैः ॥१४॥
यस्मिन् पुरे सरोवर-माभाति प्रवरनीरनीरन्ध्रम् ।
नारीनिकरानेक-क्रीडालीलाविनोदवरम् ॥१५॥ युग्मम् ॥
यस्मिन् पुरे महेभ्या, निजरूपपराभिभूतमधुदीपाः ।
प्रार्थितपदार्थसार्थ-प्रसादनत्रिदशतरुतुल्याः ॥१६॥
यत्र श्राद्धसमूहा, जीवाजीवादिरुचिरतत्त्वविदः ।
यतिजनभक्तिप्रह्वा, वसन्ति दानादिधर्मपराः ॥१७॥
यत्र श्राद्ध्यः त्रिदशा-ङ्गना इवाऽऽभाति(न्ति) रूपसौन्दर्यात् ।
शीलविभूषितगात्रा, दानगुणैर्विजितकल्पलताः ॥१८॥
यत्र चतुःपथहट्ट-श्रेणी विभ्राजते विगतसङ्ख्यैः ।
निभृता भृशं चतुर्विध-धननिकरैर्धान्यपुञ्जैश्च ॥१९॥
यत्रोच्चैः सद्मानि, भ्राजन्ते स्वर्णपूर्णकलशानि ।
सम्पूर्णसुधारोचिः-क्षीराब्धिक्षीरशुभ्राणि ॥२०॥
यत्र पुरे जननिकरो, धर्मात्मा प्रकृतिभद्रकः सौम्यः ।
विविधाभरणविभूषित-तनुयष्टिर्निवसति वदान्यः ॥२१॥
यत्रोपाश्रयपोतः, सुसाधुसांयात्रिकप्रकरपूर्णः ।
भीमभवाब्धिनिमज्ज-ज्जनव्रजोत्तारणैकपटुः ॥२२॥
कलितान्यशोक-साल-प्रियङ्गु-सहकार-तालसद्वृक्षैः ।
जाती-चम्पक-केतक-कुवलय-कुन्दादिपुष्पैश्च ॥२३॥
सुमनःसमूहसुमनः-शी(शि)लीमुखप्रकरहर्षकर्तॄणि ॥
यत्र पुरे विपिनानि, विभान्ति सुमनोमनानीव ॥२४॥ युग्मम् ॥

श्रीमत्तातपदाब्जन्यासरजःपूरपूतभूपीठे श्रीमति तत्र समग्रश्रीणा[मु]त्तमनिवासपदे इलामण्डने श्रीइलादुर्गनामप्रधाने पुरे श्रीमति भ्राजमाने जगद्वन्द्यवन्द्यांह्रिपादाम्बुजन्म-द्वयीपाविते तत्र सर्वर्द्धिरम्ये.....

[एतावन्मात्रमेव पत्रं लिखितमस्ति]

—x—

जैन आत्मानन्द सभा, भावनगर

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ४४ )

# श्रीहेमहंसगणिवरं प्रति प्रेषितं विज्ञप्तिपत्रम्

श्रीमत्प्रेमपुरस्सरार्हतपदश्रीकन्यया निर्ममे,
यत्पाणिग्रहणं नरामरगणे भूगोलरङ्गाङ्गणे ।
दिव्यस्त्रीधवलौघदुन्दुभिरवे त्रैलोक्यकुक्षिम्भरौ,
**वीरः प्रेमपुरप्रभुः** प्रथयतात् प्रेष्ठप्रतिष्ठां समे ॥१॥
यदेककोणके राज-गृहं यस्यैकगेहभूः ।
विशाला द्वारवत्यस्य, माहात्म्यं मीयते कथम्? ॥२॥

तत्र श्रीतत्रभवत्पवित्रक्रमकमलयमलकल्पद्रुमसमाराधनप्रवर्धमानमहेभ्यश्राद्ध-सर्वाङ्गीणगुणश्रीसमृद्धिभासुरे सुरेश्वरसमान**श्रीपातसाहि**राज्यलक्ष्मीपौलोमीपरिभोग-वासभवने वनेचरीकृतानेकवैरिवारराजसभाशृङ्गार-**श्रीमल्लदेव**प्रभृतिय**वहरि**-व्यवहारि-घटामनोरमे मनोरमेश्वरप्रोल्लसच्छीललीलश्लीलमौलिमन्त्रि**वीसला**-दिब्रह्मचारिश्राद्धरत्नसागरे **श्रीअहम्मदावाद**नगरे ॥

उत्तुङ्गस्तनसारभङ्गुरगतिर्गाङ्गेयगौरद्युतिः,
स्ववापीपुलिनायमानजघना फुल्लारविन्दानना ।
रत्नालङ्कृतिरात्तपूर्णकलशा नीरङ्गिकाभ्राजिनी,
भाति त्वत्कपुरप्रवेशकमहारम्भे महेभ्याङ्गना ॥३॥

**हेमा**भदे**हे**सु**म**हःसमूहे
**म**रुल्लता**म**ण्यभिरामनाम ।
**हं**सप्रभे**हं**कृतितामसे**हं**
**सदा**स्मिदा**स**स्त्वयि**हेमहंस** ॥४॥

**हेमा**भदे**हे** सुमहःसमूहे, **म**रुल्लता**म**ण्यभिरामनाम! ।
**हं**सप्रभेऽ**हं** कृति(त?)तामसेऽ**हं**, **सदा**ऽस्मि दासस्त्वयि **हेमहंस**! ॥४॥

इत्यादिप्रत्यक्षस्तुतिगोचरीकृतकृतयुगाविर्भावकप्रभावकश्रावकश्रेणिविधीयमान-प्रौढपुण्यकरणीयबीजायमानोपदेश-देशविरत्यादिद्विविधधर्मसंसूत्रणसूत्रधारवचः-प्रकार-कारस्करप्रवर-पुष्पितफलितसहकारवत्सर्वजनोपकारसार-सारस्वतसिद्धि-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

लीलावगाढचातुर्वैद्याम्भोधि-पूज्याराध्यध्येयतम-श्रीहेमहंसगणिचरणकमलान् ।

परस्परालिङ्गितशृङ्गतुङ्ग-[...]नानातरुभिः कराभैः ।
छायां सृ [...] _ _ _ _ _ ॥५॥

**सा०** राजाप्रथितसर्करालिङ्गप्रभावनादि ९ प्रभावनासुभग-श्री**कल्प**वाचना-जिनालयस्नात्रमहभवन-तपस्तपप्रभृतिपुण्यकर्तव्यानि समजायन्त ।

तत्र साधुधौरेय-पं० **आनन्दचारित्र**गणि-पण्डितप्रवर**शुभसूर**गणि-प्रकाण्ड-तपस्विशिरोमणि-**समयहर्ष**गणि-**ज्ञानसार**गणि-**चरणहेम**गणि-**भुवनदेव**गणि-**सुमतिहंस**मुनि-**संवेगहेम**मुनि-**सुन्दररत्न**मुनि-**कमलशेख**[ र ]मुनिवराणां **हेमचूला**गणि-**साधुनिधि**गणिन्यादिसाध्वीनां च सानन्दं वन्दनानुवन्दने । सो० **मल्लदेववरसिंग-चुंडावस्ता** सो० ।

[पत्रस्याऽस्य छायाकृतिः (Xerox) एतावन्मात्रैवोपलब्धा]

—x—

ला. द. विद्यामन्दिर
अमदावाद
नं. ३०८५४
(मुनिश्रीधुरन्धरविजयजी द्वारा)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ४५ )

# श्रीयशोविजयवाचकलिखितस्य पत्रस्य प्रथमं रूपम्
## (पत्र-खरडो)

स्वस्तिश्रियः प्रेयस ईश्वरस्य, प्रजापतेरप्यभिभूतिहेतुम् ।
स्मरं जिनोऽहन्नु शशादिवत् किं, **पलायते पञ्चमुखः करेणोः**[१] ॥१॥
इतस्ततोऽर्थाभिनयाय हस्तः, प्रसारितस्ते जिन! देशनायाम् ।
तापात्मकस्य प्रमयेऽस्य[२] रक्तो-त्पलायते पञ्चमुखः करेणोः ॥२॥
त्वत्किङ्करत्वेन जिनान्तराय-व्याघ्रः सभीर्दूरमियर्ति जन्तोः ।
यद् वज्रभृद्वाहनतां प्रपन्नात्, पलायते पञ्चमुखः करेणोः ॥३॥
देवेषु यानैर्बहुधेशजन्म-न्यापत्सु सिंहस्थमिभस्थितोऽवक् ।
निवार्यतां माद्यति मामकस्य, पलाय ते पञ्चमुखः करेणोः ॥४॥
एकान्तवादेन विभो! त्वदीय-स्याद्वादवादस्य विमर्दनं यत् ।
तद् युक्तयुक्त्याऽघटमानमेवं[३], पलायते पञ्चमुखः करेणोः ॥५॥
तथापि नो ते विघटेत नेतः!, सरस्वती स्याद् यदि शीतलोऽग्निः ।
स्थिरः समीरः समरुः समुद्रः, पलायते पञ्चमुखः करेणोः ॥६॥
त्वन्नामजापादसुमान्निहन्ति, मोहं महीन्द्रं जिन! यत्सुमन्त्रात् ।
भेको न किं नृत्यति सर्पशीर्षे, पलायते पञ्चमुखः करेणोः ॥७॥
त्वद्देशनासद्मसदेशवर्ती, शान्तः प्रभो! क्रीडति बभ्रुणादिः ।
नखायमानस्य सुहृत् सुमैत्र्या, पलायते पञ्चमुखः करेणोः ॥८॥
भवानुदस्थाज्जिन! कर्मचौर[४]-निर्घातनार्थं स्वयमेव बुद्ध्वा ।
केनोपदिष्टो यदिहोपरिष्टात्, पलायते[५] पञ्चमुखः करेणोः ॥९॥
चतुर्दशस्वप्ननिवेदितोद्य-द्भाग्यं प्रभोऽसूचयदप्रयासम् ।
क्षेतुं खवृक्षांस्तनुलक्ष्मणस्तत्-पलाय ते पञ्च मुखः करेणोः ॥१०॥
विलोकते योगभृदेव देव!, ज्योतिर्मयं त्वां न तु कश्चिदन्यः ।
[६]व्यालेन किं वा हठिनाऽपि विश्व-प! लायते पञ्चमुखः करेणोः ॥११॥

---

१. ५.१-टि. । २. प्रमयाय - प्रापा. । ३. प्रध्वंसते कंस इदं मुकुन्दं - प्रापा. । ४. ०शत्रु-प्रा.पा. । ५. रा-टि. । ६. बालेन - प्रापा. ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

[1]चिक्लेश नेशं मदनः स यस्माद्, हल्लोभकृष्टौ करिणोऽवपाते ।
[2]विकारयन् खानि तु चुम्बकाख्यो-पलायते पञ्चमुखः करेणोः ॥१२॥
देवाधिदेवस्य वयस्यरूपः, कृतः कटीरेण वरिष्ठमूर्तेः ।
शौण्डीर्यशत्रोर्निधनाय गन्धो-पलायते पञ्चमुखः करेणोः ॥१३॥
स्वामिन्! महादेव इतस्पृहाकृत्, त्वमेव शैवाभिमतस्त्वसत्यः ।
[3]यत् कालिकासंज्ञसुरस्य हन्ता, पलायते[4] पञ्चमुखः करेणोः ॥१४॥
छत्राशनीचामरभृत् सुमेरौ, स्नात्राय यान् पञ्चतनुर्मुमोद[5] ।
धृतेस्तवेन्द्रो [6]यशसाऽस्तचन्द्रो-पलाऽयते[7] पञ्चमुखः करेऽणोः ॥१५॥
चतुर्गात्रं च०(?) ।

विभो! भवद्भाषितमुक्तिमार्गे, कथं जिहे तत्र यतो ममाऽयम् ।
कर्माष्टकस्य प्रकृतिव्रजः कू-पलायते पञ्चमुखः करेणोः ॥१६॥
न हीनता ते जिन! रत्नसानोः, कनीयसोऽप्यस्ति बलेन यस्मात् ।
उच्चाटने भारमपेक्ष्य चित्ते, पलायते पञ्चमुखः करेणोः ॥१७॥
जगत्पते! तेऽर्चनयोपलब्धा-क्षयश्रियः प्राज्यमहैर्जनस्य ।
अहर्गणश्चित्रसुखेन्दुजायां, पलायते पञ्चमुखः करेणोः ॥१८॥
यथा प्रियः सामज इद्धधामा, भूभृत्कुमार्या नयनोत्सवाय ।
तथाऽर्हदक्ष्णोर्युगलं यदिन्दू-पलायते पञ्चमुखः करेणोः ॥१९॥
त्वयि प्रसन्ने जगतामधीश!, बिभेमि नाऽहं खलु पापवर्गात् ।
यथा यथार्थाङ्गबलोदये नो, पलायते पञ्चमुखः करेणोः ॥२०॥
इतीदृशाश्चर्यकृता समस्या-पदेन सन्तः कवयः स्तुवन्ति ।
अर्हन्तमन्तःकरणातिथित्वं, प्रापय्य तं शान्तिजिनेन्द्रचन्द्रम् ॥२१॥

इति श्रीशान्तिजिनेन्द्रचन्द्रनमस्कारपद्धतिः ॥

अथ नगरवर्णनम् ॥

यत्र वासवसनाभिमेदिनी-भृत्प्रतापसवितुः समुद्यतः ।
आतपेन जगति प्रसारिणा, **लोहितो जयति यामिनीपतिः** ॥१॥

---

१. स्मरः स आनर्दजितं - प्रापा. । २. अर्थान् जिहानस्य - प्रापा. । ३. गौरीपरीरंभ्यसुरस्य - प्रापा. । ४. रा-टि. । ५. पञ्चतनुर्जजृम्भे - प्रापा. । ६. रदनास्तचन्द्रो - प्रापा. । ७. ७.१. - टि. ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत्र पट्टमहिषीमुखं मही-नायकस्य परिमण्डलं किल[१] ।
पीतपीतनसपत्रवल्लिकं, लोहितो जयति यामिनीपतिः ॥२॥
व्योमलङ्घिशिरसां समुल्लस-त्पद्मरागमणिसद्मनां सदा ।
यत्र विस्तृतमरीचिसञ्चयै-र्लोहितो जयति यामिनीपतिः ॥३॥
यत्र भूषितवराभिसारिका-चन्द्रकान् स्वजयिनो निशामुखे ।
ईक्षमीक्षमुदयन् क्रुधावशा-ल्लोहितो जयति यामिनीपतिः ॥४॥
प्राप्य यत्र समवर्णतां चतु-र्मासि सूरियशसः प्रकाशते ।
स्वःकरी लसति नीलपूर्वको, लोहितो जयति यामिनीपतिः ॥५॥
आयतायतनसंस्थितो जपा-मुख्यपुष्पपरिपूजितोऽभितः ।
यत्र जात्यतपनीयनिर्मितो, लोहितो जयति यामिनीपतिः ॥६॥
यत्र चैत्यविषये निरन्तरं, सार्वबाह्लिकविलेपनार्चया ।
लक्ष्मणातनयलक्षणं लया-ल्लोहितो जयति यामिनीपतिः ॥७॥
यत्र जात्यकुरुविन्दसोदरैः, सान्ध्यरागनिकरैः परिष्कृतः ।
[२]कैरवोच्छ्वसनतो दिनात्यये, लोहितो जयति यामिनीपतिः ॥८॥

[द्रङ्गनामधेयनिरूपणम्]

अत्युन्नतः सर्वशिलोच्चयेषु, यथा सुमेरुः समयप्रसिद्धः ।
सज्जातरूपाद्भुतनन्दनश्री-**स्तथोन्नतद्रङ्ग इहोन्नतत्वम्** ॥१॥
अभ्युन्नतो हेममयो हिमाद्रि-र्मन्दाकिनीतोयतरङ्गपूतः ।
गौरीगुणग्रामवशीकृतेश-स्तथोन्नतद्रङ्ग इहोन्नतत्वम् ॥२॥
यथा स्वयम्भूरमणः समुद्रो, महानुदन्वत् सुगुणैरमुद्रः ।
सान्द्रः सुधापायिगमागमेन, तथोन्नतद्रङ्ग इहोन्नतत्वम् ॥३॥
कैलाशशैलस्य महेशवासा-दलङ्कृतत्वं गिरिचक्रवाले ।
सुगौरतोच्चैर्गरिमा चकास्ति, तथोन्नतद्रङ्ग इहोन्नतत्वम् ॥४॥
विराजते वासववैजयन्त-स्थलं विचित्रैर्विबुधावतंसैः ।
रुद्धं समिद्धं विविधैः प्रसिद्धै-स्तथोन्नतद्रङ्ग इहोन्नतत्वम् ॥५॥
द्युसत्पुराधीश्वरवाहनस्य, श्रीहस्तिमल्लस्य यथा प्रथावान् ।
गणो गुणानां गजमण्डलेषु, तथोन्नतद्रङ्ग इहोन्नतत्वम् ॥६॥

---

१. स्फुटम् - प्रापा. । २. चन्द्रवंशि विनतो - प्रापा. ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कुमुद्वतीकान्तकलाकलाप-स्तेजश्च तेजस्विषु तीक्ष्णरश्मेः ।
यथा जनानां नयनोत्सवाय, तथोन्नतद्रङ्ग इहोन्नतत्वम् ॥७॥
समग्रवस्तुष्वधिकाधिकारि, यथा सुवर्णं चरितार्थनाम ।
कल्याणकं पावनतानिदानं, तथोन्नतद्रङ्ग इहोन्नतत्वम् ॥८॥

इत्यष्टकेन द्रङ्गनामधेयस्वरूपनिरूपणम् ॥

**अहम्मदावाद**त ऐषमस्तो, वर्षे चतुर्मासकमेत्य सूरे[:] ।
ऊनापुरेऽभूत् तदयेन यत् त-**न्मन्ये निशायामुदितो दिनेशः** ॥१॥
युगे कलौ सत्यपि धर्मराज्य-प्राज्यं नयाढ्यं प्रवरीवृतीति ।
**यदुन्नताख्यं** नगरं सखे ! त-न्मन्ये निशायामुदितो दिनेशः ॥२॥
समन्ततो यत्र सरोवरेषु, प्रगे प्रगे स्मेरयतेऽम्बुजानि ।
आत्मीयमित्रार्तिकृतो विघाता-न्मन्ये निशायामुदितो दिनेशः ॥३॥
स्वपान् निजान् स्वप्नविदां पुरस्ताद्, वदन्ति यत्रेति जनाः समेत्य ।
नष्टः शशात् सिंह इभः शताक्षो, मन्ये निशायामुदितो दिनेशः ॥४॥

पुमानिया० (?) ॥

यस्मिंस्तरीप्रोषितभर्तृकाः स-द्वृत्ता दिनान्ते वनिता वदन्ति ।
दृष्ट्वाऽतितापीन्दुमिदं वयस्य मन्ये निशायामुदितो दिनेशः ॥५॥

निशिशशित्० । चेडावद्यः क० ।

आश्चर्यहेतु**र्विजयादिदेवः**, सूरिः स्वयं यत्र समागतोऽभूत् ।
तथा यथा वत्सपुरेति धन्यं, मन्ये निशायामुदितो दिनेशः ॥६॥
एके गतौ पश्चिममण्डलान्त-रित्यंशुहानाविति केऽपि यत्र ।
इत्यालपन्त्यल्पबला हि दैव्या, मन्ये निशायामुदितो दिनेशः ॥७॥
ग्रीवानुगे के ? जिनजन्म कस्यां ? कः कीदृगस्तं व्रजतीति पृष्टः ।
रात्युत्तरं यत्र जिनोऽज्ञसेति, मन्ये निशायामुदितो दिनेशः ॥८॥
षष्ठाष्टमद्वादशमासमुख्यो-पवासिनो यत्र तपस्विनस्ते ।
जयन्ति यैः शक्यत एव कर्तुं, मन्ये निशायामुदितो दिनेशः ॥९॥
अनेकशो यत्र जयन्ति यन्त्र-मन्त्रौषधीतन्त्रविदः पुमांसः ।
प्रभूयते यैर्नियतं विधातुं, मन्ये निशायामुदितो दिनेशः ॥१०॥

—x—

लावण्यविजयजी जैन ज्ञानभण्डार-राधनपुर. डा. ३४ प्र. १९८५

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ४६ )

# श्रीमेघविजयोपाध्यायप्रणीतं विज्ञप्तिपत्रम्
# (अपूर्णम्)

स्वस्तिश्रियामप्रतिरूपरूपाः, सर्वेऽपि देवासुरमर्त्यभूपाः ।
तासां विवाहस्थितिहेतवेऽयं, प्रादुश्चकाराऽऽदिजिनं विधाता ॥१॥
आबाल्यतो यः सकलाः प्रजादृशा, साम्येन पश्यन् समभूत् क्षमाधनः ।
सविश्वसाम्राज्यपदे ससाधनः, स्थितः प्रभुः स्यान्न कथं क्षमाधनः ॥२॥
प्रमादभाजोऽपि समुद्दिधीर्षया, श्रेयांसनाम्नोऽष्टभवानुजीविनः ।
आद्यो जिनोऽशिक्षयदुत्तमर्णतां, पुरोऽस्य विन्दन्नधमर्णतामपि ॥३॥
महाशयानां चरितं तदीदृशं, भृशं तदन्यद् विमृशन्ति नो मनाक् ।
यथायथा भृत्यजनस्य सम्पदः, पश्यन्ति हृष्यन्ति तथातथाऽऽत्मना ॥४॥
गुणैर्निकृष्टस्य निजानुयायिनो, नतिर्मरीचेर्भरतेन कारिता ।
पुरो भवान् भासयता स्वयम्भुवा, विनोदकर्मैव महात्मनामिदम् ॥५॥
सदादृताः स्युर्गुणिनो गुणाश्रये, गुणैर्विहीने तु सताम(मु)पेक्षणम् ।
न्यायो न किञ्चिन्मम भासते ह्ययं, सार्वत्रिकत्वादधमोत्तमादिके ॥६॥
तद् बालपाशं मलिनं निरर्थं, प्राप्तेऽपि दीक्षासमये ररक्ष ।
मूर्ध्नि स्वकीये जगदीश्वरस्य, पश्यतु(?) साम्यं सगुणेऽगुणे वा ॥७॥
रक्षन्ति केचित् प्रभवः स्वमीप्सितुं, सम्पादितुं स्वार्थपराः पराचितान् ।
जाते विधौ तान् न विलोकयन्त्यपि, कथं पशूनां गणनाऽपि तत्पुरः ॥८॥
नराधमानां ध्रुवमाशयो ह्ययं, सतां पुनः स्वाश्रयणे प्रयोजनम् ।
इतीव लक्ष्मच्छलतः पशुं वृषं, कार्यं _ _ पालयतेऽर्हदादिमः(?) ॥९॥
यः स्वामिवात्सल्यमशल्यचेता-स्तनोति भृत्यः स महान् सचेताः ।
इतीव भद्रो भगवत्पदाब्जा-श्रयेण लेभेऽत्र धुरन्धरत्वम् ॥१०॥
स किंप्रभुः पालयिता न यः स्वयं, समाश्रितानिष्टविशिष्टदानतः ।
तस्मादिव श्रीऋषभोऽपि युग्मिन-श्चक्रे क्रियाशासनतो मनस्विनः ॥११॥
यः प्राप्य साम्राज्यपदं मदं वह-न्न सेवकानां कुरुतेऽभिनन्दनम् ।
संतारकाणामिव तारकाधिपः, क्षणाद्वपुःक्षीणदशाश्रयः स्वयम् ॥१२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इतीव दुष्पापभरापशान्तये, जयेच्छयैवाऽव्ययराज्यशालिनः ।
छत्रच्छलादेव शशीवशीशितु-र्ध्रुवश्रियेऽशिश्रियदन्तिकं किल ॥१३॥
ये केऽप्यधीशा विभवैरधीशा, नाऽनुग्रहं निर्मिमतेऽनुगस्य ।
ते भूभुजः स्युर्भुजदर्पभङ्गाद्, वराकपाका इव दुर्विपाकाः ॥१४॥
मत्वेति मन्ये वृषभः क्षमीन्दु-श्चतुःसहस्रीमवनीधवानाम् ।
समं गृहीत्वा व्रततत्परोऽभू-दहो! महोत्साहमतिर्महत्सु ॥१५॥
पूर्वं प्रदायैव सुखं स्वसेविने, महोदयं यान्ति महाशयाः स्वयम् ।
पश्यन्तु सूर्योऽप्यरुणोदयं सृजन्, समभ्युदेति स्वयमस्य पृष्ठतः ॥१६॥
नयं किमेनं भगवान् विचारय-न्नाद्यो निजाम्बां कतिचिद् विनेयकान् ।
महोदयं प्रापयदञ्जसा ततः, परं क्रमेण स्वयमप्युपेयिवान् ॥१७॥
यद्दुःखमाप्नोति निजानुगामुको, ह्यरुन्तुदं स्यात् तदतीव सुप्रभौ ।
स्वसेवयाऽऽद्यो भगवान् मरीचये, ददौ पदं स्वं मदपापशामनात् ॥१८॥
न वासुदेवस्य न चक्रिणः श्रियो, नैवाऽऽदृता नाभिभुवा स्वयम्भुवा ।
दत्ताः पुनस्ताश्च निजानुवर्तिने, मरीचये सुप्रभुता हि तादृशी ॥१९॥
वैराग्यभाजाऽपि च नाभिसूनुना, प्रादायि विद्याधरनायकप्रभा ।
स्वसेविने श्रीनमये दयालुना, भ्रात्रा समं श्रीविनमिक्षमाभुजा ॥२०॥
कलाभृतः सैव कला महोज्ज्वला, या चेश्वरेण प्रभुणोररीकृता ।
यस्याः प्रभावादनुजीविनो जनाः, स्फुटं भजन्ते परमेश्वरश्रियम् ॥२१॥
मन्ये तदष्टानवतिं तनूजान्, रणेन रीणांश्चरणे धुरीणान् ।
सेवाकलायां सुचिरं प्रवीणान्, चक्रे क्रमात् श्रीवृषभः स्वतुल्यान् ॥२२॥
न केवलाः स्युर्मनुजेषु दोषा, न वा गुणास्तत् खलु दोषबुद्धिम् ।
विमुच्य सेवारसिके विधेये, कृपापरः स्यात् परमः प्रभुर्यः ॥२३॥
नयं किमेनं हृदये निधाय, महोद्धुरं दुर्द्धरतेजसं तम् ।
आद्यः प्रभुर्बाहुबलिं निनाय, परं पदं स्वेन समं समङ्गलम् ॥२८॥
इत्थं प्रभुत्वस्थितितार....

[इतोऽग्रेतनभागस्य पत्राणि विनष्टानि]

—x—

राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर
२०४१५

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ४७ )

# पं. श्रीलब्धिविमलेन प्रेषितं विज्ञप्तिपत्रम् (अपूर्णम्)

स्वस्तिश्रीभरभाजनं सुनयनं निःशेषलोकावनं,
　　मुक्तासन्ततिराजमानरदनं वाक्योल्लसच्चन्दनम् ।
**नाभेयादिजिनं** सुखालिजननं कन्दर्पविध्वंसनं,
　　वन्दे लोभविनाशनं नतजनं मोक्षायतस्पन्दनम् ॥१॥
स्वस्तिश्रीनिलयं दयारसमयं निश्शेषसौख्यालयं,
　　सद्विज्ञातनयं सदोदयमयं निष्पादिताघव्ययम् ।
गम्भीराम्बुचयं गुणावलिमयं सम्पत्करं निर्भयं,
　　**श्रीवामातनयं** सदा सविनयं वन्दे प्रवृद्धोदयम् ॥२॥
आख्यातमीश! भवता भवतापतप्त-
　　जीवौघचन्दनरसं नरसङ्घवर्याः ।
केचित् कृपारसमयं समयं निषेव्य,
　　संयान्ति सिद्धिरमणीं रमणीयशोभाम् ॥३॥
श्रीमत्कुशेशयमुखं सततं गताशं,
　　खेदं विना मथितकर्मविपक्षविश्वम् ।
रम्येन्द्रनीलकरणं शरणं तनूपां,
　　शं दायकं भविकदेहभृतां च शैवम् ॥४॥
योऽजय्यो जगतामपीश! भवता प्रोत्सर्पिदर्पोद्धुरः,
　　कन्दर्पो विजितः स एष चरणाम्भोजन्म ते सेवते ।
व्यञ्जत्केसरिलक्ष्मतोऽद्भुतमिव ब्रह्माच्युतेशादयः,
　　स्वायत्ता विहिता मृगा इव मया सिंहेन भर्त्राऽन्वहम् ॥५॥
भ्रान्त्वा भूवलयं गता तु गगने त्वत्कीर्तिहंसी सिता,
　　तत्र स्रष्टृमरालसङ्गमवशाद् गुर्वण्यभूत् साम्प्रतम् ।
मुक्तं भाति यथाऽण्डकं पृथुतरं मन्दाकिनीरोधसि,
　　बिम्बं रात्रिपतेरिदं जिनपतिः स स्ताच्छ्रिये सन्ततम् ॥६॥
यस्येशितुः पादयुगस्य तुल्यता, प्रफुल्लपद्मेन समं न युज्यते ।
जडाश्रितेनाऽजडसङ्गिनोऽनिशं, रजोविमुक्तस्य रजोविराजिना ॥७॥

Jain Educationa International　　For Personal and Private Use Only　　www.jainelibrary.org

लघीयसाऽत्यन्तगुरोर्निशायां, प्रभावियुक्तेन सदैव सश्रियः ।
रोलम्बरेखाकृतसङ्गमेन, सुपर्वमर्त्यासुरसेविनो वा ॥८॥ युग्मम् ॥
यत्पादयुग्मस्य निकामशोभां, विलोक्य जानामि जलप्रसूतम् ।
जले स्थितं सत् तनुते तपोऽनिशं, तत्साम्यमाप्तुं बहुकष्टयुक्तम् ॥९॥
सर्वश्रियः पादयुगं यदीयं, कामाङ्कुशश्रेणिवरप्रवालम् ।
समाश्रयन्त्युत्तमशङ्खयुक्तं, गङ्गादिनद्यो मकरालयं यथा ॥१०॥
नमत्सुजनसङ्घातं, नव्यभूघनभाततम् ।
रमाङ्गजं विगर्हन्तं, सर्वदाऽघविवर्जितम् ॥११॥ चक्रचित्रम् ॥
नानाप्रकारवस्तूनां, याथार्थ्यस्योपदेशकम् ।
कर्मान्तकारिणं वन्दे, श्रीवीरं रतिकारकम् ॥१२॥ ध्वजचित्रम् ॥ युग्मम् ॥
श्रीर्यदास्यश्रिता नित्या, इतराश्च चलाश्रयाः ।
क्षणिका विहसन्तीव, **श्रीवीरं** प्रणिपत्य तम् ॥१३॥
**सौराष्ट्र**राष्ट्रोऽथ जनैः प्रपूर्णः, समस्तसम्पद्भरनिर्भरः सन् ।
कान्ताकुचस्पर्श इव प्रधानो, भूयस्सु नित्यं विषयेषु भाति ॥१४॥
तत् सद्वस्तु न विश्वेऽपि, यद् यत्र नोपलभ्यते ।
स देशो नाऽस्ति भूपीठे, यज्जनो यत्र नेक्ष(क्ष्य)ते ॥१५॥
नूपुरालिरिवाऽऽभाति, सदाचरणमण्डना ।
जनचित्तहरा तत्र, नगरी या गरीयसी ॥१६॥
वनानि यौवनानीव, राजन्ते यत्र सर्वदा ।
प्रियालपनसाराणि, दधन्ति वयसां श्रियम् ॥१७॥
विभाति यत्र सर्वत्र, हृद्यमुपवनं घनम् ।
क्रीडातटाककल्लोलैः, संसिक्तद्रुममण्डलम् ॥१८॥
सरलमृदुलकेकानिर्भरो नृत्यरक्तो,
विरचयति कलापं नीलकण्ठश्च मन्दम् ।
विकसितविटपीनां वीक्ष्य रोलम्बचक्रं,
भ्रमदुपरितडित्वत् श्यामलं यत्र नित्यम् ॥१९॥
हरिणशिशुगणानां नीरबुद्धिं सदैव,
जनयति सितकान्तिः स्फटिको भित्तिभागः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नवसरसतृणालीलोभमुत्पादयं[ती],
क्वचिदसितमणीनामंशुमाला च यत्र ॥२०॥
प्रफुल्लपत्रालिगतालिदम्भतः, समस्तकाष्ठासु चरिष्णुदुर्यशः ।
निःशेषचूडामणिवर्जनार्जितं, दधार यस्मिन् वरकैतकं सदा ॥२१॥
यत्र जातिलतां मन्दं, मन्दं मुग्धां वधूमिव ।
विदग्धः कामुक इव, सस्वजे मलयानिलः ॥२२॥
पुष्पस्तबकभारेण, ननाम लवलीलता ।
पीनोरसिजभारेण, भूयसेव कृशोदरी ॥२३॥
वल्ल्याः पत्रावलिस्सारा, राजते सुरभिव्रजाः ।
जात्यकस्तूरिका श्यामा, मानिनीनां स्त्रियामिव ॥२४॥ पत्रचित्रम् ॥
वसन्तोद्यानपालेन, चम्पकेषु नियोजिताः ।
आरक्षा इव निःशङ्कं, भ्रमन्तीव मधुव्रताः ॥२५॥
केकी केकारवं वक्ति, तदायतां(त्ता?) स्फुटाक्षरम् ।
निर्माति किमिदं प्रश्नम्, अन्यपत्रिपतत्त्रिणोः ॥२६॥
यत्राऽत्युन्नतवृक्षाग्रे, स्ख्यल्यमानान्यहर्निशम् ।
खेचरीणां विमानानि, क्षणं यान्ति कु(फ?)लायताम् ॥२७॥
नीरकेलिरतस्त्रीणां, त्रुटितैर्हारमौक्तिकैः ।
ताम्रपर्णीश्रियं यत्र, दधते गृहदीर्घिकाः ॥२८॥
यद्वप्रे दीप्रमाणिक्य-कपिशीर्षपरम्पराः ।
अयन्ता(त्ला?)दर्शतां यान्ति, नित्यं खेचरयोषिताम् ॥२९॥
कामं शुभ्रसुधाशुचिर्जलधिवत् भूरीष्टकः कल्पवत्,
सद्द्वारो ग्रहराशिवत् सुरचितः स्वर्णाद्रिवत् सर्वदा ।
यो भ्राजत्कपिशीर्षको विटपिवद् विभ्राजिपाञ्चालि[को],
यो वा पाण्डववद् विभासतितरां यस्यां सशालोऽभ्रलिट् ॥३०॥
विभाति धरणो विष्वग्, वरकान्तिकलापकः ।
शिखिवत् धिष्णसङ्घात, इव सत्तमचित्रकः ॥३१॥
प्रोत्तुङ्गप्रचुरेन्द्रनीलवरणशृङ्गाग्रनिर्यत्प्रभा-
मालानूतनशाड्वलाङ्कुरततिग्रासादने लालसाः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ध्वान्तारातिरथावहाः सुहरयो यस्यां स्खलन्तोऽनिशं,
कान्तायां परिखेदयन्ति निविडं मध्यन्दिने सादिनम् ॥३२॥
चञ्चत्तोरणराजिराजितमुखाः सर्वार्थसंपूरिता,
जात्यस्वर्णमषीरसैर्विलिखितप्रद्योतिचित्रालिभिः ।
विभ्राजिष्णुगवाक्षसंस्थितललज्जायापतीभूषिताः,
प्रासादास्तविषं जयन्ति विभया प्रोत्तुङ्गशृङ्गान्विताः ॥३३॥
मर्यादारक्षणे दक्षाः, सागरा इव नागराः ।
अपांशुवसना भान्ति, गम्भीरा रत्नपङ्क्तयः ॥३४॥
स्वामिना सम्पदा वा स्याद्, यया तुल्याऽमरावती ।
गृहाट्टश्रेणिशोभाभिः, परं नैव कदाचन ॥३५॥
यस्या गृहाङ्गणस्थाने, स्वस्तिकन्यस्तमौक्तिकैः ।
स्वैरं क्रकञ्चकक्रीडां, कुरुते बालिकाजनः ॥३६॥
यत्सुन्दरीणां सुतनुप्रभाणां, क्रीडागिरी रैवतकोऽस्ति नित्यम् ।
सुराङ्गनानामिव हैमशैलः, अनेककल्पद्रुवनैर्विभासी ॥३७॥
यत्सुन्दरीणां च सुराङ्गनानां, किमन्तरज्ञानकृते विधात्रा ।
निमेषभावो विहितो विशेषो, विज्ञायते तत्परता कथञ्चित् ॥३८॥
अनेकमङ्गलोपेताः, कुलीनजनसेविताः ।
हसन्ति ताविषं यत्र, प्रासादाः सुपताकया ॥३९॥
अनेकशङ्करैर्लोकै-रनेकविधिपालकैः ।
अनेककविसन्दोहै-रनेकगृहकेतुभिः ॥४०॥
विधुन्तुदवधूवक्त्रै-रनेकपुरुषोत्तमैः ।
अनेकगुरुतायुक्तैः, स्वर्गं जयति यत् पुरम् ॥४१॥ युग्मम् ॥

अथ राजवर्णनम् ॥

सर्वलोकहितो दक्षः, परस्त्रीरमणे जडः ।
यस्यामस्ति महीपालो, परदानसुरद्रुमः ॥४२॥
मेरुवद् भाति यत्रेशो, दीव्यद्विबुधसेवितः ।
नानारामाहितो रम्यः, प्रचण्डतरसाऽन्वितः ॥४३॥
स्तुवन्ति भूपतिं यत्र, मुमुक्षुमिव सज्जनाः ।
सदा शान्तयशःस्तम्भं, नानादेशविहारिणम् ॥४४॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नृपाज्ञापालका नित्यं, नितान्तचरणोद्यता ।
यद्राज्ञः पृतना भाति, यतिश्रेणिरिवाऽमदा ॥४५॥
यदीयनामश्रवणेन वैरिणः, चण्डप्रतापा अपि यान्ति दूरतः ।
मदेन मत्ता अपि सामयोनयः, कण्ठीरवस्याऽभिमुखीभवन्ति किम् ॥४६॥
नीत्या युतोऽपि विनयी सुकरोऽप्यदण्डः,
सश्रीगृहोऽप्यपरमः सुदमोऽप्यजेयः ।
यस्मिन् विभाति स महाधिपतिः प्रजानां,
निःशेषदिग्जिदपि यो विषयेष्वसक्तः ॥४७॥
मुखमार्गितदानाप्ति-धनीभवद्वनीपकाः ।
जिनोक्ततत्त्वनिष्णाताः, त्वदाज्ञापालनतत्पराः ॥४८॥
साक्षाद् वैमानिका देवा, रूपसौभाग्यसुन्दराः ।
यत्र भान्त्यार्हताः पूता-स्त्वन्नामस्मृतिकारकाः ॥४९॥ युग्मम् ॥
एकातपत्रतापत्र-निजाज्ञाया विजृम्भते ।
रम्भास्पर्द्धिवधूलोके, चारुप्रासादमण्डिते ॥५०॥
स्वस्वधर्मरताशेष-जनमण्डलमण्डिते ।
अलकापुरसंकाशे, पूज्यपादोपशोभिते ॥५१॥
जिनमन्दिरराजिष्णौ, **जीर्णदुर्गाह्वये** पुरे ।
श्रीमच्चरणराजीवैः, पावनेऽनिशसुन्दरे ॥५२॥ युग्मम् ॥
विज्ञातनवतत्त्वादि-चारुश्राद्धसमन्वितात् ।
मेदिनीकामिनीभूषा-मणेः **पत्तन**पत्तनात् ॥५३॥
इलातलमिलन्मौलिः, शिशुभ्योऽणुतमः शिशुः ।
सञ्ज्ञया **लब्धिविमलो**, बद्धाञ्जलिपुटस्सदा ॥५४॥
विशाखचक्षुःप्रमितैरदोषैः, सुवन्दनैः शुद्धमनोऽभिवन्द्य ।
सप्रीति सोत्साहममन्दभक्ति, विज्ञप्तिकामातनुते प्रमोदात् ॥५५॥
यथाकृत्यं सदा चाऽत्र, प्रत्यूषे प्रौढपर्षदि ।
श्री**प्रवचन**पूर्वस्य, **सारोद्धार**स्य वाचना ॥५६॥
सद्वृत्तवृत्तियुक्तस्य, तथा पठनपाठनम् ।
साधूनां श्रावकाणां चो-पधानवहनं महत् ॥५७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इत्यादिविलसच्छर्म, धर्मकर्म सुनर्मकृत् ।
सञ्जायते महामहं, निरपायं निरन्तरम् ॥५८॥
क्रमायातं तथा पर्व, श्रीमत् **पर्युषणा**भिधम् ।
हंसानामिव लोकानां, सदा मानसवल्लभम् ॥५९॥
मार्तण्डवत् पङ्कनिराशकस्य, समीरणस्येव रजोहरस्य ।
सङ्कल्पितानल्पमनोरथस्य, प्रदानदक्षस्य सुपर्वशाखिवत् ॥६०॥
महार्थयुक्तस्य निधानवत् तथा, विचित्रवर्णस्य पयोजराशिवत् ।
अलब्धमध्यस्य पयोधिवच्चा-ऽचिन्त्यप्रभावस्य महामणीवत् ॥६१॥
**श्रीकल्पसूत्र**स्य नवक्षणेषु, नवक्षणेषूत्तमसङ्घसाक्ष्यम् ।
प्रभावनापूर्वकवाचनोद्य-दुद्घोषणाऽमारिमृदङ्गकस्य ॥६२॥
तथोत्तमानां तपसां प्रवर्तन-मनेकपक्षक्षपणादिकानाम् ।
निवर्तनं चाक्रिककुम्भकारा-यस्कारधावद्रजकादिकर्मणाम् ॥६३॥

[एतावदेव पत्रं लिखितं भाति]

—x—

ला. द. विद्यामन्दिर - अमदावाद
(मुनिश्रीधुरन्धरविजयजी द्वारा)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ४८ )

# श्रीरङ्गविजयलिखितं विज्ञप्तिपत्रम् (त्रुटितम्)

द्व्यणुकसमवायिकारणरङ्ग**विजयः** सविनयं सस्नेहं विधिवद् विज्ञप्तिपत्रं प्रपञ्चयत्यपरम् । शतशः नतिरवधारणीया । श्रीजितां प्रसाद्या । किञ्च श्रीमदाचार्यवर्याणां सुखस्नेहयुक्तं पत्रमत्र प्राप्तम् । संप्राप्याऽद्वैतानन्दः समजनि । किञ्चात **आनन्दपुरसत्कगोकला**भिधबलिभुगृहस्ते पत्रमेकं प्रेषितम् । तन्मध्ये **गूढपाट**सत्कमुदन्तमण्डललिखितमासीत् । किञ्चातः पत्रमेकं **जगत्तारण्यां** पत्रमेकं **शुद्धदत्या**मेवं पत्रत्रयं लिखितम् । तत्प्राप्तं लिखनीयम् । किञ्च **सप्त-छदी-वन्ध्यपुर-घ्राणपुर-देवसूरि-नाडूल-खीमेल-सांडेराव**प्रमुखसमस्तश्राद्धाः श्रीजितां श्रीमदाचार्यपुङ्गवानां विशेषानुरागिणः सन्ति । संयतयो(त्यो)ऽपि तथैवेत्यवधार्यम् ।

पक्षद्वयं नाऽत्र वरीवरीति । स्वप्नेऽपि नैवं हि विचारणीयम् ।
समस्तसाधुः किल श्रावकौघो नित्यं च युष्मद्वचनानुयायी ॥१॥

इत्यवधार्य पुनरपि पत्रप्रेषणेन मनो मोदनीयम् । किञ्च उ० **श्रीसौभाग्य-विजयानां पं. विमलविजयानां पं. प्रेमविजय-ग. लाभसागर-मु. लक्ष्मीविजय-साध्वीहीरश्री**प्रमुखसाधुसिन्धुराणां नत्यनुनती प्रसाद्ये । किञ्चातः **पं. श्रीउदयविजयगणीनां मु. तिलकविजयस्य** च प्रणतिरवधारणीया । मदुचितं कार्यं चाऽर्प्यम् । शिष्योऽस्मि, सेवकोऽस्मि, किङ्करोऽस्मि । किं बहु-लिपिकरणेन ? प्रभवो ज्ञातारः । पत्रं तूर्णं लिखितमिति बोध्यम् । जिनेन्द्रचन्द्र-प्रणामावसरे श्रीमदाचार्याधीश्वराणामभिधानं वारंवारं गृह्यते तदवधारणीयम् । अत्रत्यसङ्घस्य प्रणामोऽवधारणीयः । श्रीजितां विशेषानुरागीत्यवधार्यम् । पारणके श्रीजितां वन्दनेच्छा विशेषतोऽस्ति । पश्चाद्यथा श्रीजितां यथाज्ञा तथा विधीयते । किञ्च प्राग्वाटपक्षीय उ. **श्रीमानविजय**गणीनां नतिरवधारणीया । श्रीजितां प्रसाद्या नामग्राहं **यादवाधीश्वरं** प्रत्यहं प्रणौमीत्यप्यवधार्यम् । वलमानं पत्रं प्रदेयम् । मनसा न हेयम् । आश्विन-सिताष्टमीदिने इति मङ्गलमालिका ॥

[पत्रस्याऽस्य प्रारम्भिकांशस्य छायाकृतिः (Xerox) न सम्प्राप्ता ।]

—x—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(४९)

# श्रीरूपचन्द्रलिखितं विज्ञप्तिपत्रम् (अपूर्णम्)

स्वस्तिश्रियाऽन्वितो दद्यान्, नो नाभेयः स शं जिनः ।
व्यधाद् यशोगतं विश्वं, यस्य खेऽब्जमिषात् शुचिम् ॥१॥
देवाल्यालिर्लसद्वक्त्र-सरोजं किमु सेवते ।
केशपाशमिषात्(द्) युष्मद्-वचःपरागलुब्धधीः ॥२॥
केशपाशमिषेना(णा)ऽयं, खड्गोऽधारि जिन! त्वया ।
दुष्टाष्टकर्मशत्रूणां, स्कन्धेऽतिपाटनाकृते ॥३॥
किं भुजङ्गोऽभजद् वैनं, केशपाशमिषाज्जिनम् ।
युष्मद्वक्त्रस्थितब्राह्मी-सुधास्वादस्पृहालुधि(धीः?) ॥४॥
कामाद्रेः किंकृतेऽधारि, जिनर्भुक्षिभिदुस्त्वया (?) ।
स्कन्धे केशजटादम्भात्, श्यामो नीलमणीमयः ॥५॥
प्रभो! स्कन्धे विलिप्तोऽयं, यक्षपङ्कः सुरेश्वरैः ।
तर्कयन्तीति तत्त्वज्ञाः, बाढं रसिकयाऽनया ॥७॥
परीहासकृते रम्या, ब्राह्मया च कमलास्यया ।
फलिन्या खलु जानेऽहं, प्ररोपिताऽऽम्रतानिनी ॥८॥ युग्मम् ॥
चन्द्रसूर्यौ तुदत्येवा-ऽपवादोऽस्तीति भूतले ।
तत्स्फेटय जिनाधीश!, मेचकत्वं च मे पुनः ॥९॥
विधुन्तुदो विभुं सेवे, विज्ञप्तिं प्रविधित्सया ।
समेत्य विष्णुपदात् क्रूरः, केशानां छलतः सदा ॥१०॥ युग्मम् ॥
एनं श्रीनाभिसन्तान-देवाद्रिदेवपादपम् ।
नाभेयभृङ्गमानाय-मानम्य प्रणाम(पद)पङ्कजम् ॥११॥
**ईडरनगरी**सञ्ज्ञा, पूता सद्भिर्विराजते ।
श्रीतातचरणाम्भोजैः, कैलासभूरिवेश्वरैः ॥१२॥
पौरन्दरीपुरीयं वा-ऽधरागा राजते परा ।
तत्स्वरूपं विधाय द्राग्, गुरोर्वदनमीक्षितुम् ॥१३॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्राप्यमाना पराभूतिं, भूमौ निजश्रिया यया ।
स्थिता गताऽपि चैकान्ते, स्वर्गे प्रणश्य लज्जया ॥१४॥
स्वर्गपुरी जपन्तीव, मन्त्रं सुप्रकटाक्षरम् ।
प्राप्तुं तदुपमानत्वं, सुपर्वगणनिक्वणैः ॥१५॥ युग्मम् ॥
निधीशितुर्गिरेः शम्भोः, जानेभ्यता(?) वरा पुरी ।
वीक्षितुं कौतुकश्रेणिं, गन्धमाना तलेऽखिले ॥१६॥
तत्र श्रीमति सद्भूत-शोभासम्भारभासुरे ।
समस्तसम्पदां गेहे, जैनविहारशालिनि ॥१७॥
विहाया(यः)श्लेषिप्रोत्तुङ्ग-शृङ्गाग्रशालशालिनि ।
श्रीतातपादपाथोज-रजतः पूतभूतले ॥१८॥
पुंस-स्त्रीरत्नपाथोधौ, स्वर्णमाणिक्यमन्दिरे ।
समस्तपूःशिरोरत्ने, **ईलादुर्गाह्वये** पुरे ॥१९॥
वापी-वनी-तडागौघ-कूपा-ऽऽरामविराजितात् ।
विद्वज्जनावलीरम्यात्(द्), नाभेयचैत्यशोभिनः ॥२०॥
श्रीमद्देवगुरूपास्ति-तत्परपरमार्हतात् ।
कल्याणकमलाका(की)र्णात्(द्), **डभोकग्रामतः** शुभात् ॥२१॥
सानन्दं ससमुल्लासं, सोत्कण्ठं भक्तिनिर्भरम् ।
सप्रान्तं प्रेमप्र(प्रो)त्कर्ष-नतसर्वाङ्गमस्तकम् ॥२२॥
प्रमोदान्वितचेतस्को विनेयसर्षपोपमः ।
तथा सविनयं भाल-स्थलस्थाणु(न)कृताञ्जलिः ॥२३॥
पद्मपाणिमितावर्त-वन्दनेनाऽभिनम्य च ।
विज्ञप्तिं कुरुते कामं, **रूपचन्द्र**शिशुस्तथा ॥२४॥
कृत्यं चाऽत्र यथा पूर्वा-चलचूलावलम्बिना ।
भूरिभाभासुरीभूते, भूतले भानुशालिना ॥२५॥
हर्षोत्कर्षसमुल्लासि-सभ्यशोभितसंसदि ।
**श्रावकप्रतिक्रमण-सूत्रवृत्तेश्च** वाचनम् ॥२६॥
अधा(धी)त्यध्यापनं सप्त-क्षेत्रार्थवपनं तथा ।
भूरिप्रभावना-याच्ञा-गतलोकार्थपूरणम् ॥२७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पाक्षिकादिमसत्पर्व-पौषधादिकदेहिनाम् ।
मिष्टान्नपान-दानं वा-ऽमारिडिण्डिमघोषणम् ॥२८॥
चतुर्थादिमषष्टाष्ट-माष्टाह्निकादिपक्षका ।
दुस्तपःतपनं जन्तु-जातघातनिवर्तनम् ॥२९॥
भूरिलम्भनिका निष्का-द(दा)नं रागादिशामनम् ।
सप्तदशप्रकाराढ्यं, प्रभूतार्चाविधापनम् ॥३०॥
नानातूर्यालिनिर्घोष-महामहःपुरस्सरवम् ।
चैत्यपाटीविधानं स्म, **वार्षिकं पर्व** जायते ॥३१॥
इत्यादि श्रेयसः कर्म, निःप्रत्यूहतयाऽभवन् ।
श्रीमतां प्रभुपादानां, प्रसादोदयतो परम् ॥३२॥
तमःस्तोमः पदं चक्रे, श्रीकण्ठकण्ठकन्दले ।
कान्तिदम्भाद् यथा युष्मत्-प्रतापभानुना जितः ॥३३॥
कान्दिशीका निते(स्ते)जस्का, गल्लपल्लसमन्विताः ।
कुवादिनाभजनूभूम दृश्यमानां च कांश्चनः(?) ॥३४॥
प्रचण्डतापसंयुक्तं, प्रतापं च यतिप्रभोः ।
चङ्गं प्रचण्डमार्त्तण्डं, समीक्ष्येवाऽत्र कौशिकाः ॥३५॥ युग्मम् ॥
युष्मत्प्रतापतापेन, प्रास्ताभामहिमो यथा ।
पश्चिमाब्धौ ददौ झम्पां, सायंसूर्यः सलज्जकः ॥३६॥
सूर्यो नन्नाम्बुसम्पातं, तपस्तीव्रं दधात्ययम् ।
आलम्बन(नं) विना व्योम्नि, समागतः क्षमालयात् ॥३७॥
त्वत्प्रतापास्तमाहात्म्यो लज्जितः श्रमणप्रभो! ।
युष्मत्प्रतापसादृश्यं, सम्प्राप्तुं च निरन्तरम् ॥३८॥ युग्मम् ॥

किं वा वरं वरीतुं.....

—x—

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर
सूरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## (५०)

# विज्ञप्तिपत्रम् (त्रुटितम्)

[...]यसारकासारस्थास्नुप्रसृमरशंवरभरसमानन्धमानविवेकिजनमनोमरालजालान् असमानलसमाननिरवगानविविधबुधविधिविधीयमानगौरवगानज्ञानविज्ञानविशदसंपदास्पदपरमदर्शनविविगतविपदुपस्पर्शनत्रिदिवशिवरमारमणीयविश्वस्पृहणीयपरमतमसुखसङ्गमहृदयङ्गमविलासं(स)चङ्गिमदर्शनसन्निदर्शनान् संसारासारदुःप्रापपारपारावारपारप्रापणप्रवणवहित्रान् भव्यजीवराजीवराजीवमित्रान् पवित्रविचित्रपुण्यसत्रजनाज्जेगु(?)जातपरममित्रचारुचारित्रप्रगुणगुणानणुसम(मु)ल्बणमणिश्रेणिसमाश्रयणाचिरत्नरत्नाकरान् निरवद्यहृद्यपद्यगद्यनिषद्यचातुर्विव्य(चातुर्विद्य?) निश्छद्मपद्मासद्मपद्ममधुरतरमनोहररससमास्वादषट्पदललितलावण्यलीलाधरान् कमनीयकान्तसतताविश्रान्तनिर्भ्रान्तमञ्जुलसमुज्ज्वलभावनिशान्तसौरभसंरम्भसंशोभमानकोविदरोलम्बकदम्बकीर्तनीयकीर्तिकोमलकेतकीवासितचराचररुचिरकाननान्तरान् तरलसरलाविरलतारकानायकानिव मदीयहृयदे(हृदय?)कुम(मु?)दकमनीयकाननविकसनतत्परान् नयविनयदक्षदाक्षिण्यपुण्यपुण्यनैपुण्यविवेकविचारवावल्प(?)कल्पप्रचारसारपरोपकारव्य(?)नित्य वैयावृत्त्यकृत्यकक्षीकारकप्रमुखगुणगणमणिविपणिपणान् निस्तुलमुक्ताफलशशिमण्डलसुरसरिज्जहिमाचलोपलगोदुग्धोज्ज्वलयशःपूरकाचकर्पूरदलपरिमलपरिमलितदिगङ्गनाहृदयस्थलान् तत्तादृक्षसुलक्षवलक्षतमे विपक्षक्षयबद्धकक्षतपःसहस्रकरप्रकाशविकाशितपण्यपुण्यकमलमण्डलान् परमप्रशमशं(सं)यमनिरुपममनोरमविशदकुमदकान[न?]क्रीडारसलालसकलहंससप्रशंसलीलासंधायकान् अनवद्यविद्यासदास्वाद्यफलपटलाविकलवल्लीवितानिरुपनं(म)रसास्वादसुखानुभवविधायि(य)कान् परमरङ्गदुत्तुङ्गतोद्वेगसंवेगभङ्गीसधरबन्धुरसुधारसोत्साहप्रवाहसेसिच्यमानविद्वच्चयहृदयसारकेदारवारपण्यपुण्याङ्कुरपूरान् प्रणयिसकतै(?)हिकामुष्मिकमनोमतकदम्बकसंप्रतिपादनतिरस्कृतसुरतरूणां श्रीगुरूणां पादपद्मविशदंप्रशदतः(विशदप्रसादतः?) । विध(पु?)लमङ्गलावलीमल्लिकावल्लिकाविकासवलितमात्रश्रीपूज्यपादप्रसादाम्बुदोदयतः समुपेयिवान् राजहंस इव रमणीयवर्णरूपः शुभमयस्वरूपः श्रीमतां लेखः । समजनि तद्दर्शनादस्माकं साकं श्रीसङ्घेन मनसि प्रसृमरप्रमोदोल्लेखः । श्रीवर्धमान-

Jain Educationa International    For Personal and Private Use Only    www.jainelibrary.org

श्रीवर्धमानशासनगगनाङ्गणविराजमानश्रीचन्द्रकुलगणश्रीगुरुमहिमान्व(व?)ति कमलालताविततिसमुल्लासनसजलगर्जनघनाघनसमानाध्यवसायस्य श्रीसमुदायस्य सादरं सकलपापसन्तापावनिर्वापचारुहरिचन्दनानुवादनश्रीधर्मलाभाशीर्वादेन समभिनन्द्य निरवद्यमुपदिशन्ति । प्राप्ता श्रीसमुदायप्रहिता सहृदयहृदयहिता सज्जनमनः-प्रीणनद्र(प्र?)वीणसमाचारसम्भारसारमाणिक्यमणिवारमदाधारमञ्जूषाकारा भविक-नयनानन्दसुधारसधारसधारानुकारा सयुक्तिभक्तिव्यक्तितारा विज्ञप्तिका ॥ श्रीसमुदाय-सक्तश्रीपुण्यपुण्यनिर्वाहचिन्ताचञ्चरीकप्रियतमा श्रीगुरुमानससरोजे सदाविलासलीला-लसा क्रीडां कलयति । समयाञ्चितविवेकदानम्लानीकृतसुरसुःभी(?) कुम्भ-भूरुहमणिमहिमासमवायस्य श्रीसमुदायस्य । तान् श्रीमद्वर्धमानजिनशासनप्रभावनो-द्भासनमहोत्सवसन्तानकडम्बकाननवितानसर्वाङ्गीणकजलाकेलिप्रतानविधानधरबधुर-(बन्धुर) भाद्रपदाम्भोधरानुकारशोभाधरान् श्रीयुगप्रवरागमपदवीरमारमणीयवु(व)र-रमणीक्रीडाविलाससुदर्शनभूधरान् । समाजगाम सुधाधानवन(न्न)यनानन्दजनकः सकलाविकलसमाचारवारिराशिसमुल्लासकः कृष्णाकु(क्ष?)रलाञ्छनरेखः श्रीपूज्य-पादप्रसादीकृतलेखः । सप्रकाशीबभूव ततः समस्तस्वरूपसमुले(ल्ले)खः ।

लोकालोकविचारसाररुचिरं संसारतृष्णाहरं,
सिद्धान्तामृतसागराद् वरतरं लात्वाऽर्थनांरोत्करम् (ऽर्थरत्नोत्करम्)
यद् व्याख्यावरवर्षणेन सततं सिञ्चन्ति भव्यावनिं,
ते धाराधरसोदरा घनतरं नन्दन्तु सूरीश्वराः ॥१॥
स्वच्छावदातशत[प?]त्रारिभरेण पूर्णाऽगण्याऽतिवर्ण्यगुणवीचिविराजमाना ।
धर्मैकसज्जनपावनाय, यत्कीर्तिदेवतटनी प्रसांसार लोके ॥*
शुभं भवत्(तु) लेखक-पाठकयोः ॥

[पत्रस्याऽस्य प्रारम्भिकांशस्य पत्राणि न सन्ति]

—x—

अभय ग्रन्थसङ्ग्रह
बीकानेर
४५९१६

---

★ श्लोकोऽयमशुद्धः प्रतिभाति-सं. ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

( ५१ )

# विज्ञप्तिपत्रम् (त्रुटितम्)

तथा प्रथाप्राप्तगुणैर्गुणाना-मप्याश्रयैस्तद्गणनामतीतैः ।
वैशेषिकं शैषिकवन्मतं ये, प्रमाणमार्गच्युतमादिशन्ति ॥१॥

श्री**हेम**नाम्नः कविराजराजा, व्याजाद् विदूरे प्रणतान्वराजा ।
सुनीतिषु प्रीतिभृतोऽभिरूपाः, श्री**प्रीति**शब्दाद् **विजया**गुणाढ्याः ॥२॥

वैमल्यभाजो हृदये _ यत्या-श्छायामनायासतया श्रयन्तः ।
प्राज्ञेषु मुख्या **विमले**तिशब्दान्, पदं दधाना **विजये**ति युक्तम् ॥३॥

श्रीमद्गुरूणां बहुभक्तिनार्या, स्तनोपपीडं सततावगूढाः ।
रूढास्तपोभिर्**महत्तोदये**ति-शब्देन युक्ता **विजया** जयन्ति ॥४॥

अब्धिः स्वरूपाद् विविधार्थलब्धेः, स्तब्धेतरः श्रीगुरुपादलीनः ।
**लब्धेः** पदात् श्री**विजयो** नयानां, निधिर्मतीनामवधिः कवीन्द्रः ॥५॥

सेवारसे वासितचेतसस्तद्-**भाग्येन सौभाग्य**पदा गणीन्द्राः ।
गणस्य भारोद्वहने फणीन्द्रा, **दया**दिनाम्ना **विजया**स्तथाऽन्ये ॥६॥

**प्रताप**पूर्वं **विजया** गणीशा, ज्ञातास्तथा ज्ञातचराभिधानाः ।
परेऽपि सर्वे मुनयो मदीया-नुनामकाप्रस्थितिभिः प्रमोद्याः ॥७॥

अत्रापि बुद्धास्सुविशुद्धबोधा, **आनन्द**पूर्वा **विजया**भिधानाः ।
सत्तत्त्वतत्त्वाध्यवसायरक्ताः, श्री**तत्त्व**पूर्वं **विजयाः** प्रवीणाः ॥८॥

छेका विवेकाद्यतिरेककार्ये, **विवेक**नाम्नो **विजया** हि धीराः ।
मेरुप्रभाः स्थैर्यविधासु विज्ञा, **मेरोः** पदात्ते **विजयाः** प्रसिद्धाः ॥९॥

मणिर्गणि _ _ तसुस्नवर्गे, सुरङ्गरङ्गाद् **विजयो** जय _ ।
**जया**दिनाम्ना **विजयः** सशोभः, **सौभाग्य**पूर्वं **विजयः** क्रियावान् ॥१०॥

पुण्योदयप्राज्यमतिः प्रतीतः, प्रज्ञाभिनीतो **विजयो मते**श्च ।
रत्नत्रयीरत्नधरोऽथ **रत्नाद्**, वाचंयमोऽयं **विजयः** स्वनाम्ना ॥११॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इत्यादयः सर्वजने(ना)भिवन्द्या-स्तपोधना बोधनकर्मशूराः ।
भक्त्या त्रिसायं गुरुपादपद्मं, नमन्ति _ मनिबद्धरङ्गाः ॥१२॥

सङ्घोऽपि सर्वोऽनघपुण्यवृत्ति-स्त्रिसायमीशं नमति प्रसह्य ।
सदाऽवधार्यं तदिहार्यधुर्यै-र्धैर्येण सौवर्णगिरेरहार्यैः ॥१३॥

विशिष्य शिष्ये विनयाद् भुजिष्ये, कृपासुधावृष्टिविधायिदृष्ट्या ।
सदा प्रमोदः प्रतिपादनीयः, प्रसादनीयैर्गुरुराजराजैः ॥१४॥

आज्ञाविधेये जनताभिवन्द्यै-र्विधेयमुद्दिश्य निदेश्यमस्मिन् ।
भवेत् समर्थः सकलः प्रभूणा-मादेशमासाद्य यतोऽसमर्थः ॥१५॥

यः पादपाथोरुहसेवनेन, वृद्धः प्रसिद्धोऽजनि वा स्वदृष्ट्या ।
यो मन्यतेऽनन्यदिशा ह्यधीशं, विस्मारणीयः स कदापि न स्यात् ॥१६॥

हिते नियोगाय तमेहितेऽपि, चिरं प्रयोगाय शिशोः प्रसाद्यम् ।
पत्रं प्रसादार्थदृशा पवित्रं, चित्रं विशेषैः परमेज्यरूपैः ॥१७॥

गतिः प्रभुर्मेऽस्ति मतिः प्रभुर्मे, ध्येयं विधेयं शतशोऽभिधेयम् ।
प्रकाशरूपं हृदये निधेयं, मूर्तं विशेषादिव भागधेयम् ॥१८॥

लेखः पार्वण एष शीतरुचिवच्चञ्चत्कलावानपि,
दोषासक्तिकलङ्कितो ननु भवेज्जातोजडध्या _ यात्
सौरस्पष्टकरप्रसङ्गवशतः प्राप्तोदयं _ जनै-
र्वन्द्य _ _ _ _ मुदे प्रतिपदं भूयान्महामङ्गलम् ॥१९॥

[पत्रस्यैतावन्मात्रभागस्य छायाकृतिः (Xerox) अस्माभिः संप्राप्ता ।]

—x—

(मुनिश्रीधुरन्धरविजयजी-सङ्ग्रहगत)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(५२-५४)

# श्रीविजयप्रभसूरिप्रणीताः प्रसादपत्र्यः

(१)

स्वस्तिश्रीलहरीलसद्द्युतिरहो सौभाग्यभाग्यैकभूः
प्रोत्सर्पत्सुयशःसमुज्ज्वलमहाकल्लोललीलोच्चयः ।
विज्ञाताखिलभावभास्वदतुलज्ञानामृतान्तर्भृतः
स श्रीमान् श्रियमातनोतु भगवत्क्षीरोदधिः सन्निधिः ॥१॥
स्वस्तिश्रिया संश्रितमंह्रिपद्मं, त्रैलोक्यलोकार्थितमोक्षपद्मम् ।
सेवे यदीयं मकरोऽङ्कदम्भात्, सोऽस्तु श्रिये श्रीजिन**पुष्पदन्तः** ॥२॥
स्वस्तिश्रियां निधिरसावनिशं समन्ता-न्नानातमांसि हरते जगतां महोभिः ।
सत्यं प्रमोदवशतो विदधे विधात्रा, श्रीपुष्पदन्त इति नाम ततोऽस्य लोके ॥३॥
स्वस्तिश्रियं दिशतु सज्जनसेव्यमानो, गम्भीरिमासुगुणरत्नगणैर्गरीयान् ।
स्पष्टं समुद्र इव नैकजडैरलक्ष्य-स्तीर्थोदयो हि सुविधिर्मकराङ्क आप्तः ॥४॥
चित्रं पवित्रं प्रणयञ्जनानां, पराजितो वाऽप्यपराजितोऽक्षैः ।
श्रीपुष्पदन्तो जयतादहोषा-करोऽपि दोषाकरकान्तिकान्तः ॥५॥
वाचस्सतां पान्तु पवित्रमूर्त्ते-र्धर्मोपदेशे सुविधेर्जिनेशः ।
दन्तच्छदोद्यद्द्युतिमिश्रिताः किं, गङ्गातरङ्गास्तरुणार्कभासः ॥६॥
स्याद् धर्मिणीति प्रवदन्ति धर्मः, चन्द्रप्रभे तत्त्वमसत् प्रबुद्धाः ।
विलोकयन्तः सुविधौ सुचन्द्र-प्रभत्वसाक्षात्करणाज्जिनेशे ॥७॥
यस्य स्फुरत्पादपयोजयुग्म-नखांशवस्सन्तु समस्तसिद्ध्यै ।
मन्ये समन्ताद् दशदिक्पदार्थ-प्रकाशदक्षास्तु मणिप्रदीपाः ॥८॥
यदीयपादद्वयकान्तिपुञ्ज-जलप्रवाहे पतितोऽपि भव्यः ।
समीहितस्थानमुपैति चित्रं, महानुभावो महतां हि लोके ॥९॥
यन्नाममन्त्रमयमङ्गभृतां नितान्तं, सत्कामकुम्भति सुरद्रुमति त्रिलोक्याम् ।
सार्वः स कन्दलयतूत्तममोदवृक्षं, चित्रं त्वकं दलयतूच्चयशःप्रवादः ॥१०॥
यत्पादनीरजनखद्युतिदीप्रदीपा-दानम्रकम्रजगतीजनतातमांसि ।
नश्यन्त्यवश्यमनिशं प्रबलप्रकाशात्, सम्पद्घटां घटयताच्छमताघटोऽर्हन् ॥११॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तं श्रीमन्तमनन्तधर्माध्यासिताविकललोकालोकविलसत्पदार्थसार्थाकलन-कुशलकेवलज्ञानदिवाकरं प्रचण्डोद्दण्डाखण्डब्रह्माण्डभाण्डोदरोद्यद्यशस्त्रिदश-तरङ्गिणीतरङ्गाभङ्गनीरपूरप्रवाहपवित्रीकृतदशदिगन्तरं प्रबलविमलध्यानविकराल-कालकरवालकवलितजगज्जनदुर्जयकलाकेलिकलाकलापप्रसरं भक्तिभरप्रणमदमर-कोटीकोटीरकोटिसण्टङ्कितमणिकिरणमण्डलजलकल्लोलान्तरालसमुल्लसदधिक-दीप्यच्चरणपुष्करं हर्षोत्कर्षप्रकर्षप्रसिद्धसिद्धिरमणीरमणीयप्राणाधीश्वरं जगज्जनता-हितकरं श्री**सुविधि**जिननायकपुरन्दरं प्रणामार्कसोदरस्कन्धमध्यमध्यारोप्य **श्रीद्वीप-बन्दिरात् श्रीविजयप्रभसूरयः** सबहुमानमालापयन्ति –

यथाप्रयोजनञ्चाऽत्र प्रातःप्रकटप्रभासम्भारसारशृङ्गारशृङ्गारितदिग्दन्तावल-दन्तालये विकसितकमलवनसमुच्चलत्परागपुञ्जपिञ्जरितभूवलये स्वकरार्धचन्द्रितया-मिनीकामिनीसङ्गरङ्गरसिकरोहिणीप्रिये प्राञ्चदपूर्वपूर्वाचलचूलासम्प्राप्ताभ्युदये श्रीसहस्रकिरणोदये सति महेभ्यसभ्यसंशोभितायां सभायां प्रवर्त्तमानसमस्तसिद्धान्त-स्वाध्यायविधानक्रमायातो**त्तराध्ययनसूत्र**स्वाध्याय-**श्रीतार्त्तीयीकाङ्गसूत्रवृत्ति**-व्याख्या-साधुसाध्वीप्रारब्धाध्ययनाध्यापन-सानन्दनन्दिमण्डन-सश्रद्धश्राद्धश्राद्धी-जनोपधानोद्वाहन-सब्रह्मब्रह्मव्रतसमुच्चारण-सोद्यापननानातपष्करणमालारोपण-दीनोद्धरणादिसुकृतकृत्यसमुदये सोदयं सञ्जायमाने परिपाटीप्राप्त**श्रीमदाब्दिकपर्वणि** सकलजीवामारिप्रवर्त्तन-कुकर्मनिवर्त्तन-समस्तसङ्गीतगीतनीतिरीतिनटनटन-समकालीनवादितवादित्रमाद्यज्जिनभवनपवित्रस्नात्राद्याचारचारिमसप्रभेदसर्वीयस-पर्याविरचन-नानादुस्तपतपस्तपन-सप्रभावप्रभावनाभवन-नवनवक्षणनवक्षण-कल्पद्रुकल्प**श्रीकल्पसूत्रवृत्ति**वाचन-सोत्सवातुच्छसाधर्मिकवात्सल्यविधान-मार्गणगणमार्गितार्थप्रदान-साडम्बरचैत्यपरिपाटीप्रकटनादिधर्मकर्म सशर्म समजनिष्ट श्रीमद्ध्येयध्यानानुभावात् ।

अपरं शुभवतां _ _ _ _ _ _ _ तकृतां कृतान्तनिपुणमतीनां सौवाङ्गान्तिषद्वार्त्तवार्त्तावावदूकः पर्वलेखस्समागात् । समवगतं च तत्प्रमेयपटलम् । किञ्चाऽस्माकमनुनतिर्ज्ञेया ज्ञाप्या च निकटवर्त्तिनाम् । सकलसङ्घस्याऽस्मद्धर्मलाभो वाच्योऽस्मन्नामग्राहं श्रीजिनपतयः प्रणम्याः । विजयदशम्यामिति श्रेयः ।।

—०—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्वस्तिश्रियाऽर्हन्तमनन्तभक्तं, संसेव्यमानं जगदर्चनीयम् ।
श्लोकप्रतापैर्जितपुष्पदन्तं, **श्रीपुष्पदन्तं** प्रणिपत्य सम्यक् ॥१॥
**हल्लारदेश**क्षितिपालमौलि-कोटीरहीराभरणोपमाने ।
श्रीमित्रपादाब्जरजःपराग-सौगन्ध्यप्राप्ते **नगरे नवीने** ॥२॥
श्रीपूज्यसद्दर्शनरागरक्त-समस्तमर्त्याद्भुतलक्ष्मिसौख्यात् ।
**द्वीपात् पुरो बन्दिरतो** विधेयः, कृताञ्जलिर्विज्ञपयत्ययं हि ॥३॥
यथाऽत्र जन्यं जनपूजनीय-श्रीमद्गुरूणां चरणद्वयस्य ।
कल्पद्रुमस्येव सुसेवनायाः,सदा वरीवर्त्ति सुखं चिदादि ॥४॥
सौभाग्यसौन्दर्यगभीरिमादि-सुरत्नरत्नाकरसन्निभानाम् ।
काव्या कवीनां कविकोटिराज्ञां, सुधीवराणामपि धीवराणाम् ॥५॥
सत्प्रेमपत्रं भवतां मयाऽऽप्तं, प्रहर्षहर्षोदयकृद् हृदन्तः ।
स्वाङ्गान्तिषद्वार्त्तविशेषवार्त्ता-प्रवृत्तिसंसूचकमिष्टदिष्टम् ॥६॥
ममाऽवधार्या प्रणतिस्त्रिसायं, कृपापरैस्सौम्यनिरीक्षणैश्च ।
सद्यः प्रसाद्यः पुनरप्यमन्द-प्रसादलेखः सततं प्रसन्नैः ॥७॥
मित्रोचितं कृत्यमशेषकृत्य-विद्भिः प्रसाद्यं मनसा प्रसद्य ।
सर्वीयनामक्षण एव नित्यं, स्मार्यः सुहृत् सज्जनवृन्दसिंहैः ॥८॥
अत्रत्यसङ्घः सकलोऽपि भक्तः श्रीमित्रपादान् ननु नंनमीति ।
गुणानुरागी पुरतो गुरूणां, भवद्गुणान् वक्ति सदेति भद्रम् ॥९॥
पूज्याराध्यमहाप्राज्ञ-सभामण्डनसद्धियाम् ।
श्रीमत्**सौभाग्य**पौरस्त्य-**विजया**नां हि पत्रिका ॥१०॥ [अनु०] ॥छ॥

—x—

ला. द. विद्यामन्दिर
अमदावाद
सू. ४३४०८

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(२)

स्वस्तिश्रिया युक्तमसेवि यस्य, स्वभ्रातृशङ्खाश्रितमंह्रिपद्मम् ।
सल्लक्ष्मदम्भान्न हि दोषदुष्टं, श्रेयःश्रिये स्ताज्जिननेमिनाथः ॥१॥
स्वस्तिश्रिया यस्य पदारविन्दं, धाराधरं चञ्चलयेव शश्वत् ।
व्याप्तं समस्तं हरिणेव विश्वं, जीयादयं नेमिजिनो जगत्याम् ॥२॥
स्वस्तिश्रिये स्ताज्जिननेमिनेता, स्वर्भूर्भुवोलोकतमोऽपनेता ।
त्यक्ता मृगाक्षी मृगरक्षणत्वा-दाजन्मरागिण्यपि येन मङ्क्षु ॥३॥
कस्तूरिकाऽत्यन्तमहार्घ्यमूल्या, कृष्णाऽपि यत्कायिकवर्णसाम्यात् ।
शैवं शिवासूनुरनूनसौख्यं, नेमी(मिः) नराणां नमतां विदध्यात् ॥४॥
यद्देहभासः परितः स्फुरन्त्यो, विभान्ति नम्राङ्गभृतां शिरस्सु ।
यवप्ररोहा विजयार्थिनां किं, भूयात् समीहितकृते स जिनो जनानाम् ॥५॥
दूर्वाऽक्षतांश्चेदनिशं दधीत, दन्तत्विषाराजियदङ्गदीप्तेः ।
साम्यं तदाप्नोतु वृषोपदेशे, नेमी सदा मङ्गलमातनोतु ॥६॥
नीलद्युतो यस्य शिरःस्फटाग्रमणीश्रियो नीरदवार्दलान्तः ।
उद्गच्छदुष्णांशुरुचं दधत्यो, मुदं विदध्यादिह नेमिनाथः ॥७॥
चराचरं विश्वमशेषमेवा-ऽमितं प्रभाति प्रतिबिम्बि यस्य ।
चित्रं चिदादर्शतले वलक्षे, सार्वश्चिदानन्दपदं प्रदद्यात् ॥८॥
यत्पादनीरजनखद्युतिदीप्रदीपा-दानम्रकम्रजगतीजनतातमांसि ।
नश्यन्त्यवश्यमनिशं प्रबलप्रकाशात्, सम्पद्घटां घटयताच्छमताघटोऽर्हन् ॥९॥

तं श्रीमन्तं भक्तिभरनमन्नाकिनिकायकोटीरकोटिसण्टङ्कितानेकाप्रत्नरत्नप्रभाप्ररोहसन्दोहरूपापूर्वप्रदीपश्रेणिदेदीप्यमानक्रमकमलं कर्णिकाचलशृङ्गरङ्गद्वन्दारुवृन्दारकवृन्दविहितजन्माभिषेकचलच्चञ्चलसलिलप्रवाहपूरदूरीकृतामध्यममध्यलोकवर्त्तिजनवृजिनपङ्कपटलं नैकप्रकृतिविकृतिस्पष्टदुष्टदुष्ठफलाष्टकर्ममर्मघर्मस्तोमव्याकुलीभूतभूतलप्राणिगणविमलमलयजशीतसितवृषोपदेशपेशलवचनरचनाजलधारासिञ्चनसमुद्भूतप्रभूतयशोवादकर्पूरपूरसुरभीकृतत्रिभुवनतलं सकलमहीमण्डलाखण्डलाखण्डप्रोद्दण्डनिर्देशदासीकृताशेषसीमालभूपालाऽसुद्र(?) श्रीसमुद्रविजयराजराजद्धामधामावतरणत्रिलोकीविश्रुतीकृतयादवकुलं विविधाभिभवभवनवनवनवभवधवस्थेमप्रेमपुलकितहृदयराजीवराजीमतीस्निग्धेक्षणवीक्षणक्षणदत्तवागगोचरा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नन्दमहानन्दपदलीलं **श्रीनेमि**जिनराजं राजमरालमरालतानाकलितप्रणतिमानस-सरस्यन्तरालं समारोप्य **श्रीजीर्णदुर्गात् श्रीविजयप्रभसूरिभिः** सबहुमानमालाप्यते ।

यथा प्रागभावप्रतियोगि चाऽत्र विपुलावकाशाकाशास्थानिकसिंहासनसमासीनदिन-मणीरमणीयमहीपाले निस्सीमसीमन्तिनीविरहव्यथोपशान्तिप्रमुदितावक्रचक्रचक्रवाले तरुणतरणितेजःपुञ्जपिञ्जरीभूतभूतलविभूषावगणितप्रवालकन्दले स्वस्वकर्मकरण-समुद्यतानेकजीवगमागमकलकलारवमुखरितदिग्मण्डले विशाले प्रभातकाले सति जीवाजीवद्रव्यस्वरूपविचारचतुरागण्यगणिमादिद्रव्यकोटीध्वजालङ्कृतगेहराजमान्य-धन्यसामाजिकसमाजे **श्रीपञ्चमाङ्गसूत्र**स्वाध्यायानुसन्धान-**श्रीजीवाभिगमसूत्रवृत्ति**-व्याख्यान-यतियतिनीप्रारब्धग्रन्थाध्ययनाध्यापन-सश्रद्धश्राद्धश्राद्धीजनोपधानो-द्वाहन-मालारोपणा-ऽजिह्मब्रह्मव्रतोच्चारण-दीनोद्धरणादिधर्मकर्म सशर्म प्रावरीवृतीत् प्रवरीवर्त्ति चाऽऽनुपूर्वीसमायातं **श्रीशारदिकपर्वा**ऽपि सुपर्वापि(र्पि)तप्रतिष्ठं सर्वपर्वाखर्वगर्वपर्वतलक्षपक्षक्षणनशतकोटिसमानं समग्रजीवामारिपटु-पटहोद्घोषणानिरस्तसमस्तव्यसनं सद्योवादितानवद्यवाद्यमाद्यद्रङ्गस्थानरङ्गत्सङ्गीत-गीतनृत्यन्नर्त्तकसमुद्गच्छदतुच्छध्वनिघनगर्जज्जिनगृहसर्वार्हदप्रतिमप्रतिमार्हणाविरचनं सप्रभावप्रभावनाभवनादिनवनवक्षणनवक्षणकल्पितानल्पसङ्कल्पकल्पद्रु-कल्प**श्रीकल्पसूत्र**वाचनं मासार्द्धमासक्षपणादिदुस्तपस्तपनक्षपिताष्टकर्मीनिकाचनं याचकयाचितार्थप्रदानं प्रकृष्टाभीष्टपिष्टपूरप्रभृतिविविधसुखाशिकासमग्रसाधर्मिकजन-भोजनं साडम्बरसकलार्हच्चैत्यपरिपाटीगमनं समहामहं निष्प्रत्यूहव्यूहं समजायत । संसक्तसन्न्यासविन्यासध्येयामेयमहिमश्रीसूरिमन्त्रस्मरणकरणासाधारणकारणात् अपरं शुभवतां भवतां धीमतां ह्रीमतां वैराग्यरङ्गरक्तान्तःकरणानां स्वपरिकरवार्त्तवार्त्ता-परिकलितं कविकु....

—x—

ला. द. विद्यामन्दिर
अमदावाद
सू. ४३४११

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## (३)

स्वस्तिश्रीसङ्गरङ्गत्परिणतिजनिताभङ्गरङ्गप्रसङ्गात्,
शालीनालीकमाली विलसति रुचिभिर्भानुमाली नयाली:(ली) ।
प्रज्ञालीभूतभूतं जगदिदमनिशं यद्गुणालीप्रणाली-
सिक्तव्यक्तोक्तिशीलद्रुमगुणभणनाच्चित्रमेतज्जनानाम् ॥१॥
स्वस्तिश्रीर्नलिनीव पीवरतरज्योति:प्रतापारुण-
प्राकाम्याभ्युदयेन यस्य भजते भास्वद्विभोज्जृम्भणम् ।
नि:सङ्गाङ्गिगणे स्फुरद्दिनमणिप्रष्ठोऽपि शिष्टै: स्फुटं,
सश्रीक: पटुकोटिकोटिमुकुटैर्यश्चाऽत्र जेगीयते ॥२॥
स्वस्तिश्रिया निरुपमाभ्रमरूपसम्पत्-सम्यक्स्वरूपविनिरूपितचारुलक्ष्म्या ।
य: क्रीडति प्रतिदिनं सरसैर्विलासै-र्निस्सङ्गनिर्ममहानपि गीयते स्म ॥३॥
स्वस्तिश्रियो मोहनमन्त्रशक्ते-र्व्यक्तीकृति: सत्कृतिभि: प्रशस्या ।
यो वीतराग: कृतभूरिराग:, प्रह्वीकृत: स्वीकृतसौकृतश्री: ॥४॥
स्वस्तिश्रियां हेतुरयं सुकेतु:, स्वीयान्वये मे समुपैतु चेत: ।
अनन्यसामान्यगुणा: प्रकामं, द्रव्यं विनापि प्रविभान्ति यस्मिन् ॥५॥
स्वस्तिप्रियाकैरविणीकलाधर:, पार्श्वप्रभुर्विद्रुमरुक्कलाधर: ।
कलावदोघस्तुतसत्कलाधर:, सत्पल्लवोल्लासितसत्कलाधर: ॥६॥
स्वस्तिप्रियाया: प्रियतामवाप्य, कृतार्थतामश्नुत एव जन्मन: ।
काम्यत्कलाकेलिकलातितायी, यश्चाऽपि चित्रं न कथं जनानाम् ॥७॥

तं श्रीमन्तं श्रीमन्तमर्हणाप्रबर्हार्हतार्हमतानर्हगर्हणावैधुर्यधुर्यवर्यबर्हिर्मुखपर्षत्प्राचीनबर्हि:प्रतिमताप्राप्तिव्याप्तिसमुद्भवन्नवसाम्राज्यप्राज्यकमलालीलाविलासव्याससाभ्यासलास्यप्रशस्यरहस्यानुभवपराभूतप्रभूतभवप्रभवाभिभवभारव्यथाशङ्करं दुष्कर्मनर्मघर्मक्षपणनिपुणजलायितविमलवृत्तवृत्तिप्रवृत्तिकेवलज्ञानतरुणतरणिकिरणनिकरध्वंसितानन्तदुरन्तदुरितारातिजातिप्रकरं श्री**पार्श्व**जिनदिनकरं प्रणामपूर्वाचलचूलाचुम्बिनं निर्माय **श्रीमेदिनीपुरत: श्रीविजयप्रभसूरय:** सबहुमानमादिशन्ति यथानिमित्ताधीनात्मलाभं चाऽत्र प्रात[:] श्रीसूर्ये महाभ्युदयदशामधिगतवति महेभ्यसभ्यलभ्यायां सभायां श्रीपञ्चमाङ्गस्वाध्याय**श्रीप्रश्नव्याकरणसूत्रवृत्ति**व्याख्यानविधान-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रधानयोगोपधानोद्वहन-मालारोपण-तुरीयव्रतोच्चारणाद्यनन्तकान्तकृतपातकान्त-स्वान्तस्पृहणीयधर्मकर्मणि समनुष्ठीयमाने क्रमसमधिगतं श्रीम[दा]ब्दिकपर्वाऽपि सर्वपर्वसुपर्वसुपर्वराजं विराजत्समहामहमहोत्सवसण्टङ्कनिष्टङ्कितस्पष्टचैत्यपरिपाटी-प्रकटनाद्याडम्बरप्राग्भारचमत्कृतसकलविद्वत्समाजं सक्षणक्षणप्रवणतात्मक-सङ्कल्पितानल्पकल्पद्रुकल्प**श्रीकल्पसूत्रा**भिनवसुधासारणीदेशीयदेशना-समुज्जृम्भितसुरनरराजं निःप्रत्यूहव्यूहमित्यादि समहं समजनि संजायते च सांप्रतीनसमयेऽपि तुरीयारकवत् सांप्रतप्रवृत्तिः सद्वृत्तिमत् श्रीदेवगुरुप्रसत्तेः । किञ्चाऽस्माकं आचार्यश्री**विजयरत्नसूरी**णामनुनतिसहचारिण्यौ **उ. श्रीसौभाग्य-विजय ग., पं. गङ्गकुशल ग., पं. हेमविजय ग., पं. प्रीतिविजय ग., पं. विमलविजय ग., पं. उदयविजय ग., पं. ज्ञानविजय ग., पं. प्रेमविजय ग., [ ग. ] लाभसागर, मु. लक्ष्मीविजय, साध्वी हीर**श्रीप्रमुखाणां प्रणत्यनुप्रणती अवसेये अवसायितव्ये च पारिपार्श्विकानाम् । किञ्च शुभवतां भवतां हृद्यगद्यपद्यानवद्यविद्यासद्यस्कसन्दर्भवतां पार्वणलेखः प्रादुर्बोभूयामहे तन्निष्ठशिष्टसमाचारचारै _ _ _ _ _ परमानन्दसम्पदः प्रादुर्भूताः _ _ _ _ नघसङ्घस्याऽस्मद्धर्मलाभो वक्तव्यः । _ _ [अस्म]न्नाम्ना श्रीजिनचन्द्राः प्रणन्तव्या माघ सित ६ दिने इति श्रेयः ॥

—x—

(मुनिश्रीधुरन्धरविजयजी-सङ्ग्रहगत)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(५५)

# श्रीज्ञानविमलसूरिप्रणीता प्रसादपत्री

स्वस्तिश्रीर्यत्पदाम्भोजे, सदावासमुपेयुषी ।
तमानम्य प्रमोदेन, **पार्श्वं** श्री**सुखसागरम्** ॥१॥
लिखत्युदन्तमानन्द-पूर्णहृत्प्रणयोद्धुरः ।
सद्ज्ञाना**द्विमला**भिख्यः, सतीर्थ्यस्सूरिशङ्करः ॥२॥
**राजद्रङ्गे** लसद्रङ्गे, तत्र श्रीमत्पवित्रिते ।
श्री**स्तम्भतीर्थतः** सम्यग्, पूर्णं पूर्णप्रमोदभाक् ॥३॥
सातजातं वरीवर्त्ति, श्रीमदिष्टप्रभावतः ।
कालानुमानतश्चापि, प्रत्यहं प्रश्रयप्रदम् ॥४॥
प्रतिप्रभातं सभ्येभ्यः, पर्षदायां प्रमोदकृत् ।
व्याख्यानं ख्यातिमद्भव्यं, जायते च प्रतिप्रगम् ॥५॥
क्रमागतं च सत्पर्व, **वार्षिकं** हर्षकृन्नृणाम् ।
जिनेन्द्रार्चादिसत्कृत्य-धर्मकर्मविनिर्मितम् ॥६॥
नवक्षणेषु सञ्जाता, भावना सत्प्रभावना ।
स्वर्ण-रूप्यादिमुद्राभिश्चाऽङ्गपूजाऽप्यजायत ॥७॥
संवत्सरप्रतिक्रान्तिः, पर्वदानं प्रवर्तितम् ।
पारणापि [च] सञ्जाता, समहं सदभिष्टजा ॥८॥
इत्याद्यनेकसद्धर्म-कर्मवार्ता प्रवर्तते ।
श्रीम**दावश्यकीवृत्ति**-व्याख्यानं जायते सदा ॥९॥
श्री**जितविमला**ह्वाना, वाचकेन्द्रा जयन्तु ते ।
यत्कीर्त्तिस्फूर्त्तिकौमुद्या, भासितं भुवनस्थलम् ॥१०॥
बुधगुरुकवयोऽद्यापि, नोज्झन्ते लेखशालिकाम् ।
श्रैमत्कवर्यचातुर्य(र्यें?), शिष्यार्थं किमु तर्क्यते ॥११॥
इत्याद्यनेकगुणगण-मणिरोहणशैलशैलसन्मानैः ।
सज्जनमहेभ्यजनता-प्रदत्तमानैः स्फुरद्ध्यानैः ॥१२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

श्रीमद्भिरस्मदनुनति-रवसेयाऽऽचार्यवर्यसूरीणाम् ।
**सौभाग्यसागराणां**, नाम्नामत्यन्तहर्षकृताम् ॥१३॥
कवि**विनयाद्विजया**नां, शिष्याणां नव्य**रङ्गविजय**भृताम् ।
प्राज्ञ**गुणसागराणां**, सद् **न्याना(या)त् सागर**गणीनाम् ॥१४॥
**खि(खी)मादिसागरा**णां, शिष्याणां **पञ्चमाङ्गयोग**भृताम् ।
ज्ञेया प्रणति(:) शश्वत्, ज्ञाप्या च श्रीमदन्तिषदाम् ॥१५॥
प्राज्ञः श्री**भोजविमलः**, श्री**जिनविमला**भिधानविद्वांसः ।
**सौभाग्यचन्द्र-नारायण**-मुखभवदङ्घ्रिसक्तानाम् ॥१६॥
तेषां यथार्थमेतत्(द्), ज्ञाप्यं श्रीमद्भिरनुभवप्रवणैः ।
अस्मन्नामग्राहं, नन्तव्यास्सकलतीर्थकराः ॥१७॥
**सादेव**नामवणिजा, पत्रं दत्तं पुरा हि ।
वाचं वाचं परमा, मुदश्च जाता हृदोऽन्तर्मे ॥१८॥
पूर्वप्रेम न हेयं, देयं वलमानप्रीतिपत्रं च ।
तत्रत्या[:] सुविशेषाः, प्रेष्याः प्रेङ्खत्समाचाराः ॥१९॥

—x—

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर
सूरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(५६)

# श्रीविद्यासागरसूरिप्रणीता प्रसादपत्री (अपूर्णा)

श्रीसरस्वतीदेव्यै नमः ॥ श्रीगोडीपार्श्वनाथाय नमः ॥ श्रीगुरुभ्यो नमः ॥

स्वस्तिश्री**गौडिपार्श्व**श्शतमखप्रणतस्त्यक्तमोहान्धकारः,
सर्वेषां भव्यपुंसामभयवरदानात्(?) धूर्जितः स्फारकीर्त्तिः ।
निर्व्याघातप्रपूर्णप्रगुणगणधरज्ञानधर्त्ता प्रणेता
श्रीणां दाताऽघहर्त्ता विजयति जगदानन्दकर्त्ता जिनेन्द्रः ॥१॥

**अमरसागरसूरिगणेश्वरा,** अमरसौख्यकराः प्रभवन्तु मे ।
अमरवृक्षमिवेप्सितदायकाः, प्रतिभया विजितामरसूरयः ॥२॥

श्री**शान्तिदेवो** वितनोतु शान्ति, समस्तभक्तामरमानवानाम् ।
श्रीविश्वसेनेशकुलार्यमासमः, सद्भव्यचित्ताम्बुजबोधकश्च ॥३॥

विद्याब्धयः सूरिगुणैरलङ्कृताः(ता), विद्याचणाः(णा) ज्ञानकलासमन्विताः ।
कान्तं पलाशं शिवदं _ _ _ णा, लिखन्ति **बुरहान(बुर्हान)पुरात्** प्रहर्षात् ॥४॥

सुखसंयमयात्राऽत्र, कल्याणं मङ्गलं तथा ।
सदा[पि] वर्त्तते श्रीमद्-देवगुर्वोः प्रसादतः ॥५॥

**जालणा**तो विहृत्याऽ**व-रङ्गाबादे** समागताः ।
तर्हि तत्राऽस्तिकाश्चक्रुः, प्रवेशोत्सवसुन्दरम् ॥६॥

चातुर्मासकविज्ञप्तिं, _ _ _ श्रोतुकामुकः ।
द्वौ मासकल्पौ यावच्च, तस्थौ [सङ्घाग्र]हैः पुनः ॥७॥

सार्द्धद्विमासाः तद्द्रङ्गे, तस्थुः सङ्घा _ _ _ _ ।
इतश्च **बुर्हानपुरस्य,** सङ्घो नश्चा _ _ _ _ ॥८॥

_ _ _ _ _ _ _ _ _ _ _ _ मञ्जुलमार्हता _ ।
रम्याङ्गना गेयसु _ _ _ _ , समग्रवादित्रप्रवाद्यमाने ॥९॥

अनेक(का) मिलिता लोकाः, केचिद् भावात् कुतूहलात् ।
**मोतीचन्द्रो** ददुः _ _ , प्रत्येकं श्रीफलं वरं ॥१०॥

प्रत्यूषेऽस्माभिर्व्याख्यानं(ने), **विशेषावश्यकं** शुभम् ।
सद्वृत्तिसंयुतं सम्प्रत(?), क्रियते सङ्घसंसदि ॥११॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**कर्मग्रन्था**दिकग्रन्था:, शिष्यानध्यापयत्सु च ।
शर्मद: सर्वसत्त्वाना-मी(मि)याय पर्वणां पति: ॥१२॥
समागते च पर्वणि, **कल्पसूत्रस्य** पुस्तकम् ।
**मोतीचन्द्रेण** न्यष्ठाच्च, विहितो रात्रिजागर: ॥१३॥
गजारूढ(ढेण)मोरेण(?), पुष्टे सङ्घैः समं मुदा ।
मह:पूर्वकमस्माक-मदात्(कं तद्दत्तं?) करनीरजे ॥१४॥
अस्माभिर्दश व्याख्यानं, कृता(:) श्रीसङ्घपर्षदि ।
पूर्वघस्रे **कल्पसूत्रं**, प्रवाचितं **हिताब्धिना** ॥१५॥
**जाण**(?)श्राद्धसद्मनि, दशव्याख्यानमुत्तमम् ।
प्रकीर्त्तिता(तं)प्रमोदेन, मुनिना **हर्षकीर्त्तिना** ॥१६॥
वार्षिकप्रतिक्रमणं(णे), दत्त्वा च क्षामणं मिथ: ।
प्रत्तं सांवत्सरं दानं, ताम्रमुद्रा तु पेटके ॥१७॥
चैत्यप्रपाटिकां कृत्वा, हृतं पाप्मा(प्म)समूहकम् ।
प्रभावना द्वाविंशति-श्रद्धालव(वैः) वितेनिरे ॥१८॥
अथ पारणाधिकार: -
चातुर्मासकपारणं, **चन्द्रभाणेन** कारिता(तम्) ।
**पटुआज्ञातीय**मध्ये, **मीठाचन्देन** तत्समम् ॥१९॥
वृद्धापाक्षिकपारणां, **देवीदासो** व्यचीकरत् ।
अपरे तत्पारणक(का:), **कृतलेन** विधायि(पि)ता: ॥२०॥
त्रैलाधरपारणक(कं), **बूलचन्द्रेण** बर्फरात् ।
सकलश्राद्ध-श्राद्धीनां, चक्रे च शुभभावत: ॥२१॥
मुक्तिसमोज्ज्वलं चित्त(:), **मोतीचन्द्र**सुश्रावक: ।
विविधानि च पक्वानै-रकारि पर्वपारणा ॥२२॥
अन्ये वार्षिकपारण(णा:) कारिता **मकने**न च ।
बहूनि भव्यलोकानि, शीलव्रतमपालयन् ॥२३॥
एकाश्राद्धया(च) सद्भक्त्यो-पवासा स (कृता:) _ _ _ ।
अष्टावेकाश्राविकया, चैक्या पञ्च भावत: ॥२४॥

[अपूर्णं पत्रम्]

-x-

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर, सूरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(५७)

## श्रीमेघराजगणिवरं प्रति प्रेषिता

# श्रीविद्यासागरसूरिप्रणीता प्रसादपत्री

स्वस्तिश्रीकरसम्भवं जिनपतिं **श्रीसम्भवं** संमुदा,
भास्वद्भासुरबन्धुरोद्धुरतरैः सम्भूषणैर्भूषितम् ।
वन्देऽहं **विधिपक्षचैत्यविमलं** दीप्यत्प्रतापाद्भुतं,
राजद्राज्यजितारिवंशतिलकं सेनाङ्गजं सौख्यदम् ॥१॥
श्रीमच्छ्री**विधिपक्ष**दक्षगणपाः सत्साधवः सूरयः,
जीयासु[ः] कुशलं दिशन्तु गुरवः सम्प्राप्तविद्याश्रयाः ।
संसाराम्बुधितारकोद्यतधियः सत्योपदेशैर्जनान्,
सद्भव्यान**मराब्धि**सूरितिलकाः सम्बोधिसम्बोधका[ः] ॥२॥
तेषां पादयुगं प्रणम्य शिरसा विश्वाद्भुताश्चर्यकृ-
च्छ्रीमत्**सूरति**बिन्दराद् गतमयादृद्धेश्च वृद्धेर्गृहात् ।
**विद्यासागर**सूरयोः(यो) गणधरा[ः] पत्रं लिखन्ति स्फुटं,
श्रीमद्वार्षिकपर्ववृत्तिसुखदं श्रेयस्करं भाविनाम् ॥३॥

श्रीमति **नान्दसमा**ग्रामे वा.**मेघराज**गणिवरेषु श्रेयश्चाऽत्र-
श्रीमत्**पत्तन**तो विहृत्य जनपान् नत्वा जिनांस्तात्त्विकान्,
श्राद्धीनागकृताग्रहादनुजनैः सङ्घैः समं सम्मुदा ।
ग्रामे **चान्दसमा**ख्य एव भगवद्**भट्टेवपार्श्वा**भिधं,
स्तुत्वा सङ्घजनस्य **लालव**णिजा भक्तिः कृता सादरम् ॥४॥
नामं नामं जिनान् सर्वान्, प्रदक्षिणस्थितिस्थितान् ।
हारं हारं मनस्तापं, कारं कारं सुशिक्षिकाम् ॥५॥
ग्रामं ग्रामं विहृत्याऽथ, विधौ संस्थाप्य श्रावकान् ।
**वैराटनगरं** प्राप्ता, महोत्सवपुरस्सरम् ॥६॥ युग्मम् ॥
**परीक्षरत्नजिन्**मुख्यैः, श्राद्धैः सर्वैः कृतोन्नतिः ।
श्री**पार्श्वकलिकुण्डा**ख्यः, सद्भक्तिगोचरीकृतः ॥७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**अमरसागरसूरि**गणधरा-श्चतुरशीतिगणेषु सुविश्रुताः ।
कुमतवादिषु जित्वरजित्वरा, विजयदा विजयन्तु मुनीश्वराः ॥८॥
तेषां पादयुगं नत्त्वा, मत्त्वा च मुनिपुङ्गवम् ।
सर्वदा सौख्यदातारं, ध्यातृकामघटं मतम् ॥९॥
मासमेकं तत(:) स्थित्वा, कृत्वा प्रयाणकं शुभम् ।
**सूरतिबिन्दरं** प्राप्ता, गुरोः पादप्रसादतः ॥१०॥
तस्मिन् दिने श्रावक**वेणिअद्दा-केना**ऽ**थ** सन्निर्मितमहन्महश्च ।
**हरीपुराख्ये** प्रथमं मुहूर्त्तं, कृतं च तस्याऽऽग्रहतो विशेषात् ॥११॥
ज्येष्ठशुक्ल अथ पञ्चमीदिने, संस्कृतो बृहदुपाश्रयागमः ।
श्रीफलानि गुरुसङ्घसत्कृते, दत्तवान् **सहिकपूरसङ्घजित्** ॥१२॥
गौरीगान-स्फुरद्ध्वान-तूर्यघोषपुरस्सरम् ।
प्रवेशमहोत्सवोऽकारि, **कर्पूरेन्दु**गुणालिना ॥१३॥
**आचाराङ्गस्य** सूत्रस्य, व्याख्यां प्रवाचयत्सु च ।
श्रुत्वा श्रद्धालवः सर्वे, भवन्त्युत्तरदर्शनाः ॥१४॥
**सिद्धान्तचन्द्रिका**पाठः, शिष्यानध्यापयत्सु च ।
श्राद्धांश्च धर्मकृत्येषु, प्रेरयत्सु गुणालया(न्) ॥१५॥
कल्पामात्योऽष्टाहिकास्त्रि, समगात् सपरिच्छदः ।
जिनेशाज्ञाधृतच्छत्रः, पर्वराजप्रसन्नदृग् ॥१६॥
तदोत्पन्नविवेकेन, ग्रामेष्वमारिघोषणा ।
घोषिता साहि**कर्पूरि**-णाऽधिगम्य प्रभावना(म्) ॥१७॥
**अभयेन्दुगणजिद्धयां**, **कल्प**पुस्तकमुत्तमम् ।
नीत्वा स्वीयालयं भक्त्या, रात्रौ जागरणं कृतम् ॥१८॥
[सु]प्रभाते हयस्कन्धे, न्यस्य कल्पसुपुस्तकम् ।
सस्मरध्वजघोषेण, घोषिताम्बरडम्बरम् ॥१९॥
समानीयाऽथाऽस्मत्पाणौ, दत्तं श्रीसङ्घपर्षदि ।
व्याख्याभिर्दशभिर्व्याख्या, विहिता सुप्रभावना ॥२०॥
पर्वाह्नि **द्वादशशतं**, सूत्रितं साधुसूत्रतः ।
मुनिना **दीपचन्द्रेण**, वितन्द्रेण स्वधर्मसु ॥२१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तपोऽधिकारे–

दशोपवासा दशभि-रष्टौ षट्दशभिस्तथा ।
एकेन पञ्चदश च, पञ्च विंशतिभिः कृता ॥२२॥
घनैः कृतं तपः षष्टं, शतसङ्ख्याभिरष्टमम् ।
**कर्पूरेण** रूप्यमुद्रा, प्रत्ता सर्वतपस्विनाम् ॥२३॥
प्रत्तं तेन रूपकैकं, प्रतिवेश्म सधर्मिणाम् ।
प्रत्ता लभ्यनिकाऽन्यैश्च, पेटक-मोदकादिका ॥२४॥

पारणाधिकारे – आषाढचतुर्मासकपारणा **मन्त्रिणा गोडीदासेन**, दशकस्य **साहि गगलकेन**, वृद्धपाक्षिकपारणा **अभयचन्दलहुजित्केन**, दशकस्य **सा. सूरा लालजितकेन**, तेलाधरस्य पारणा **सा. धर्मचन्द-कुंवरजिद्भ्यां**, दशकस्य **बाईकेशरकया**, श्रीपर्वपारणा सा. **गणेश कपूरकेन**, दशकस्य **वेणीअद्दासञ्झेन** च कारापिता ।

एवं पर्युषणापर्व, सर्वसत्त्वसुखावहम् ।
सुखमाराधितं श्रीमद्-देव-गुर्वोः प्रसादतः ॥१॥
भवद्भिरपि तत्रत्य-धर्मकृत्यनिवेदकम् ।
पत्रं सम्प्रेष्य सम्मोद्य-मस्माकं मानसं पुनः ॥२॥

अत्रत्यानां वा.श्री**दानचन्द्र**गणि, पं. श्री**विमलचन्द्र**गणि, मुनि **जयचन्द्र**गणि, मुनि **सुमतिचन्द्र**गणि, मुनि **दीपचन्द्र**गणि, मुनि **वल्लभसागर**गणि, मुनि **ज्ञानसागर**गणि, मुनि **हितसागर**गणि, मुनि **गुलालचन्द्र**गणि, मुनि **राजचन्द्र**गणि, मुनि **धिरंमीठाचंद**जी प्रभृतीनां नत्यनुनतिर्ज्ञेया । सङ्घस्य धर्मलाभो लाभ्यः ।

तथा तुम उत्तम योग्य गरढा पाटभक्त छौ । सदवसरैं वीसरता नथी तुमनैं **श्रीनांदसमा गुढलानौ** आदेश छैं, ते प्रीछजौ । शिष्य-साधवी सर्वनैं साता पूछवी । वलता पत्र संभारी लिखवा ॥ माह सुदि १३

श्री **अचलगच्छे श्रीनान्दसमा**नगरे-वा.**श्रीमेघराज**गणिवरेषु श्रीपर्वपत्रम् ॥

—x—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

संवत् १७७९ आषाढादि ८० वर्षे श्रीअञ्चलगच्छेशपूज्यश्रीविद्यासागरसूरीश्वर-विजयिराज्ये श्रीपर्वतिथिटीप-

| | | | |
|---|---|---|---|
| चैत्र | सुदि | ८-१५ | सोमे |
| वैशाख | वदि | ८-०) | भोमे |
| | सुदि | ८-१५ | बुधे |
| ज्येष्ठ | वदि | ८-गुरौ | ०)-बुधे १ |
| | सुदि | ८-१५ | गुरौ |
| आषाढ | वदि | ८-०) | शुक्रे |
| | सुदि | ८-१५ | शनौ |
| श्रावण | वदि | ८-रवौ | ०)-शनौ २ |
| | सुदि | ८-१५ | रवौ |
| भाद्रपद | वदि | ८-०) | सोमे |
| | सुदि | ५ | शनौ श्रीपर्व |
| | सुदि | ८-१५ | भौमे |
| | मासखमण | | शुक्रे |

| | | | |
|---|---|---|---|
| आसो | वदि | ८-०) | भोम |
| | सुदि | ८-१५ | बुधे ३ |
| काती | वदि | ८-०३ | गुरौ |
| | सुदि | ८-शुक्रे | १५-गुरौ ४ |
| मागशिर | वदि | ८-०) | शुक्रे |
| | सुदि | ८-१५ | शनौ |
| पोस | वदि | ८-०) | रवौ |
| | सुदि | ८-१५ | सोमे |
| माघ | वदि | ८-०) | भौमे |
| | सुदि | ८-बुधे | १५-भौमे |
| फाल्गुन | वदि | ८-०) | बुधे |
| | सुदि | ८-१५ | गुरौ |
| चैत्र | वदि | ८-०) | शुक्रे |

—x—

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर,
सूरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

(५८)

## श्रीनागेश्वरभट्टं प्रति

# श्रीवृद्धिविजयेन प्रेषितं पत्रम्

स्वस्तीन्दिरा-गिरांदेव्यौ, यत्र द्वे अपि तिष्ठतः ।
विरोधिन्याविदं चित्रं, तं नत्वा परमेश्वरम् ॥१॥
भ्राजतेऽभ्रंकषा यत्र, गुर्वी हर्म्यपरम्परा ।
स्थिता अपि न यत्कूणे, ज्ञायन्तेऽष्टापदादयः ॥२॥
नवं धनं पुण्यवदालयेषु, न बन्धनं यत्र सपत्नचक्रात् ।
नवा रणाः सद्मसु वाद्यराशे-र्न वारणालेर्गणनं हि शक्यम् ॥३॥
छत्रेष्वेव तथा दण्डो, धम्मिल्लेष्वेव बन्धनम् ।
जडभावस्तथा वाप्यां, विवाहे पाणिपीडनम् ॥४॥
वक्रता वनिताभ्रूषु, पद्मस्तोमः सकण्टकः ।
चञ्चलाश्च ध्वजा एव, न चकोरीदृशः पुनः ॥५॥
मर्दनं पुष्पशय्याया, मधुपाश्च मधुव्रताः ।
कुरङ्गा हरिणा एव, सपङ्काश्च सरोवराः ॥६॥
दोषागमो रजन्यां च, काठिन्यं कुचयोस्तथा ।
देवालया विहाराश्च, न तु स्त्रीहृदयालयाः ॥७॥
व्यसनं धर्मकृत्येषु, यत्राऽन्यत्र न तिष्ठति ।
तत्र **ब्रध्नपुरे** नाको-पमाने विबुधाश्रये ॥८॥
**श्रीमद्दशपुराद्** भावा-दमन्दानन्दमेदुरः ।
**वृद्ध्यादिविजयः** प्रीति-पत्रमारचयत्यदः ॥९॥

॥ अपरम् ॥

शमिहाऽस्ति प्रभोर्ध्येय-नामध्यानानुभावतः ।
आर्यवर्यवपुःसौख्य-लेखः प्रेष्योऽधुना मयि ॥१०॥
नेत्रानन्दकराः सुदर्शनधराः सर्वाङ्गिचेतोहराः ।
सल्लावण्यपराः प्रणाशितदराः कारुण्यपुण्याङ्कुराः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

षट्शास्त्रे विदुरा विचारचतुरा विश्वग्यशोभासुराः ।
राजन्ते जगतीतले सुमतयो ते **भट्टनागेश्वराः** ॥११॥
यत्कीर्त्तिः कल्पवल्लीव, मेरुदण्डमवाप्य सा ।
तथैव विस्तृता नूनं, न ममौ विश्वमण्डपे ॥१२॥
यस्य प्रतापतपनो, द्योतयन् जगतस्त्रयम् ।
प्राज्ञचेतोम्बुजोल्लासी, नाऽस्तमेत्यद्भुतं महत् ॥१३॥
सहस्ररसनः शेषः, सहस्राक्षः पुरन्दरः ।
यदीयप्रगुणान्मेने, वक्तुं द्रष्टुमभूदिति ॥१४॥
नमस्कारोऽवसेयस्तै-र्मदीयो द्विजपुङ्गवैः ।
वाच्यो **मदनभट्टा**नां, सुहृदां च विशेषतः ॥१५॥
अनल्पानि मया पत्रा-ण्यतः श्रीमत्क्रमाम्बुजे ।
प्रेषितानि पुनर्नागा-दार्याणामेकपत्र्यपि ॥१६॥
तथा कृपाप्रतानिन्यां, भाव्यं जीमूतवत्सदा ।
मदुचितं च कार्यं सत्, प्रसाद्यं पण्डिताधिपैः ॥१७॥
भावत्कोऽस्मीति विज्ञेय-महमेतद्बुधाधिपैः ।
किं बहुना बहुज्ञेषु, वचसां रचनाऽधुना ॥१८॥
वलमानं तथा पत्रं, प्रसाद्यं मन्मनोमुदे ।
त्वरया लिखितं पत्रं, कार्त्तिकीपञ्चमीदिने ॥१९॥

इति श्रेयःश्रेणिः ॥ श्रीः ॥

—x—

नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिर
सूरत

Jain Educationa International	For Personal and Private Use Only	www.jainelibrary.org

# पूर्ति

अनुसन्धान - ६०, विज्ञप्तिपत्र-विशेषाङ्क खण्ड-१मां प्रकाशित १७ पत्रो पैकी पत्रक्रमाङ्क १, ५, ७, १० अने १७ -- आ पूर्वे विज्ञप्तिलेखसङ्ग्रह (-सं. मुनि जिनविजयजी)मां अनुक्रमे ९, १८, १५, १६ अने १९मा क्रमाङ्के प्रकाशित थया छे. आ पत्रो अनवधानवश अत्रे पुनःप्रकाशित थया छे.

आ पांचे पत्रोनी अनुसन्धानगत अने विज्ञप्तिलेखसङ्ग्रहनी बंने वाचना मेळवी जोतां घणा पाठान्तरो मळ्या. अमुक जग्याओ अनुसन्धाननो पाठ योग्य लाग्यो, तो केटलांक स्थाने विज्ञप्तिलेखसङ्ग्रहनो पाठ अर्थसंगत भास्यो. घणां स्थळे बंने वाचनाना पाठ अर्थसंगत बनी शके तेम लाग्युं. थोडांक स्थान एवां पण हतां के निर्णय करवो मुश्केल बने. पत्र-१ 'लेखराजहंस'मां तो पाठोनी योग्यता-अयोग्यतानो निर्णय करवो खरेखर अघरो छे. तेथी आ पत्रनी वि. ले.नी वाचनामां जे जे पाठो अनु.थी भिन्न छे ते तमाम पाठोनी अत्रे एकसाथे नोंध करी छे. अन्य पत्रोनी पाठनोंधमां बे विभाग कर्या छे : १. जे पाठ अनु. नी वाचनामां सुधारवा जेवा छे २. वि.ले.ना जे पाठ वैकल्पिक लागे छे, मतलब के अनु. अने वि.ले. बंनेना जे पाठ अर्थसंगत लागे छे ते पाठ. वि.ले. गत अशुद्धि के सामान्य पदच्छेदना तफावत अत्रे नोंध्या नथी.

## अनुसन्धान-६० - पत्र १ - लेखराजहंस्य

## विज्ञप्तिलेखसङ्ग्रहगतवाचनाया भिन्नपाठसूचिः

| *श्लोकः | पङ्क्तिः | पाठः | श्लोकः | पङ्क्तिः | पाठः |
|---|---|---|---|---|---|
| १ | २ | ०प्रकरज्झरभरो० | ४ | २ | ०शुद्धमनसां |
| २ | १ | ०श्रीपृष्ठभासः | ४ | ४ | किमपि तत्तेजो० |
| २ | ३ | दत्तुकामा प्रभव० | ५ | ४ | सद्यस्तमः |
| ३ | ४ | निजदृशौ( शा ) | ६ | २ | ०भजत् स्वस्मिन् |

*आ श्लोक अने पङ्क्तिक्रमाङ्क अनुसन्धाननी वाचनाना छे, ज्यारे पाठ वि.ले.नो छे. मतलब के अनुसन्धाननी वाचनामां ते ते श्लोकनी ते ते पङ्क्तिमां विज्ञप्तिलेखसङ्ग्रहनी वाचना केवो भिन्न पाठ धरावे छे ते अत्रे दर्शाव्युं छे.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

| श्लोकः | पङ्क्तिः | पाठः | श्लोकः | पङ्क्तिः | पाठः |
|---|---|---|---|---|---|
| ७ | १ | ०साद्यतां वन्द्यतां | ४४ | २ | तत् समेऽर्हन् |
| ८ | १ | ०बहुरूपिणां | ४५ | ४ | चमरम् |
| १० | १ | ०श्रीप्रतिपूर्णतां | ४७ | १-२ | ०दानन्दप्रदप्रास्तमहद्भय |
| ११ | १ | ०जन्मवदना | ४७ | ३ | यन्नप्त(?) स्तुति० |
| १२ | १ | परिणमत्क्ष्मापैः | ४८ | १ | जयश्रीस्तत् |
| १२ | ३ | न हि तेनोकैः | ४८ | ३ | दरभूच्छायसङ्घात० |
| १३ | २ | परिमृज्य सम्मुख० | ५० | १ | ०करपङ्कज ! |
| १४ | ३ | ०त्तमोनाशिका | ५२ | ४ | ०विबोधकृत् |
| १५ | २ | सतां यतिमतां | ५४ | ३ | रक्ष ततोऽरभिद्धी(द्वी)र |
| १५ | ४ | रागः संस्तुवतां | ५४ | ४ | ०मनदत्त स |
| १६ | १ | स्वस्तिश्रिया | ५५ | १ | जप दासे० |
| १७ | ४ | ०रनन्यथा स्यात् | ५५ | ३ | दादी( दा? )नघ! |
| २२ | २ | बाह्यां किमाह्वाम् | | | रमादेवौ |
| २४ | ३ | पश्चादा[द]च्चोरवत् | ५५ | ४ | सेनघनवरप्रभः |
| २५ | २ | पङ्कजत्वम् | ५६ | १ | येन वृता |
| २७ | ४ | ०मीते तदादि | ५६ | २ | सिद्धिगामिनी |
| ३० | २ | तन्नः सिद्धि० | ५६ | ३ | तप्तदुस्ताप |
| ३० | ४ | ०माहात्म्यभाजः | ५७ | १ | विपक्षौघा |
| ३३ | १ | स वज्रप्रमुखान् | ६० | २ | जितशुण्डां(ण्डं) लस० |
| ३७ | ३ | ०रक्तात्मिजन० | ६० | ३ | भक्तियुग् भवि० |
| ३८ | ४ | स कार्पट्यधरः | ६२ | २ | स्तत् त्रैशलेयं |
| ३९ | १ | जिनाधिपानां कल० | ६४ | ४ | हरमरं |
| ३९ | २ | भुवने त्वदीयम् | ६६ | १ | नमतं तेन |
| ४१ | २ | गणास्तु यन्नः | ६६ | ३ | भिन्नं मानव० |
| ४१ | ४ | ०जडाशयं तत् | ६६ | ४ | सन्नयनं जन |
| ४२ | ३ | परमश्रीप्रदं | ६७ | २ | ०भीतिनीतिः |
| ४४ | १ | जंजनीतु ततं | ६८ | १ | ०कृन्नक्रवास[:] |

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

| श्लोकः | पङ्क्तिः | पाठः | श्लोकः | पङ्क्तिः | पाठः |
|---|---|---|---|---|---|
| ६८ | २ | पातृपाच्छ्री | ११९ | १ | ०द्यद्यत नः स सम्पत् |
| ६८ | ४ | सर्वज्ञः प्रत्नसातः | १२० | ३ | वरं रमाभा ललना हि |
| ६९ | १ | ०समानमानः | १२१ | १ | ०समो महस्वी गाङ्गा० |
| ७१ | १ | ०कारिणी परा | १२१ | ३-४ | मोददो दोषभेद |
| ७३ | १ | ०मेत्य तां पुरं | १२१ | ४ | एष भाति |
| ८१ | ४ | त उदीत्वरश्रियः | १२२ | ३ | त्यजद्वान्तभरं |
| ८२ | १ | न गरीयनगरी० | १२४ | १ | दैवतेन्दुमुखी |
| ८२ | ४ | श्रीमहिमा | १२४ | ३-४ | ०राजिश्रीर्यत्रा० |
| ८३ | २ | ०ब्रह्माण्डहृत | १२६ | १ | श्रीमति नगरे |
| ८७ | १-२ | पताकयाऽऽवृणते | १२७ | ३ | यत्र विभान्ति |
| ८७ | ४ | स्म लज्जया | १३४ | २ | ०शिशुः प्रबर्हाम् |
| ८८ | ३ | यन्निलयाः | १३६ | २ | ०कृत्यकृत्यैः |
| ८९ | ४ | वृणते | १३८ | २ | ०पादपदोपघातैः |
| ९१ | २ | गैरिकोद्घटित | १३९ | १ | ०तालताली |
| ९४ | ४ | व्यजनन् | १३९ | २ | ०क्वणितप्रसारैः |
| १०२ | ४ | परिलुब्धिः | १४० | १ | घरट्टसङ्घट्टन० |
| १०९ | (पहेलां) | यस्यां- | १५० | २ | जायते च (स्म) निर्विघ्नम् |
| ११२ | ४ | ०पयोधराः | | | |
| ११४ | ४ | रामालिवत्पत्रभृदस्त्य-नामा | १५१ | ४ | प्रद्युम्नरिपुर्जनाः |
| | | | १५१ | ४ | वितन्वन्ति काम् |
| ११५ | १ | मही या संशया० | १५१ | ५ | ०तमानन्दता |
| ११५ | २ | श्रीदललद्दशा | १५४ | २ | ०रुणसमं समता |
| ११६ | १ | ०कोट्याढ्यनीरं | १५७ | १ | ०न्यत्कारिसुकरं |
| ११६ | ४ | लग्नोद्यद्धृङ्गव(?)-लाद्वर | १५८ | १ | ०चारनिकरं |
| | | | १५८ | ३ | ०कल्कहरं |
| ११७ | ३ | उत्फुल्लकुसुम० | १६९ | १ | मधुकृत्स्थिति० |
| ११८ | १ | ०मुन्महः श्रि | १७२ | १ | गुरुतापारकूपारं |

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

| श्लोकः | पङ्क्तिः | पाठः | श्लोकः | पङ्क्तिः | पाठः |
|---|---|---|---|---|---|
| १७७ | १ | प्रभो ! प्रास्त० | २०३ | ३ | तत्त्वभृत् त्वां |
| १७७ | २ | ०चातुरी तेतिचन्द्रा | २०५ | १ | ०प्रभादक्ष |
| १७८ | ३ | प्रत्तसंसार० | २०५ | ४ | ०तुष्टिपुष्टी भव० |
| १७८ | ४ | कन्त(कं त)द्भयालि- | २०६ | १ | नवसद्व(द्ध)नकं |
| | | प्रकप्रः(म्प्रः) | २०६ | ४ | परमसत्यन |
| १७९ | २ | ०मायेभसिंहम् | २०८ | २ | ०मनामयम् |
| १७९ | ३ | महायःस्फुर० | २०९ | २ | समनिर्भरम् |
| १८२ | ३ | ०पयोजे ममैवं | २०९ | ३ | सद्दंहतापायं |
| १८३ | १ | हतानन्त० | २१० | २ | गुणवद्गुरु० |
| १८७ | ४ | ०द्यत्प्रदीपम् | २१० | ३ | दमी ननदरः |
| १८९ | २ | जनौघामित | २११ | १ | नम मीमं न दामीमं |
| १९१ | ४ | ०स्येह मद्राम्बुज० | २११ | ३ | मीमाभतारयो |
| १९१ | पछी | द्वितीयमध्यमणिः | २१२ | १ | ०वासवनाङ्गन |
| १९२ | १ | तमोनुन्नपाशं | २१२ | २ | ०समधीरतः |
| १९४ | २ | प्रत्ततन्वस्वधैर्या० | २१२ | ३ | सद्दान |
| १९४ | ४ | समक्रीडित० | २१६ | ४ | ०शर्मप्रदः |
| १९६ | १ | ०महद्ध्वनिः | २१७ | २ | तेऽमला कामदुर्मदान् |
| १९८ | १-२ | ०गीतवरा० | २१७ | ३ | दीनो हन्त्येव |
| १९८ | ३ | ०घनाघनारावं | २१८ | २ | ०क्षमनमनमं |
| १९९ | ४ | सुममं सुगम् | २१८ | ४ | रङ्गज्जम्पत्पतत्सद्द० |
| २०० | १ | नंनममत्यसा पापं | २१९ | २ | गतालयः |
| २०० | ३ | गच्छमंदम्भसम्भार | २१९ | ३ | दत्तां निस्तार० |
| २०१ | २ | ०प्रमाददनोऽज्ञपः | २२० | २ | छिन्द्याद् |
| २०१ | ३-४ | ०समत्वश्रीश्रीसम्भारं | २२१ | १ | ०मुदा तारं |
| २०३ | १ | नतमादं | २२१ | ३ | यशोधःसुनुता० |

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

| श्लोकः | पङ्क्तिः | पाठः | श्लोकः | पङ्क्तिः | पाठः |
|---|---|---|---|---|---|
| २२१ | ४ | सन्याय० | २५२ | २ | ०जनव्रातशरण |
| २२२ | १ | यतनाश्री० | २५६ | ३ | काष्ठौघकंस० |
| २२२ | १-२ | नाऽद्यारजभोघ | २६० | २ | ०जले तूर्णम् |
| २२३ | ३ | प्रतमानय | २७१ | १ | आनमेन० |
| २२४ | १ | सद्गतसन्नामा | २७३ | ३ | सद्रासम० |
| २२४ | ४ | हरनूत ! जनप्रभो ! | २७५ | ४ | ०पवैणवं |
| २२५ | १ | रुग्धी दारवं | २७६ | ४ | कृपैकपुत्री |
| २२६ | १-२ | रम्याऽतिप्रभाकाभ | २७८ | २ | प्रसादनीया |
| २२६ | ३ | ०न्यायदो यः स | २८५ | २ | ०नाम निन्द्यवृ० |
| २२६ | ४ | युग्मम् । परिधिः । | २८८ | २ | हारि[सु]विशदरदानाम् |
| २२७ | ४ | ०कलाभृतम् | २९१ | ४ | ०कारिवचनानाम् |
| २२९ | १ | नागगुणकलावामं | २९७ | २ | ०ग्रामवेदमास० |
| २३० | ४ | दायकं नायकं | ३०० | २ | ०सञ्जकगणी० |
| २४५ | २ | दिक्षु सत्प्रभाम् | ३०३ | २ | चाम्पर्षेर्वृद्धि० |
| २५० | ३ | श्रीस्थिरासूनुं | | | |

*

- श्लोक १७३ 'षट्पदी' छे. पण वि.ले.सं. मां आने दोढ श्लोक गणी अडधो श्लोक छूटी गयो छे अेम छाप्युं छे. वळी श्लोक १९७ 'हरिणी' छन्दमां छे. पण वि.ले.सं.मां तेने बे 'अनुष्टुप्' तरीके छाप्यो छे. तेथी वि.ले.सं. मां कुल बे श्लोक वध्या छे.
- वि.ले.सं. मां श्लोक २०९ (नसममहं) पहेलां छे अने त्यारबाद २०८ क्रमाङ्कनो (नरौघा०) श्लोक छे.
- वि.ले.सं. मां श्लोक ३०४-३०५, ३०६ नो पूर्वार्ध, ३०७-३०८, ३१०-३११ नथी. तेमज 'इति लेखक०' वाळी अन्तिम पङ्क्ति पण नथी.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# अनुसन्धानगत-वाचनायाः
# शुद्धिपत्रकम्

**पत्रम् - ५**

| श्लोकः | पङ्क्तिः | शुद्धिः |
|---|---|---|
| १२ | ४ | प्रकटप्रभावम् |
| ५१ | ४ | ०कीवाऽऽम्बर० |
| ७५ | २ | ०निपुणाः |

**पत्रम् - ७**

| श्लोकः | पङ्क्तिः | शुद्धिः |
|---|---|---|
| १० | २ | भवतोंऽह्रिलीनाः |
| १४ | ३ | खरांशुता० |
| १६ | २ | ०दौःस्थ्यवृक्षाः |
| १९ | ३ | तं तीर्थनेतार० |
| ३३ | ३ | गृहे प्रदीप्रै० |
| ३७ | ३ | वर्णिनीनां |
| ४० | ३ | विनयनतः |
| ४२ | ३ | सातिशयं सौवा० |
| ८६ | ३ | ०बहुले पक्षे |

**पत्रम् - १०**

| श्लोकः | पङ्क्तिः | शुद्धिः |
|---|---|---|
| १८ | ४ | व्यावर्ण्ये |
| ४२ | ४ | वर्षन्तेऽभ्रा यदीरिताः |
| ५० | ३ | एतेषां |
| ५१ | ३-४ | श्रीमतोऽनघसङ्घस्याऽ-वधार्या वन्दना पुनः |
| प्रशस्तिः | | पूज्याराध्य |

**पत्रम् - १७**

| श्लोकः | पङ्क्तिः | शुद्धिः |
|---|---|---|
| ३ | २ | ०कलुषा विकलङ्क० |
| १६ | ४ | तमसां |
| १८ | ३ | ०वुपास्य जगती० |
| २१ | १ | स्वविमान |
| ३१ | ३ | प्रासादद्वय० |
| ३१ | ४ | ०पतिर्दीप्यत्प्रतापो० |
| ३४ | १ | ०मालपुर० |
| ४५ | ३ | ०सम्पदां ते |
| ४८ | ३ | ०वान्न कलङ्कतां |
| ४९ | १ | ०लोचन ! |
| ७१ | १ | ०राजमानाः |
| ७२ | १ | ०सच्छ्लोकाः |

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# विज्ञप्तिलेखसङ्ग्रहगत–
# पाठान्तरसूचिः

## पत्रम् - ५

| *श्लोकः | पङ्क्तिः | पाठः |
|---|---|---|
| ४ | ३ | नव्यभव्य० |
| ६ | ३ | मितदुभयं (?) |
| १२ | २ | प्रमुदा नितान्तम् |
| २३ | १ | श्राद्धी ततः |
| २३ | १ | ०लतेव यत्र |
| २४ | २ | ०मीप्सितार्थ० |
| २७ | १ | कलशैर्वृतानि |
| २८ | १ | ०वसुधाऽऽदर्शे |
| ३० | ४ | प्रपूर्णमुद्युक्ति० |
| ३८ | ३ | प्रश्रुताध्यापनं |
| ३९ | २ | ०पाक्षिकापारणानि |
| ४७ | २ | विशदीप्रकुर्वन् |
| ५० | ३-४ | ०सप्तीभाजिष्णु |
| ५९ | १ | ०मौलिविगलद्गङ्गा० |
| ५९ | २ | ०कन्यकोत्कुच० |
| ५९ | २ | ०हाराकृतिः |
| ६२ | १ | ०महिमचयं |
| ६५ | १ | ०प्रध्वंसमीक्ष्येव |
| ६६ | ३ | जिह्वासहस्र० |
| ७२ | २ | ०द्यनघगुण० |
| ७३ | ३ | श्रीमद्धन[ादि]विजया |
| ८२ | १ | लब्धिविजयाश्च गणयो |
| ८५ | ४ | ०म्बुजरुहयुगं |
| ८८ | २ | यदिह क्षुण्णं |

## पत्रम् - ७

| श्लोकः | पङ्क्तिः | पाठः |
|---|---|---|
| १ | ४ | विलसत्पृथ्वीव |
| ३ | ३ | सल्लक्ष्म्येकसुके० |
| ४ | ४ | सीतक्लेश० |
| १६ | १ | यदिष्टदाना० |
| २६ | ३ | ०वासं व्यरचत् वि० |
| ४८ | १ | इत्यादिदिनकृत्यानि |
| ५२ | १-२ | ०वराष्टाहपक्ष० |
| ५७ | ३ | आद्यं चिदानन्द० |
| ६५ | ३-४ | ०तीश ! जह्यान्मे |
| ६९ | ४ | सूरिराजाम् |

## पत्रम् - १०

| श्लोकः | पङ्क्तिः | पाठः |
|---|---|---|
| १ | २ | पादपद्म० |
| ३९ | ३ | दधन्ते परम्रा० |
| ४७ | २ | ०ज्ञातसेवकाः |

*आ श्लोक अने पङ्क्तिक्रमाङ्क अनुसन्धानननी वाचनाना छे, ज्यारे पाठ वि.ले.नो छे. मतलब के अनुसन्धाननी वाचनामां ते ते श्लोकनी ते ते पङ्क्तिमां विज्ञप्तिलेखसङ्ग्रहनी वाचना केवो भिन्न पाठ धरावे छे ते अत्रे दर्शाव्युं छे.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

### पत्रम् - १७

| श्लोकः | पङ्क्तिः | पाठः |
|---|---|---|
| १ | ३ | भवतिभृत्कृत्या० |

| श्लोकः | पङ्क्तिः | पाठः |
|---|---|---|
| २ | २ | ०दीशितरं कदम्भात् |
| २ | ३ | व्यपनय स्वजगत्प्र० |
| ३ | १ | ०परीष्ठितोऽत्र |
| ३ | २ | ०कलुषाधिकलङ्क० |
| ४ | २ | तत्पक्षता शरण० |
| ७ | २ | ०मिन्दुतोच्चैः |
| ८ | २ | व्ययमूषितश्रीः |
| ९ | १ | ०हतिवित्ततां तां |
| १४ | ४ | ०मेन उद्यम् |
| २३ | १ | ०गतत्रिरेखा० |
| २४ | २ | नो ध्रीयते |
| २५ | ३ | ०रमभाः स नाथं |
| २६ | १ | कृतं ब्रह्म० |
| २६ | २ | प्रणं नेमिनाथं |
| २६ | ३ | देवदेवो |
| २६ | ४ | बाभजत्यु० |
| २६ | ४ | ०मानसाब्जः |
| २८ | २ | ०त्तमोऽद्वल० |
| २९ | २ | सार्वौकसां |
| ४२ | ४ | ०ध्यानानुभावतः |
| ४८ | ३ | हिमांशुः सदा |
| ४९ | ३ | ऽद्याऽपि व्रतैर्जितः |
| ५६ | १ | जनवीरा |
| ६३ | ३ | विकलोद्यतेन्दुं |
| ६८ | ४ | नवाम्बुदस्येह |
| ८० | २ | ०यामलं सदा |

---

અનુસન્ધાનને ડિજિટલ (PDF) સ્વરૂપે આપ વાંચવા (નિઃશુલ્ક) ઇચ્છતા હો તો નીચે જણાવેલ E-mail ID પર આપનો સંદેશો મોકલશો.
sheelchandrasuri_darshan@yahoo.com

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org



(उपा. भुवनचन्द्रजी द्वारा मळेल जोधपुरना एक सचित्र विज्ञप्तिपत्रनुं एक दृश्य, जेमां श्रीनाथजीनुं स्वरूप तथा मन्दिर अङ्कित छे.
सौजन्य : राजस्थान प्राच्यविद्या प्रतिष्ठान).

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org



(उपाध्याय श्रीयशोविजयजीना हस्ताक्षरनो विज्ञप्तिपत्र : जुओ पृष्ठ १६)

Jain Education International For Personal and Private Use Only www.jainelibrary.org